# SALTORA NETAJI CENTENARY COLLEGE

*(Affiliated to Bankura University)*

Saltora, 722158, Dist.- Bankura, West Bengal

Model Questions and Answers

Semester-VI

Subject: B.A. SANSKRIT (Honours)

Course Code: AHSNS 601C-13

Course Title: Indian Ontology and Epistemology - C-13 subject

Course Topic: Tarkasamgraha

KOUSIK PATRA

Prepared by

Kousik Patra

Assistant Professor

Department of Sanskrit

Saltora Netaji Centenary College

E-mail ID : patrakousikjrf@gmail.com

Mobile No : 7872177720

## Short Notes (5 marks)

1. **पृथिवी/तत्र गन्धवती पृथिवी**

लक्षणम्- 'तत्र गन्धवती पृथिवी।'

भेदः - 'सा द्विविधानित्याऽनित्या च।'

नित्याः परमाणुरूपाः।


अनित्याः कार्यरूपाः।

'पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात्।'

शरीरमस्मदादीनाम्।

इन्द्रियं गन्द्धग्राहकं घ्राणम्। तच्च नासाग्रवर्ति।

विषयो मृत्पाषाणादिः।





KOUSIK PATRA




**2. आपः/शीतस्पर्शवत्यः आपः**

लक्षणम्- 'शीतस्पर्शवत्यः आपः।'
भेदः - 'ता द्विविधाः नित्या अनित्याश्च।'
नित्याः परमाणुरूपाः।
अनित्याः कार्यरूपाः।
'पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात्।'
शरीरं वरुणलोके।
इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति।
विषयः सरित्समुद्रादिः।




KOUSIK PATRA

### 3. तेजः/उष्णस्पर्शवत्तेजः

लक्षणम्- 'उष्णस्पर्शवत्तेजः।'

भेदः - 'तच्च द्विविधं नित्यमनित्यं च।'

नित्यं परमाणुरूपम्।

अनित्यं कार्यरूपम्।

पुनस्त्रिविधं शरीरेन्द्रियविषयभेदात्।

शरीरमादित्यलोके प्रसिद्धम् ।

इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति ।

विषयश्चतुर्विधः भौमदिव्यौदर्याकरज भेदात् ।

भौमं वह्न्यादिकम्।

अबिन्धनं दिव्यं विद्युदादि।

भुक्तस्य परिणामहेतुरौदर्यम्।

आकरजं सुवर्णादि॥




KOUSIK PATRA

### 4. गुणः

"रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभग- परत्वापरत्वगुरुत्व- द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न- धर्माधर्म-संस्काराः चतुर्विंशतिर्गुणाः।" ३॥

-अर्थात् रूपं, रसः, गन्धः, स्पर्शः, संख्या,  परिमाणं, पृथक्त्वं, संयोगः, विभगः, परत्वम्, अपरत्वं, गुरुत्वं, द्रवत्वं, स्नेहः, शब्दः, बुद्धिः, सुखं, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्मः, अधर्मः, संस्कारः चेति चतुर्विंशतिः गुणाः।




KOUSIK PATRA






## 5. कर्म

"उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि।" ४॥

उत्क्षेपणम्- ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्।

अपक्षेपणम्- अधोदेशसंयोगहेतुरवक्षेपणम्।

आकुञ्चनम्- शरीरसन्निकृष्टसंयोगहेतुराकुञ्चनम्।

प्रसारणम्- शरीरविप्रकृष्टसंयोगहेतुः प्रसारणम्।

गमनम्- अन्यत् सर्वं गमनम्।

**6. सामान्यम्-** नित्यमेकमनेकानुगतं सामान्यम्। अनेकसमवेतता संयोगविभागयोरप्यस्ति अतः तयोः अतोव्याप्तिवारणाय नित्यं सदिति। नित्यता आकाशादीनाम् अपि अस्ति इति तत्र अतिव्याप्तिवारणाय अनेकसमवेतम् इति । नित्यं सत् समवेतं गगनादिपरिमाणम् अपि अस्ति इति तद्वारणाय अनेकेति । नित्यं सत् अनेकवृत्ति अत्यन्ताभावादिकम् अपि अस्ति इति तद्वारणाय समवेतम् इति। अनुगतम् अनुवृत्तिप्रत्ययहेतुः। द्रव्यगुणकर्मवृत्ति। तद् द्विविधम् परम् अपरञ्च। परम् अधिकदेशवृत्ति अपरञ्च अल्पदेशवृत्ति। परं सामान्यं सत्ता अपरं द्रव्यत्वादिः।

KOUSIK PATRA

| **परम्** | **अपरम्** |
| --- | --- |
| परमधिकदेशवृत्तिः।<br>उदाहरणम्- सत्ता।<br>द्रवे, गुणे, कर्मणि च तिष्ठति। | अपरं न्यूनदेशवृत्तिः।<br>उदाहरणम्- द्रव्यत्वम्।<br>केवलं द्रव्ये तिष्ठति। |

**7. विशेषः- "नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव।"** अर्थात् विशेषाः नित्यद्रव्येषु वर्तते, व्यावर्तकाः (भेदकधर्माः) अनन्ताः च। नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः। "पृथिव्यादिचतुष्टयस्य परमाणवः आकाशादिपञ्चकं च नित्यद्रव्याणि।" अर्थात् पृथिवी-अप्-तपृथिवी-अप्-तेजो-वायूनां परमाणवः, आकाश-काल-दिक्-आत्मा-मनांसि नित्यद्रव्याणि। पृथिवी-अप्-तेज-वायु-इत्येतस्य सूक्ष्मतमावयवेषु (परमानुषु) तथा आकाशकालदिगात्मामनस्तु इत्येतेषु नित्यद्रव्येषु वर्तमानाः तेषां परस्परभेदकाः पदार्थाः विशेषाः कथ्यन्ते। स्वतोव्यावर्तकत्वं विषेषत्वम् अन्त्यत्वे सति नित्यद्रव्यवृत्तित्वं विशेषत्वम् इत्यपि विशेषस्य लक्षणम् अस्ति। नित्यद्रव्यवृत्तयो विशेषाः अनन्ताः सन्ति।

**8. समवायः- "समवायस्त्वेक एव।" समवायः एकः नित्यसम्बन्धः अयुतसिद्धयोः सम्बन्धः।** नित्यसम्बन्धः समवायः। नित्यत्वे सति सम्बन्धत्वं समवायत्वं। अयुतसिद्धवृत्तिः। ययोर्मध्ये एकम् अविनश्यद् अपराश्रितमेव अवतिष्ठते तावयुतसिद्धौ। यथा अवयवावयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चेति। एतेषां परस्परनित्यसम्वन्परस्परनित्यसम्वन्धः समवायः। समवायः तु एक एव भवति।

**9. अभावः-** भावभिन्नः अभावः। भावपदार्थान् भिन्नः पदार्थः अभावः कथ्यते। यथा भूतले घटः

KOUSIK PATRA

नास्ति।

**<u>अभावस्य भेदाः</u>**

"अभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावः अत्यन्ताभावः अन्योन्याभावश्चेति।" अर्थात् अभावश्चतुर्विधः प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावः च।

**क) प्रागभावः** - अनादिः सान्तः प्रागभावः। उत्पत्तेः पूर्वं कार्यस्य। यथा घटोत्पत्तेः पूर्वं कपालादौ घटाभावः।

**ख) प्रध्वंसाभावः -** सादिरनन्तः प्रध्वंसाभावः। उत्पत्त्यनन्तरं कार्यस्य। यथा विच्छिन्ने घटे घटाभावः।

**ग)अत्यन्ताभावः** - त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽभावः अत्यन्ताभावः। यथा वायौ रूपाभावः।

**घ) अन्योन्याभावः** - तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः। यथा 'घटः पटो न' इति।

**10. प्रमाणम्-** प्रमाकरणं प्रमाणम्। प्रमाणम् चतुर्विधम्। प्रत्यक्षानुमानोपमानशब्दभेदात्।

**क) प्रत्यक्षम्-** प्रत्यक्षज्ञानकरणं प्रत्यक्षम्। इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। तद् द्विविधं निर्विकल्पकं सविकल्पकं च। तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्। यथेदं किञ्चित्। सप्रकारकं ज्ञानं सविकल्पकम् यथा डित्थोऽयं, ब्राह्मणोऽयं, श्यामोऽयम्। सप्रकारकं इत्युक्ते नामजात्यादिविशेषणविशेष्यसम्बन्धविषयकं ज्ञानमिति।

ख) **अनुमानप्रमाणम्** – अनुमितिकरणम् अनुमानम्। परामर्शजन्यं ज्ञानमनुमितिः। व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा 'वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानं परामर्शः। तज्जन्यं 'पर्वतो वह्निमान्' इति ज्ञानमनुमितिः। अनुमानं द्विविधं स्वार्थं परार्थञ्च।

**11. सन्निकर्षः** - प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः।

KOUSIK PATRA

**क) संयोगः**- चक्षुषा घटप्रत्यक्षजनेन संयोगः सन्निकर्षः।

**ख)संयुक्तसमवायः**- घटरूपप्रत्यक्षजनेन संयुक्तसमवायः सन्निकर्षः। चक्षुःसंयुक्ते घटे रूपस्य समवायात्।

**ग) संयुक्तसमवेतसमवायः** – रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायसन्निकर्षः। चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वसमवायात्

**घ) समवायः**- श्रोत्रेण शब्दसाक्षात्कारे समवायः सम्बन्धः।

**ङ) समवेतसमवायः** – शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः

**च) विशेषणविशेष्यभावः**- अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः। घटाभाववद् भूतलम् इत्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात्।

**12. अनुमानप्रमाणम्** – अनुमितिकरणम् अनुमानम्। परामर्शजन्यं ज्ञानमनुमितिः। व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा 'वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानं परामर्शः। तज्जन्यं 'पर्वतो वह्निमान्' इति ज्ञानमनुमितिः।

<u>**अनुमानस्य भेदाः**</u> - अनुमानं द्विविधं स्वार्थं परार्थञ्च।

**क) स्वार्थानुमानम्**- तत्र स्वार्थं स्वानुमितिहेतुः।

**ख) परार्थानुमानम्**- यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत् परार्थानुमानम्। यथा पवर्तो वह्निमान् धूमवत्त्वात् यो यो धूमवान् स स वह्निमान् यथा महानसम् तथा चायम् तस्मात्तथा (पर्वतो वह्निमान्) प्रतिज्झाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः।

**13. हेत्वाभासाः** – हेतुवद् आभासन्ते इति हेत्वाभासाः। दोषदुष्टाः हेतवः हेत्वाभासाः इति कथ्यन्ते।

<u>**हेत्वाभासस्य भेदाः**</u> - सव्यभिचार-विरुद्ध-सत्प्रतिपक्ष-असिद्ध-बाधिताः पञ्च हेत्वाभासाः।

KOUSIK PATRA

**क)सव्यभिचारः**- सव्यभिचारोऽनैकान्तिकः। स त्रिविधः साधारण-असाधारण-अनुपसंहारिभेदात्।

**i)साधारणः**- तत्र साध्यभाववद्वृत्तिः साधारणोऽनैकान्तिकः। यथा पर्वतो वह्निमान् प्रमेयत्वात्।

**ii)असाधारणः** - सर्वपक्षविपक्षव्यावृतः पक्षमात्रवृत्तिरसाधारणः। यथा श्ब्दो नित्यःशब्दत्वात्।

**iii)अनुपसंहारी** - अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा सर्वमनित्यं प्रमेयत्वात्।

**ख)विरुद्धः** - साध्याभावव्याप्तोहेतुर्विरुद्धः। यथा शब्दो नित्यः कृतकत्वात्। अत्र कृतकत्वं हि नित्यत्वाभावेन अनित्यत्वेन व्याप्तमस्ति।

**ग) सत्प्रतिपक्षः**- यस्य साध्याभावसाधकं हेत्वन्तरं स सत्प्रतिपक्षः। यथा शब्दो नित्यः श्रावणत्वात् शब्दत्ववत् इति शब्दोऽनित्यः कार्यत्वाद् घटवत् इति।

**घ)असिद्धः** - लिङ्गत्वेन अनिश्चितो हेतु असिद्धः। असिद्धः त्रिविधः -आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति।

**i)आश्रयासिद्धः** - यस्य हेतोः आश्रयः असिद्धः सः आश्रयासिद्धः। यथा गगनारविन्दं सुरभिं अरविन्दत्वात् सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः स च नास्त्येव।

ii) **स्वरूपासिद्धो**। यथा शब्दो गुणः चाक्षुषत्वात्। अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात्।

**iii)असिद्धः**- सोपाधिको हेतुर्व्याप्यत्वासिद्धः। यथा पर्वतो धूमवान् बह्निमत्त्वाद् इत्यत्र आर्द्रेन्धनसंयोग उपाधिः।

**ङ) बाधितः** - यस्य साध्याभावः प्रमाणान्तरेण पक्षे निश्चितः स बाधितः। यथा अग्निः अनुष्णः द्रव्यत्वात्। अत्र अग्नेः अनुष्णत्वं प्रत्यक्षेण एव बाधितः।

KOUSIK PATRA

## Short questions (2 marks)

1. तर्कसंग्रहस्य मङ्गलाचरणं श्लोकः लिख्यताम्।

उत्तरम्- "निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।

बालानां सुखबोधाय क्रियते तर्कसंग्रहः॥"

2. तर्कसंग्रहदिशा कति पदार्थाः? के ते पदार्थाः?

उत्तरम्- तर्कसंग्रहदिशा सप्त पदार्थाः। द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय-अभावाः पादार्थाः।

3. तर्कसंग्रहदिशा कति द्रव्याणि? द्रव्याणि कानि?

उत्तरम्- तर्कसंग्रहदिशा नव द्रव्याणि। पृथिवी-अप्-तेज-वायु-आकाश-काल-दिक्-आत्मा-मनांसि द्रव्याणि।

4. अन्नंभट्टनये कति गुणाः? के च ते?

उत्तरम्- अन्नंभट्टनये चतुर्विंशतिः गुणाः। रूपं, रसः, गन्धः, स्पर्शः, संख्या, परिमाणं, पृथक्त्वं, संयोगः, विभगः, परत्वम्, अपरत्वं, गुरुत्वं, द्रवत्वं, स्नेहः, शब्दः, बुद्धिः, सुखं, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्मः, अधर्मः, संस्कारः चेति चतुर्विंशतिः गुणाः।

5. अभावः कतिविधः? के च ते?

उत्तरम्- अभावः चतुर्विधः। यपा- प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावः च।

6. सामान्यं कतिविधं? कानि च तानि?

उत्तरम्- सामान्यं द्विविधम्। यथा- परम् अपरं च।

7. कर्म कतिविधम्? कर्मणां नामानि लिखत।

KOUSIK PATRA

उत्तरम्- कर्म पञ्च विधम्। यथा- उत्क्षेपणम्, अपक्षेपणम्, आकुञ्चनम्, प्रसारणम्, गमनम् च।

8. आत्मनः विशेषगुणाः के?

उत्तरम्- बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्माधर्मौ च अष्टौ आत्मनो विशेषगुणाः।

9. उष्णस्पर्शवान् कः?

उत्तरम्- उष्णस्पर्शवान् तेजः

10. किं नाम रूपम्? रूपं कतिविधं?

उत्तरम्- चक्षुर्मात्रग्राह्यो गुणो रूपम्। रूपं शुक्ल-नील-पीत-रक्त-हरित-कपिश-चित्रभेदात् सप्तविधम्।

11. अनुभवः कतिविधः? के च ते?

उत्तरम्- अनुभवः द्विविधः, यथा- यथार्थोऽनुभवः, अयथार्थोऽनुभवः।

12. सन्निकर्षं कतिविधम्? कानि च तानि?

उत्तरम्- सन्निकर्षं षड्विधम्। यथा- संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति।

13. लिङ्गं कतिविधम्?

उत्तरम्- लिङ्गं त्रिविधम्, अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि।

14. पक्षः कः? विपक्षः कः?

उत्तरम्- सन्दिग्धसाध्यवान् पक्षः। निश्चितसाध्याभाववान् विपक्षः।

KOUSIK PATRA

## भारतीयदर्शन

**आस्तिकदर्शन-** 1. सांख्य 2. योग 3. न्याय 4. वैशेषिक 5. मीमांसा 6.वेदान्त

**नास्तिकदर्शन-** 1. चार्वाक 2. बौद्ध 3.जैन

| दर्शन | | प्रवर्तक आचार्य |
|---|---|---|
| 1. सांख्य | - | कपिल |
| 2. योग | - | पतञ्जलि |
| 3. न्याय | - | गौतम |
| 4. वैशेषिक | - | कणाद |
| 5. पूर्वमीमांसा | - | जैमिनि |
| 6. उत्तरमीमांसा (वेदान्त) | - | बादरायण |

KOUSIK PATRA

## नास्तिक दर्शन

1. चार्वाक - बृहस्पति/चार्वाक
2. बौद्ध - महात्मा गौतम बुद्ध
3. जैन - ऋषभदेव/महावीर स्वामी

| दर्शन | ग्रन्थ | प्रमुख सिद्धान्त/वाद |
|---|---|---|
| 1. सांख्य | सांख्यसूत्र | सत्कार्यवाद<br>परिणामवाद |
| 2. योग | योगसूत्र | सत्कार्यवाद<br>सेश्वरवाद |
| 3. न्याय | न्यायसूत्र | असत्कार्यवाद<br>पिठरपाकवाद |

| दर्शन | ग्रन्थ | प्रमुख सिद्धान्त/वाद |
|---|---|---|
| 4. वैशेषिक | वैशेषिकसूत्र | परमाणुवाद<br>पीलुपाकवाद |
| 5. पूर्वमीमांसा | मीमांसासूत्र | अपूर्ववाद |
| 6. उत्तरमीमांसा (वेदान्त) | ब्रह्मसूत्र | विवर्तवाद<br>मायावाद |

KOUSIK BATRA

| दर्शन | प्रमाण | पदार्थ (तत्त्व) |
|---|---|---|
| 1. सांख्य | तीन प्रमाण | 25 |
| 2. योग | तीन प्रमाण | 26 |
| 3. न्याय | चार प्रमाण | 16 |

| दर्शन | प्रमाण | पदार्थ (तत्त्व) |
|---|---|---|
| 4. वैशेषिक | दो प्रमाण | 7 |
| 5. पूर्वमीमांसा | छः प्रमाण | - |
| 6. उत्तरमीमांसा | छः प्रमाण | 2 |

KOUSIK PATRA

## Long Questions (10 marks)

**1. तर्कसंग्रहदिशा को नाम पदार्थ:? पदार्थः कतिविध:? पदार्थानां भेदविषपे संक्षेपेण आलोच्यताम्।**

**उत्तरम् - <u>को नाम पदार्थ:?</u>**

पदस्य अर्थः पदार्थ:' इति व्युत्पत्या अभिधेयत्वं पदार्थसामान्यलक्षणम्। अर्थबोधाय यत् शक्तं तदेव पदम्। गत्यर्थके ज्ञानार्थके वा ॠ-धातो थ-प्रत्ययेण अर्थ-शब्दस्य व्युत्पत्तिः।

ऋच्छन्ति इन्द्रियाणि यं स अर्थः, इन्द्रियानुभवयोग्यः, ज्ञेयः, अभिधेयो वा। तस्मात् पदार्थ इत्यनेन पदसम्बन्ध्यभिधाविषयत्वस्य लाभे अपि पदसम्बन्धित्वांशस्य अव्यावर्तकत्वात् अभिधेयत्वमात्रं पदार्थलक्षणम्। यस्य कस्यापि पुरुषस्य ईश्वरस्य वा यो ज्ञानविषयो भवितु-मर्हति स पदार्थ इत्यर्थः ।

**<u>पदार्थस्य भेदाः</u>**

नव्यन्यायमते सप्त पदार्था:।

तथा च उक्तं तर्कसंग्रहे - 'द्रव्यगुणकर्म-सामान्यविशेषसमवायाभावाः सप्तपदार्था:' इति।

भाषापरिच्छेदे च- 'द्रव्यं गुणस्तथाकर्म सामान्यं सविशेषषम्। समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिता:' इति'।

अर्थात् पदार्थः सप्तविध:, यथा- द्रव्यम्, गुण:, कर्म, सामान्यम्, विशेष:, समवाय:, अभावः चेति।

**<u>पदार्थानां भेदविषपे संक्षिप्तः आलोचना</u>**

१) द्ररव्यम्- गुणवत्वं द्रव्यत्वं। 'द्रव्यत्वजातिमत्त्वं वा द्रव्यत्वम्। द्रव्याणि पृथिव्यादीनि नव।

२) गुणः- गुणत्वजातिमान् गुणः। रूपरसादयः चतुर्विंशतिः गुणाः।

३) कर्म- संयोगभिन्नत्वे सति संयोगासमवायिकारणत्वं कर्मत्वम्। उत्क्षेपणादीनि पश्च फर्माणि।

४) सामान्यम्- नित्यत्वे सति अनेक समवेतत्वं सामान्यत्वम्।गोत्वपशुत्वादिकं सामान्यम्। अन्त्यो नित्यद्रव्यवृत्तिविशेषः परिकीर्तितः। सामान्यं द्विविधं- परम्, अपरं चेति।

५) विशेषः - परमाण्वादिषु नित्यद्रव्येषु वर्त्तमाना इतरभेदानुमितिहेतवो विशेषाः। विशेषास्तु अनन्ता एव

६) समवायः- नित्यसम्बन्धः समवायः। अयुतसिद्धयोः अपृथक् सिद्धयो र्वा सम्बन्धः समवायः। गुणगुणिनोर्यथा। समवायस्तु एक एव।


७) अभावः- भावभिन्नत्वम् अभावत्वम्। निषेधाभिलापकप्रत्ययगम्यत्वम् अभावत्वम् इति वा। अभावश्चतुर्विधः - प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावः चेति।







KOUSIK PATRA




KOUSIK PATRA

**2. तर्कसंग्रहदिशा किं नाम द्रव्यम्? द्रव्यं कतिविधम्? द्रव्यानां भेदविषपे संक्षेपेण आलोच्यताम्।**

**उत्तरम् - <u>तर्कसंग्रहदिशा किं नाम द्रव्यम्?</u>**

गुणवत्वं द्रव्यत्वं। 'द्रव्यत्वजातिमत्त्वं वा द्रव्यत्वम्। समवायिकारणवत्त्वं द्रव्यम्। द्रव्याणि पृथिव्यादीनि नव।

**<u>द्रव्याणां भेदाः</u>**

**'तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशाकालदिगात्ममनांसि नवैव॥' २॥**

अर्थात् पृथिवी, आपः, तेजः, वायुः, आकाशः, कालः, दिक्, आत्मा, मनः चेति नव द्रव्याणि।




**<u>द्रवयाणि नवैव</u>**

द्रवयाणि नवैव, न ततः अधिकानि, न न्यूनानि इत्यर्थः एव पदस्य।

**<u>अन्धकारो नाम दशमद्रव्यम्? (आक्षेपः / पूर्वपक्षः)</u>**

तमसो द्रव्यत्वम् सिद्धम्।

नीलं तमः। गुणवत्त्वात् द्रव्यम् अन्धकारः।

दीपेन सह गमने तमसि चलन-क्रियावत्त्वप्रतीतिः। तेन द्रव्यत्वम्।

कुतो पृथिव्यादौ न स्यात्?

आकाशादौ नीरूपत्वात् न अन्तर्भावः।

तमसो निर्गन्धत्वात् न पृथिव्याम् अन्तर्भावः।

**उत्तरपक्षः**

तेजसो ऽभावस् तमः। अभावे तमसो ऽन्तर्भावः।

अभाववचनार्थं प्रतियोगी अपेक्षितः।

नीलरूपत्वप्रतीतिः भ्रान्तिः। चलनक्रियाप्रतीतिरपि भ्रान्तिः।

**न तेजसो ऽभावस्वरूपवत्त्वम्**

कुतस् तमसो द्रव्यत्वम् अङ्गीकृत्य तेजसोऽभावत्वं न स्यात्?

विनिगमनम् = एकपक्षनिर्णायिका युक्तिः।

तस्य विरहो ऽत्र।

तेजसो गुणेषु न केवलं प्रकाशवत्त्वम्।

तेजस उष्णस्पर्शप्रतीतिः साधु, न भ्रान्तिः। तेन तेजसो देव्यता।

तमसो गुणवत्त्वन्तु भ्रान्तिः।

अन्यथा उष्णस्पर्शवदद्रव्यान्तरस्य अङ्गीकारे गौरवम्।

KOUSIK PATRA

## Prescribed books-

1. ভারতীয় দর্শনের রূপরেখা, অমিত ভট্টাচার্য, সংস্কৃত বুক ডিপো, কোলকাতা
2. Jha, V. N., Tarkasaṃgraha of Annambhaṭṭa ( English Translation with Notes), CIFSS, Kerala (India),2016 (2nd Ed.)

### Consulted Books-

1. ভারতীয় দর্শন, নীরোদবরণ চক্রবর্তী
2. A Primer of Indian Logic, Kuppuswami Shastri, Madras, 1951.
3. তর্কসংগ্রহ, যুধিষ্ঠির গোপ
4. তর্কসংগ্রহ, অনামিকা রায় চৌধুরী
5. তর্কসংগ্রহ, নারায়ণ চন্দ্র গোস্বামী, সংস্কৃত পুস্তক ভাণ্ডার, কোলকাতা
6. A Critical Survey of Indian Philosophy, C. D. Sharma, MLBD, 1962

KOUSIK PATRA

Edit with WPS Office

# Saltora Netaji Centenary College

(Affiliated to Bankura University)

Saltora, 722158, Dist.-Bankura, West Bengal

Study Material

Subject: B.A. Sanskrit (Honours)

Semester-III

Course Code: AHSNS302C-6

Course Title: Indian Social Institutions and Polity

CourseTopic: Yajnavalkyasamhita: Vyavaharadhyayah

Title off the Study Material: Explanations of Yajnavalkyasamhita: Vyavaharadhyayah

KOUSIK PATRA

Prepared By
Kousik Patra
Assistant Professor & H.O.D.
Department of Sanskrit
Saltora Netaji Centenary College
E-mail ID: patrakousikjrf@gmail.com
Mobile No: 7872177720

Edit with WPS Office

## याज्ञवल्क्यसंहिता- व्यवहाराध्यायः

### व्याख्या- श्लोकसंख्या- १

**व्यवहारान् नृपः पश्येद् विद्वद्भिर्ब्राह्मणैः सह ।**

**धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ।।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिराजेन याज्ञवल्क्येण विरचितस्य याज्ञवल्क्यसंहितायाः व्यवहाराध्यायस्य साधारणव्यवहारमातृकाप्रकरणात् उत्कलितः ।

**प्रसङ्गः**- श्लोकेऽस्मिन् व्यवहारदर्शनप्रसङ्गेन राज्ञः कर्तव्यः व्याख्यातः ।

**व्याख्या**- राजा प्रजानुरञ्जकः । प्रजानां सर्वथा कल्याणसाधनं राज्ञः कर्तव्यम् । प्रजासु संगठिते विवादविसम्बादे राजा एव निर्णायकः । परन्तु दुष्टानां दमनं शिष्टानां च पालनं राज्ञः मुख्यकर्तव्यम् । एतदर्थं व्यवहारः तथा विचारपद्धतिः संहिताशास्त्रेषु उपदिष्टा । व्यवहारबलेन एव अन्यायं निराकृत्य सुशासनं प्रतिष्ठितं भवति । व्यवहारशब्दस्य निर्वचनमुखेन महर्षिणा कात्यायनेन प्रतिपादितम्-

**वि नानार्थे अव सन्देहे हरणात् हार उच्यते ।**

**नानासन्देहहरणात् व्यवहारः इति स्मृतः ।।**

राजा स्वयं व्यवहारं पश्येत् । यतः सुशासनस्य प्रतिष्ठार्थमेव राजशक्तिः कल्पिता । न्यायदण्डधरः राजा दण्डसहायेन अन्यायं प्रतिरोध्य न्यायं प्रतिष्ठापेयत् । किन्तु राजकार्य बहुव्यापारसम्पन्नम् । अथ राजकार्यं सहायसाध्यम् । व्यवहारदर्शनेऽपि राज्ञः सहायकः आवश्यकः । अस्मिन् व्यवहारदर्शनकार्ये विद्वांसः विविधशास्त्रेषु निष्णाताः सुपण्डिताः ब्राह्मणाः राज्ञः सहायकाः भवेयुः । ते च विद्वांसः क्रोधलोभभयविवर्जिताः सन्तुः न्यायप्रतिष्ठार्थं विचारव्यवस्थायां राज्ञः सहयोगिनः भवेयुः । धर्मशास्त्रानुसारेण अर्थशास्त्रानुसारेण च विचारव्यवस्था पर्यालोचिता स्यात् । दण्डनीयाः यथा दण्डलाभात् अव्याहतिं न लभेयुः तथैव निरपराधिनः अपि यथा मिथ्यादण्डं न प्राप्नुवन्ति - एतत् सर्वं सुनिश्चितं भवेत् । यथा चोक्तं मनुना-

**अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।**

**अयशो महदाप्नोति नरकं चैव गच्छति ।**

अथ विद्वद्भिः ब्राह्मणैः सह राजा स्वयं विचारव्यवस्थां पर्यालोच्य सर्वथा न्यायं प्रतिष्ठापयेत्।

Edit with WPS Office

## व्याख्या- श्लोकसंख्या- २

**श्रुताध्ययनसम्पन्ना धर्मज्ञाः सत्यवादिनः ।**
**राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः ।।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिराजेन याज्ञवल्क्येण विरचितस्य याज्ञवल्क्यसंहितायाः व्यवहाराध्यायस्य साधारणव्यवहारमातृकाप्रकरणात् उत्कलितः ।

**प्रसङ्गः**- श्लोकेऽस्मिन् विचारकार्येषु नियुक्तानां सभ्यानां योग्यता पर्यालोचिता ।

**व्याख्या**- राजा प्रजानुरञ्जकः । प्रजानां सर्वथा कल्याणसाधनं राज्ञः कर्तव्यम् । प्रजासु संगठिते विवादविसम्बादे राजा एव निर्णायकः । परन्तु दुष्टानां दमनं शिष्टानां च पालनं राज्ञः मुख्यकर्तव्यम् । एतदर्थं व्यवहारः तथा विचारपद्धतिः संहिताशास्त्रेषु उपदिष्टा । व्यवहारवलेन एव अन्यायं निराकृत्य सुशासनं प्रतिष्ठितं भवति । व्यवहारशब्दस्य निर्वचन मुखेन महर्षिणा कात्यायनेन प्रतिपादितम्-

**वि नानार्थे अव सन्देहे हरणात् हार उच्यते ।**

**नानासन्देहहरणात् व्यवहारः इति स्मृतः ।।**

राजा स्वयं व्यवहारं पश्येत् । यतः सुशासनस्य प्रतिष्ठार्थमेव राजशक्तिः कल्पिता । न्यायदण्डधरः राजा दण्डसहायेन अन्यायं प्रतिरोध्य न्यायं प्रतिष्ठापेयत् । किन्तु राजकार्य बहुव्यापारसम्पन्नम् । अथ राजकार्यं सहायसाध्यम् । व्यवहारदर्शनेऽपि राज्ञः सहायकः आवश्यकः । अस्मिन् व्यवहारदर्शनकार्ये विद्वांसः विविधशास्त्रेषु निष्णाताः सुपण्डिताः ब्राह्मणाः राज्ञः सहायकाः भवेयुः । ते च विद्वांसः क्रोधलोभभयविवर्जिताः सन्तुः न्यायप्रतिष्ठा ) विचारव्यवस्थायां राज्ञः सहयोगिनः भवेयुः । ते च विद्वांस श्रुताध्ययनसम्पन्नाः वेद - व्याकरण मीमांसादिशास्त्रेषु कृतविद्याः धर्मशास्त्रेषु अर्थशास्त्रेषु च निष्णाताः भवेयुः । सभासदः सत्यवादिनः असत्यम् अन्यायं परिहत्य सत्यानुसारिणश्च भवेयुः । सभासदः सर्वे भयक्रोधलोभविवर्जिताः सन्तुः विचारकार्येषु रिपौ मित्रे च समदर्शिनः भवेयुः । यतः विचारकार्ये निरपेक्षता अवलम्बनीया । एतदर्थं कात्यायनेन उक्तम्-

**कुलशीलवयोवृत्तवित्तवद्भिरमत्सरैः ।**

**वणिभिः स्यात् कतिपयैः कुलभृतैरधिष्ठितम् ।।**

सप्राड्विवाकः राजा निरपेक्षः सन् विचारमाध्यमेन न्यायं प्रतिष्ठापयेत् ।

---------

KOUSIK PATRA

Edit with WPS Office

## व्याख्या- श्लोकसंख्या- ३

**अपश्यता कार्यावशाद् व्यवहारान् नृपेण तु ।**

**सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित् ।।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिराजेन याज्ञवल्क्येण विरचितस्य याज्ञवल्क्यसंहितायाः व्यवहाराध्यायस्य साधारणव्यवहारमातृकाप्रकरणात् उत्कलितः ।

**प्रसङ्गः**-श्लोकेऽस्मिन् प्राड्विवाकस्य नियुक्तिविषये राजानं प्रति याज्ञवल्क्यस्य परामर्शः विहितः ।

**व्याख्या**-सहायसाध्यं राजत्वम् - बहुव्यापारसम्पन्ने राजकार्ये राज्ञां कृते उपयुक्ताः सहायकाः आवश्यकाः । मन्त्रणाकार्ये यथा मन्त्रिणः नमात्याश्च तथैव विचारकार्ये प्राड्विवाकः । राजा स्वयं विचारकार्य पश्येत् । किन्तु राजकार्येषु राज्ञः व्यस्ततावशात् तस्य प्रतिनिधिरूपेण कश्चित् प्रधानः विचारपतिः नियुक्तः भवेत् । स च प्राविवाकः उच्यते । उक्तञ्च महर्षिणा नारदेन-

**धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः ।**

**समाहितमतिः पश्येद् व्यवहाराण अनुक्रमात् ।।**

अन्यैः सभासद्भिः सह सर्वधर्मविद् ब्राह्मणः कश्चित् प्रधानविचारपतिरूपेण राज्ञा नियोक्तव्यः । अन्यकार्येषु व्यापृते नृपौ राज्ञः प्रतिनिधिरूपेण प्राड् विवाकः सभ्यैः सह व्यवहारं पश्येत् । स च प्राड्विवाकः अवश्यमेव विद्वान् सर्वधर्मवित् ब्राह्मणः भवेत् । एवंविधस्य ब्राह्मणस्य अप्राप्ते उपयुक्तगुणसम्पन्नः क्षत्रियः तदप्राप्ते वैश्यः वा प्राड्विवाकरूपेण नियोक्तव्यः, उक्तञ्च कात्यायनेन-

**ब्राह्मणो यत्र न स्यात्तु क्षत्रियं तत्र योजयेत् ।**

**वैश्यं वा धर्मशास्त्रज्ञः शूद्रं यत्नेन वर्जयेत् ।।**

---------

KOUSIK PATRA

Edit with WPS Office

## व्याख्या- श्लोकसंख्या- ५

**स्मृत्याचार व्यपेतेन मार्गेणाधर्षितः परैः ।**

**आवेदयति चेद् राज्ञे व्यवहार पदं हि तत् ।।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिराजेन याज्ञवल्क्येण विरचितस्य याज्ञवल्क्यसंहितायाः व्यवहाराध्यायस्य साधारणव्यवहारमातृकाप्रकरणात् उत्कलितः ।

**प्रसङ्गः**- श्लोकेऽस्मिन् व्यवहारस्य विषयः निर्दिष्ट : महर्षिणा याज्ञवल्क्यपादेन ।

**व्याख्या**- सामाजिकानां नागरिकानां प्रात्यहिकजीवनपरिचालनार्थं वैदिकशिक्षानुसारं स्मृतिशास्त्रं रचितम् । लोकाचारोऽपिजनजीवनमनुसृत्य रचितः भवति । सामाजिकाः यथा स्मृतिशास्त्रस्य तथा लोकाचारस्य विधानानुसारं जीवनयापनं कुर्युः । किन्तु धर्मशास्त्रसमयाचारविरुद्धेन मार्गेण कश्चित् सामाजिकः यदि केनापि दुर्वृत्तेन लाञ्छितः भवेत् तर्हि स लाञ्छितः जनः सुविचारार्थं प्राड्विवाकाय आवेदयितुं समर्थः । लाञ्छितस्य जनस्य तत् आवेदनं व्यवहारविषयः भवति । व्यवहारपदं प्रतिज्ञा - उत्तर - संशय - हेतुपरामर्श - प्रमाणनिर्णयप्रयोजनात्मकः व्यवहारः , तस्य पदं विषयः । अर्थिनः अभियोगः द्विविधः - शङ्काभियोगः तत्त्वाभियोगश्च । यथाह नारदः-

**अतियोगस्तु विज्ञेयः शङ्कातत्त्वाभियोगतः ।**

**शङ्का असतां तु संसर्गात् तत्त्वं होढ़ाभिदर्शनात् ।।**

असतां संसर्गविषयकः शङ्काभियोगः तत्त्वाभियोगश्च वित्तापहरणजनकम् । संहिताशास्त्रेषु अभियोगः विवादस्थलरूपेण व्याख्यातः । मनुना व्यवहारविषयः अष्टादशप्रकारकः इति उल्लिखितः ।

---------

KOUSIK PATRA

Edit with WPS Office

## व्याख्या- श्लोकसंख्या- ७

**श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसन्निधौ ।**

**ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम् ।।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिराजेन याज्ञवल्क्येण विरचितस्य याज्ञवल्क्यसंहितायाः व्यवहाराध्यायस्य साधारणव्यवहारमातृकाप्रकरणात् उत्कलितः ।

**प्रसङ्गः**- श्लोकेऽस्मिन् चतुष्पादव्यवहारस्य स्वरूपः वर्णितः याज्ञवल्क्यपादेन ।

**व्याख्या**- व्यवहारः चतुष्पाविशिष्टः-भाषापादः, उत्तरपादः, क्रियापादः, साध्यसिद्धिपादश्च । स्मृत्याचारविरुद्धमार्गेण लाञ्छितः सामाजिकः सुविचारार्थं प्राड्विवाकसकाशं आवेदयितुं समर्थः । अर्थिनः आवेदनपत्रे गृहीते सति राजा प्रत्यर्थिनं विचारालये समाह्वयेत् । आवेदनानुसारं प्रत्यर्थिनः पुरतः अर्थिनः वक्तव्यं लिखितं स्यात् । स एव भाषापादः । अर्थिनः अभियोगं श्रुत्वा प्रत्यर्थिनः उत्तरमपि तत्क्षणात् लिखितं भवेत् । एषः उत्तरपादः । उत्तरपादे पूर्वपक्षस्य तथा अर्थिनः वक्तव्यविषयस्य खण्डनपूर्वकं प्रत्यर्थिनः वक्तव्यम् उपस्थापितं भवेत् । उत्तरलक्षणे मिताक्षरायामुक्तम्-

**पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् ।**

**अव्याख्यागम्यमित्ये तदुत्तरं तद्विदो विदुः ।**

सत्यनिर्णयार्थ पक्ष - प्रतिपक्षयोः वक्तव्यम् उपस्थापनात् अनन्तरं साक्षियोगेन विवादविषयस्य सत्यासत्यं निर्णीतं भवेत् । इयं हि प्रक्रिया क्रियापादः । साध्यसिद्धिपादे विवादस्य निष्पत्तिः जायते ।

श्रुतार्थस्योत्तरं प्रत्यर्थिनः वक्तव्यस्य उत्तरम् । प्रतिज्ञातार्थसाधनम् भाषापादे लिखितं अर्थिन वक्तव्यस्य साधनं तथा निष्पत्तिः ।

---------

KOUSIK PATRA

Edit with WPS Office

## व्याख्या- श्लोकसंख्या- ८

**तत्सिद्धौ सिद्धिमाप्नोति विपरीतमथोऽन्यथा ।**

**चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शितः ।।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिराजेन याज्ञवल्क्येण विरचितस्य याज्ञवल्क्यसंहितायाः व्यवहाराध्यायस्य साधारणव्यवहारमातृकाप्रकरणात् उत्कलितः ।

**प्रसङ्गः**- श्लोकेऽस्मिन् चतुष्पाद्व्यवहारविषयः प्रदर्शितः महर्षिणा याज्ञवल्क्येण ।

**व्याख्या**- व्यवहारः चतुष्पाद्विशिष्टः । प्रथमः पादः भाषापादः । तत्र 'प्रत्यर्थिनोऽग्रतो लेख्यम्' (षष्ठः श्लोकः) भाषापादः । 'श्रुतार्थस्योत्तरं लेख्यम्' इति द्वितीयः पादः उत्तरपादः (सप्तमः श्लोकः)। 'ततः अर्थी लेखयेत् सद्यः' (सप्तमः श्लोकः) इति तृतीयः पादः क्रियापादः । 'तत् सिद्धौ सिद्धिमाप्तोति' (अष्टमः श्लोकः) इति चतुर्थः पादः साध्यसिद्धिपादः।

अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमः धर्मः । प्रजापालनं सुशासनं च दुष्टनिग्रहमन्तरेण न सम्भवेत् । दुष्टपरिज्ञानाय व्यवहारदर्शनम् आवश्यकम् । व्यवहारः नाम अन्यविरोधेन स्वात्मसम्बन्धितया कथनम् । वेदव्याकरण धर्मार्थशास्त्राभिज्ञैः सभ्यैः सह राजा व्यवहाराण पश्येत् । विवादास्पदीभूतविषयस्य धर्मशास्त्रतः निष्पत्तिं विधाय राजा नागरिकेभ्यः सुशासनं कल्याणं च दद्यात् । इत्थं राज्ञः राजधर्मपालनं सुकरं भवेत् । अथोच्यते-

**भाषोत्तरक्रिया साध्यसिद्धिभिः क्रमवृत्तिभिः ।**

**प्राक्षिप्तचतुरंशस्तु चतुष्पादभिधीयते ।।**

चतुष्पाद्व्यवहारस्य सिद्धौ प्रथी विजयी भवति , अन्यथा पराजितः ।

---------

KOUSIK PATRA

Edit with WPS Office

## व्याख्या- श्लोकसंख्या- ९

**अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत् ।**

**अभियुक्तं च नान्येन नोक्तं विप्रकृतिं नयेत् ।।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिराजेन याज्ञवल्क्येण विरचितस्य याज्ञवल्क्यसंहितेति स्मृतिशास्त्रस्य व्यवहाराध्याय इति द्वितीयाध्यायस्य असाधारणव्यवहारमातृकाप्रकरणात् उद्धृतः ।

**प्रसङ्गः**- व्यवहारस्य विशेषविधिवर्णनामुखेन श्लोकोऽयम् उद्धृतः याज्ञवल्क्याचार्येण ।

**व्याख्या**- स्मृत्याचारविरुद्धेन मार्गेन लाञ्छितः व्यक्तिः सुविचारार्थं न्यायालये आवेदयति ।अर्थिना आनीतस्य अभियोगस्य निष्पत्तिः प्राथम्येण कार्या । पूर्वाभियोगस्य निष्पत्तिपर्यन्तं अभियुक्तः प्रत्यथी अर्थिनं प्रत्यभियुक्तं कर्तुं न समर्थः । अर्थिना आनीतात् अभियोगात् प्रत्यर्थी आत्मानं प्रथमं मोचयेत् । अर्थात् भियोगस्य निष्पत्तिपर्यन्तं प्रत्यभियोगः प्रतिषिद्धः । तथाच अभियुक्तः व्यक्तिः न अन्येन व्यक्तिना नूतनाभियोगेन पुनरभियुक्तः स्यात् ।

एवञ्च अभियोगस्य प्रतिष्ठार्थं अर्थी भाषापादे यत् यत् अवदत् उत्तरपादेऽपि तथैव लिखयेत् । भाषापादे विवृतस्य वचनस्य अन्यथा परिवर्तनं वा उत्तरपादे न कार्यम् । एतदेव स्पष्टीकृतं नारदेन-

**पूर्वपादं परित्यज्य योऽन्यमालम्बते पुनः ।**

**पदान्तरसंक्रमणाद् हीनवादी स वै नरः ।**

एकस्मिन्नेव विषये वस्त्वन्तरम् अनुचितम् । यथा ' रूपकशतं वृद्ध्या गृहीत्वा अयं न प्रयच्छति ' इत्यभिधाय आवेदनसमये पुनः भाषाकाले ' रूपकशतं वलादपहृतवान् ' इति वचनपरिवर्तनम् अनुचितम् । सुविचारार्थं हि अयमुपदेशः।

---------

KOUSIK PATRA

Edit with WPS Office

## व्याख्या- श्लोकसंख्या- १०

**कुर्यात् प्रत्यभियोगं च कलहे साहसेषु च ।**

**उभयोः प्रतिभाह्यः समर्थः कार्यनिर्णये ।।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिराजेन याज्ञवल्क्येण विरचितस्य याज्ञवल्क्यसंहितेति स्मृतिशास्त्रस्य व्यवहाराध्याय इति द्वितीयाध्यायस्य असाधारणव्यवहारमातृकाप्रकरणात् उद्धृतः ।

**प्रसङ्गः**- व्यवहारस्य विशेषविधिवर्णनामुखेन श्लोकोऽयम् उद्धृतः याज्ञवल्क्याचार्येण ।

**व्याख्या**- "अभियोगमणिस्तीर्य" इत्यनेन पूर्वश्लोकस्य अपवादमुखेन अयं वक्ष्यमानः श्लोकः उक्तः । साधारणव्यवहारेषु अभियोगस्य निष्पत्तिपर्यन्तं प्रत्यभियोगः निषिद्धः । किन्तु एतन्नियमस्य व्यतिक्रमः वर्तते स्थलविशेषेषु । कलहे साहसेषु च प्रत्यभियोगः स्वीकृतः । प्रत्यर्थिनः विरुद्ध अर्थिना आनीतस्य अभियोगस्य निष्पत्तेः पूर्वं यदि प्रत्यथी अर्थिना वाक्कलहेण दण्डास्त्रादिना वा आक्रान्तः भवेत् तर्हि स प्रत्यथी आत्मरक्षार्थं प्रत्यभियोगे समर्थः । तस्य आवेदनमपि ग्राह्यं भवेत् । अस्मिन् विषये नारदाचार्येण उक्तम् -

**पूर्वमाक्षारयेद् यस्तु नियतं स्यात् स दोषभाक् ।**

**पश्चाद् यः सोऽप्यसत्कारी पूर्वे तु विनयो गुरुः।**

**पारुष्ये साहसे वापि युगपद संप्रवृत्तयोः ।**

**विशेषश्चेन् न लभ्येत विनयः स्यात् समस्तयोः ।**

अस्मिन् कलहसाहसविषये अर्थिप्रत्यर्थिनोः उभययोः कृते प्रतिभूः ग्राह्यः । प्रतिभूः यत्र अप्राप्तः तत्र राज्ञा अर्थिप्रत्यर्थिनोः रक्षणे सवेतनाः पुरुषाः नियोक्तव्याः ।

---------

Edit with WPS Office

## व्याख्या- श्लोकसंख्या- ११

**निह्नवे भावितो दद्यात् धनं राज्ञे च तत् समम् ।**

**मिथ्याभियोगी द्विगुणमभियोगात् धनं हरेत् ।।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिराजेन याज्ञवल्क्येण विरचितस्य याज्ञवल्क्यसंहितेति स्मृतिशास्त्रस्य व्यवहाराध्याय इति द्वितीयाध्यायस्य असाधारणव्यवहारमातृकाप्रकरणात् उद्धृतः ।

**प्रसङ्गः**- व्यवहारस्य विशेषविधिवर्णनामुखेन श्लोकोऽयम् उद्धृतः याज्ञवल्क्याचार्येण ।

**व्याख्या**- विचारालयः न्यायालयः । विचारालये छलं परिहृत्य न्यायं प्रतिस्थाप्यते । सत्यभाषणं सत्यं तथ्यप्रदानं अर्थिप्रत्यर्थिनोः उभययोः कृते आवश्यकम् । अर्थिनः आनीतः अभियोगः यदि साक्ष्यप्रमाणयोगेन निर्णयः भबति तर्हि प्रत्यथी दण्डनीयः भवति । तेन प्रत्यर्थिना तदा विवादास्पदीभूतधनस्य द्विगुणं धनं राज्ञे अर्थिने च प्रदेयम् । एवञ्च अर्थी यदि साक्ष्यप्रमाणेन आनीतम् अभियोगं भावयितुम् असमर्थः भवेत् तर्हि स अथी दण्डनीयः स्यात् । तदा तस्यापि द्विगुणं अर्थदण्डं भवेत् राज्ञे प्रत्यर्थिने च । निह्नवः सत्यस्य अपलापः दण्डनीयः अपराधः । न्यायालये छलं सर्वथा परिहर्तव्यम् ।

---------

KOUSIK PATRA

Edit with WPS Office

## व्याख्या- श्लोकसंख्या- १७

**साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः ।**

**पूर्वे पक्षेऽधरीभूते भवन्त्युत्तरवादिनः ।।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिराजेन याज्ञवल्क्येण विरचितस्य याज्ञवल्क्यसंहितेति स्मृतिशास्त्रस्य व्यवहाराध्याय इति द्वितीयाध्यायस्य असाधारणव्यवहारमातृकाप्रकरणात् उद्धृतः ।

**प्रसङ्गः**- व्यवहारस्य विशेषविधिवर्णनामुखेन श्लोकोऽयम् उद्धृतः याज्ञवल्क्याचार्येण ।

**व्याख्या**- एकस्मिन्नेव विषये अर्थिप्रत्यर्थिनौ द्वावपि यत्र युगपद्धर्माधिकरणं प्राप्तौ भाषावादिनौ भवेतां तदा किं करणीयम् - इत्येवम् आलोचितम् अस्मिन् श्लोके । प्रतिग्रहेण क्षेत्रं प्राप्य कश्चित् सामाजिकः कञ्चित् कालमुपभुज्य सकुटुम्बः देशान्तरं गतः । ततः अन्योऽपि सामाजिकः तदेव क्षेत्रं प्रतिग्रहेण लव्धा कञ्चित् कालमुपभुज्य देशान्तरं गतः । द्वौ सामाजिकौ युगपत् स्वभूमिमागत्य क्षेत्रलाभाय परस्परं विवादमानौ धर्माधिकरणं प्राप्तौ तत्र कस्य क्रिया स्यात् ? उच्यते - उभयोरपि वादिनोः पक्षयोः साक्षिषु सत्सु 'पूर्वस्मिन् काले मया प्रतिगृहीतम् उपभुक्तञ्च' इत्येवं यः वदति स पूर्ववादी । तस्य पूर्ववादिनः साक्षी प्रथमं प्रष्टव्यः । तथ्यानुसन्धानकाले पूर्ववादिनः साक्षी पराजिते सति उत्तरवादिनः साक्षी प्रष्टव्यः । यथाह च नारदः-

**मिथ्या क्रिया पूर्वपादे कारणे प्रतिवादिनि ।**

**प्राङ्न्यायविधिसिद्धौ तु जयपत्रं क्रिया भवेत् ।।**

इत्थं विचारे विजयिनः सामाजिकस्य क्रिया प्रारब्धा स्यात् । सर्वथा छलं निरस्य राजा व्यवहारं पश्येत् ।

---------

KOUSIK PATRA

Edit with WPS Office

## व्याख्या- श्लोकसंख्या- २०

**निह्नते लिखितं नैकमेकदेशे विभावितः ।**

**दाप्यः सर्वं नृपेणार्थं न ग्राह्य स्त्वनिवेदितः।।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिराजेन याज्ञवल्क्येण विरचितस्य याज्ञवल्क्यसंहितेति स्मृतिशास्त्रस्य व्यवहाराध्याय इति द्वितीयाध्यायस्य असाधारणव्यवहारमातृकाप्रकरणात् उद्धृतः ।

**प्रसङ्गः**- व्यवहारस्य विशेषविधिवर्णनामुखेन श्लोकोऽयम् उद्धृतः याज्ञवल्क्याचार्येण ।

**व्याख्या**- छलं सर्वथा निरस्य राजा विचारे सत्यं प्रतिष्ठापयेत् । अर्थिनः आवेदनानुसारं राजा प्राविवाकः वा प्रत्यर्थिनं न्यायालये समाह्वयेत् । प्रत्यर्थिनः न्यायालये तस्य अभियोगं लिखयेत् । भाषाकाले अर्थिनः आनीते अभियोगे प्रत्यर्थी यदि अस्वीकृतः भवेत् परं साक्ष्यादिभिः एकांशेऽपि प्रमाणिते अभियोगे प्रत्यर्थी दण्डनीयः भवेत् । प्रत्यथी तदा विवादास्पदीभूतधनस्य सर्वं प्रदाने वाध्यः भवेत् - प्रत्यर्थिनः मिथ्यवादित्वनिश्चयात् । उक्तं च कात्यायनेन-

**साध्यार्थांशेऽपि गदिते साक्षिभिः सकलं भवेत् ।**

**स्त्रीसङ्गे साहसे चौर्ये यत् साध्यं परिकीर्तितम् ।**

श्लोकस्य द्वितीयांशानुसारं पूर्व भाषाकाले अनिवेदितः विषयः पश्चात् 'मया विस्मृतः' इति निवेद्यमानः विषयः नृपेण न ग्राह्यः । भाषापादात् विचारप्रक्रिया सूच्यते । आरब्धात् समाप्तिपर्यन्तं विचारप्रक्रियायां परिवर्तनम् असमीचीनम् । निष्पत्तिपर्यन्तं विचारधारा अपरिवर्तनीया स्यात् ।

---------

KOUSIK PATRA

Edit with WPS Office

## व्याख्या- श्लोकसंख्या- २१

**स्मृत्योर्विरोधे न्यायस्तु वलवान् व्यवहारतः ।**

**अर्थशास्त्रात्तु बलवद् धर्मशास्त्रमिति स्थितिः ।।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिराजेन याज्ञवल्क्येण विरचितायाः याज्ञवल्क्यसंहितायाः व्यवहाराध्यायस्य असाधारणव्यवहारमातृप्रकरणात् उत्कलितः।

**प्रसङ्गः**- सिद्धान्तग्रहणे शास्त्रद्वयोः पारस्परिकविरोधे करणीयमत्र उपदिष्टम् ।

**व्याख्या-** महाभारतकारेण वेदव्यासेन यथार्थतः उक्तम् - ' वेदा विभिन्ना स्मृतयो विभिन्नाः नैष मुनिर्यस्य मतं न भिन्नम् ' । वस्तुतः स्मृतिशास्त्रानि बहुविधानि । देशाचारवशात् स्मार्तपण्डितेषु एकस्मिन्नेव विषये विरोधः दृश्यते । इत्थं स्मृत्योः परस्परयोः विरोधे उत्सर्गापवादलक्षणो न्यायः वलवत् भवति । अर्थात् बृद्धव्यवहारात् अन्वयव्यतिरेकर न्यायं प्रतिष्ठितं भवति ।

एवञ्च धर्मशास्त्रार्थशास्त्रयो परस्परविरोधे अर्थशास्त्रात् धर्मशास्त्रं वलवद् भवति । यद्यपि समानकर्तृकतया धर्मार्थशास्त्रयोः विशषः नास्ति , किन्तु प्रमेयस्य धर्मशास्त्रस्य प्राधान्यात् अर्थशास्त्रस्य बलवत् भवति । दृष्टान्तमुखेन मनुवचनमुद्धृत्य मिताक्षरायां उक्तम् - आततायी अपि ब्राह्मणः अवध्यः इति धर्मशास्त्रोपदेशः । अर्थशास्त्रस्य विधानं यत् आततायी वेदज्ञः ब्राह्मणोऽपि वध्यः । अस्मिन् वितर्के अवश्यमेव धर्मशास्त्रं वलवत् भवति ।

---------

KOUSIK PATRA

Edit with WPS Office

## व्याख्या- श्लोकसंख्या- २३

**सर्वेष्वर्थविवादेषु बलवत्युत्तरा क्रिया ।**

**आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ।।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिराजेन याज्ञवल्क्येण विरचितायाः याज्ञवल्क्यसंहितायाः व्यवहाराध्यायस्य असाधारणव्यवहारमातृकाप्रकरणात् उत्कलितः ।

**प्रसङ्गः**- उभयत्र प्रमाणसद्भावेऽपि प्रमाणगतबलाबलविवेके च असति, पूर्वापरयोः कार्ययोः बलवत्तताप्रतिपादनावसरे श्लोकोऽयम् उद्धृतः ।

**व्याख्या-** ऋणादिषु अर्थसंक्रान्तविवादेषु उत्तरा क्रिया परवती कार्यं वलवद् भवति । उत्तरकार्यसाधिते तद्वादी विजयी भवति । पूर्वकार्ये सिद्धेऽपि तद्वादी पराजीयते । तद् यथा - कश्चित् ग्रहणेन धारणं साधयति , कश्चित् प्रतिदानेन अवधारणं साधयति । तत्र ग्रहणप्रतिदानयोः प्रमाणसिद्धयो प्रतिदानं वलवत् भवति । ततः प्रतिदानवादी जयी भवति । तथा पूर्वं द्विकं शतं गृहीत्वा कालान्तरे त्रिकं शतम् अङ्गीकृतवान् तत्र उभयतः प्रमाणसद्भावेऽपि त्रिकशतग्रहणं वलवत् भवति । किन्तु आधि - प्रतिग्रहे - क्रीते च पूर्वा क्रिया बलवती भवति । यथा एकमेव क्षेत्रं अन्यस्य बन्धकं कृत्वा किमपि अर्थादिकं गृहीत्वा पुनः अन्यस्यापि प्राधाय किमपि गृह्णानि तत्र पूर्वक्रिया बलवती भवति न तु उत्तरक्रिया ।

---------

KOUSIK PATRA

Edit with WPS Office

## व्याख्या- श्लोकसंख्या- २७

**आगमोऽभ्यधिको भोगाद् विना पूर्वक्रमागतात् ।**

**आगमेऽपि वलं नैव भुक्तिः स्तोकापि यत्र नो ।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिराजेन याज्ञवल्क्येण विरचितायाः याज्ञवल्क्यसंहितायाः व्यवहाराध्यायस्य असाधारणव्यवहारमातृकाप्रकरणात् उत्कलितः ।

**प्रसङ्गः**- श्लोकेऽस्मिन् स्वत्वाव्यभिचारत्वेन भोगस्य स्वत्वे प्रामाण्यम् उक्तम् ।

**व्याख्या-** दानक्रयादिना प्राप्ता सम्पत्तिः आगमः । आगमः स्वत्वप्रमाणम्।आगमप्रमाणेन भोगाधिकारः प्रतिष्ठितः भवति । उक्तञ्च नारदाचार्येण-

**आगमेन विशुद्धेन भोगः याति प्रमाणताम् ।**

**अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छति ।।**

न च भोगमात्रात् स्वत्वागमः भवति । परकीयस्यापि अपहरादिना उपभोगः सम्भवति । छलेन चौर्येण च द्रव्यभोगः सम्भवति । अथ प्रमाणार्थं आगमः प्रयोजनीयः । किन्तु आगमेन प्राप्त्यां सम्पत्तौ यदि भोगः न वर्तते अर्थात् सम्पत्तिः यदि भोगहीनात् परित्यक्ता भवति तर्हि स्वत्वं दुर्वलं भवति । अथ यथायथं प्रामाण्यार्थं आगमप्राप्त्यां सम्पत्तौ भोगस्य आवश्यकता विद्यते । यथोक्तं च हारीतेन-

**यद् विनागमम् अत्यन्तं भुक्तं पूर्वैस्त्रिभिर्भवेत् ।**

**मकान तच्छक्यमपाहर्तुं क्रमात् त्रिपुरुषागतम् ।।**

---------

KOUSIK PATRA

Edit with WPS Office

## व्याख्या- श्लोकसंख्या- ४५

**अविभक्तैः कुटुम्बार्थे यद् ऋणं कृतं भवेत् ।**

**दद्युस्तद् रिक्थिनः प्रेते प्रोषिते वा कुटुम्बिनि ।।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिराजेन याज्ञवल्क्येण विरचितायाः याज्ञवल्क्यसंहितायाः व्यवहाराध्यायस्य ऋणादानप्रकरणात् उत्कलितः ।

**प्रसङ्गः**- श्लोकेऽस्मिन् ऋणपरिशोधविधिविशेषः पर्यालोचितः ।

**व्याख्या-** कुटुम्बानां परिजनानां भरणपोषणं परिवारप्रधानस्य कर्तव्यम् । अविभक्ते परिवारे आत्मीयपरिजनानां पोषणार्थं गृहकर्ता ऋणग्रहणे समर्थः । गृहीतस्य ऋणस्य परिशोधः अधमर्णस्य कर्तव्यः । जीवद्दशायां गृहकर्तुः गृहीतम् ऋणं यदि सर्वं न परिशोध्यते तर्हि किं भवेत् ? उच्यते - रिक्थिनः पितुः देहान्तरात् पितृकृतम् ऋणं परिशोधं कुर्वन्ति । यतः ऋणं पितुः विलासवासनाचरितार्थस्य कृते न गृहीतम् , परिवारस्य सदस्यानां जीवनधारणार्थं गृहीतम् । अथ गृहीतस्य ऋणस्य परिशोधे पिता केवलं न दायभागी , उपार्जनक्षमाः परिवारिकसदस्याः अपि समं दायभागिनः । अथ पितुः मृतौ देशन्तरगमने वा सम्पत्तिभोगिनः सर्वे ऋणपरिशोधे दायवद्धाः । किन्तु परिवारपोषणार्थमन्तरेण विलासव्यसनचरितार्थस्य कृते गृहीतम् ऋणं रिथिनैः न परिशोधयोग्यम् । अथ याज्ञवल्क्येण स्वयमुक्तः-

**न योषित् पतिपुत्राभ्यां न पुत्रेण कृतं पिता ।**

**दद्यात् ऋते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा ।।**

---------

KOUSIK PATRA

Edit with WPS Office

### व्याख्या- श्लोकसंख्या- ५०

**पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा ।**

**पुत्रपौत्रैः ऋणं देयं निह्नवे साक्षिभावितम् ।।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिराजेन याज्ञवल्क्येण विरचितायाः याज्ञवल्क्यसंहितायाः व्यवहाराध्यायस्य अन्तर्गतात् ऋणादानप्रकरणात् उत्कलितः ।

**प्रसङ्गः**- श्लोकेऽस्मिन् ऋणपरिशोधविधिविशेषः पर्यालोचितः ।

**व्याख्या-** गृहीतम् ऋणम् अवश्यमेव परिशोध्यम् । यौथपरिवारे स्वजनपालनार्थं पित्रा गृहीते ऋणे रिथिनः पुत्रपौत्रादयः उत्तराधिकारिणः समं दायवद्धाः । पिता यदि दातव्यम् ऋणम् अदत्वा प्रेतः दूरदेशं गतः दुरारोग्यव्याधिग्रस्तः वा भवति पुत्रपौत्रादयः उत्तराधिकारिणः तर्हि शर्तानुसारं पितृकृतम् ऋणं दद्युः । ऋणशर्तस्य निहवे अपलापे वा अर्थिना साक्ष्यादिभिः भावितम् ऋणं पुत्रपौत्रैः देयम् । प्रेतस्य प्रोषितस्य वा एकपुत्रस्थिते स दद्यात् । बहुपुत्रेषु स्थितेषु पुत्राः विभक्ताः सन्तः स्वांशानुसारं ऋणं दद्युः । अत्र च नारदवचनमपि स्मर्तव्यम्-

**नार्वाक् संवसरात् विंशात् पितरि प्रोषिते सुतः ।**

**ऋणं दद्यात् पितृव्यो वा जेष्ठभ्रातर्यथापि वा ।।**

---------

KOUSIK PATRA

Edit with WPS Office

## व्याख्या- श्लोकसंख्या- ५३

**दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते ।**

**आद्यौ तु वितथे दाप्यावितरस्य सुता अपि ।।**

**उत्सः**- आलोच्यः श्लोकोऽयं योगिवरेण याज्ञवल्क्येण विरचितायाः याज्ञवल्क्यसंहितायाः व्यवहाराध्यायस्य अन्तर्गतात् ऋणादानप्रकरणात् उत्कलितः ।

**प्रसङ्गः**- श्लोकेऽस्मिन् प्रातिभाव्यं तत्त्वं उपस्थापितम् ।

**व्याख्या-** प्रतिभुवः भावं प्रातिभाव्यम् । प्रातिभाव्यं नाम विश्वासार्थं पुरुषान्तरेण सह समयः । प्रतिभाव्यं विषयभेदात् त्रिविधम् – ' दर्शने ' - ' दर्शनापेक्षयाम् अभियुक्तं दर्शयिष्यामि ' इति । ' प्रत्यये ' - ' विश्वासे मम प्रत्ययेन अस्य धनं प्रयच्छ - नायं त्वां वञ्चयिष्यते ' इति । ' दाने ' –'यदि अयं न ददाति तदानीम् अहमेव दास्यामि ' इति – त्रिविधेषु क्षेत्रेषु प्रातिभाव्यं विहितम् ।

वितथे अन्यथाभावे दर्शनप्रतिभूः प्रत्ययप्रतिभूश्च राज्ञा उत्तमर्णाय प्रतिश्रुतं धनं दाप्यौ । दर्शनप्रतिभूवः प्रत्ययप्रतिभुवश्च प्रतिश्रुतिपूरणे व्यर्थतायां राज्ञा तौ दण्डनीयौ भवतः । किन्तु दानप्रतिभूः अवश्यमेवं प्रतिश्रुतं धनं उत्तमर्णाय दद्यात् । दानप्रतिभूवः अवर्तमाने तस्य सुताः अपि राज्ञा दाप्याः ।

---------

KOUSIK PATRA

# SALTORA NETAJI CENTENARY COLLEGE

*(Affiliated to Bankura University)*

Saltora, 722158, Dist.- Bankura, West Bengal

## Model Questions and Answers

Semester-VI

Subject: B.A. SANSKRIT (Honours)

Course Code: AHSNS602C-14

Course Title: Sanskrit and World Literature

KOUSIK PATRA

Prepared by

Kousik Patra

Assistant Professor

Department of Sanskrit

Saltora Netaji Centenary College

E-mail ID : patrakousikjrf@gmail.com

Mobile No : 7872177720

टीका **: उइलियामजोन्स**

**आविर्भावः** - १७४६ ईशवीयाब्दे २८ सेप्टेम्बर इति मासाङ्के इंलण्डप्रदेशस्य लण्डननगर्याम् उइलियाममहोदयः अजायत।

**मातापितरौ** - तस्य पिता उइलियमजोन्समहोदयः (१६७५-१७४९) आसीत् प्रख्यातः गणितविदः। जोन्समहोदयस्य त्रिवर्षवयसि एव तस्य पिता अम्रियत। तदा मात्रा मेपिनिक्समहोदयया जोन्समहोदयस्य पालितम् अभवत्।

**शिक्षालाभः** - १७६८ ईशवीयाव्दे अक्सफोर्डविश्वविद्यालयस्य महाविद्यालय स्नातकः अभवत्।

**भाषागतदक्षता** - जोन्समहाशयः अल्पवयसि एव स ग्रिक-ल्यातिन-फार्सि-आरवि-चीना-इत्यादिषु भाषासु निपुणरासीत्।चतुर्विंशति एव वयसि स भाषाविद्रूपेण प्रख्यातः अभवत्।

**सदस्यः** - १७७२ ईशवीयाव्दे ३० मे जोन्समहोदयः रय्यालसोसाइटि इत्यस्य सदस्यरूपेण निर्वाचितम् अभवत्।

**भारतवर्षागमनम्** - १७८३ ईशवीयाब्दे २५ सेप्टेम्बर इति मासाङ्के सः भारते आगतवान्।

**विविधकर्माणि** - १७८४ ईशवीयाब्दे १५ जानुयारी इति मासाङ्के तेन कलिकातायां **'एशियाटिक सोसाइटि'** इति प्रतिष्ठितम् । नदीयाहिन्दुविश्वविद्यालयस्य पण्डितरामलोचनमहाशयात् जोन्समहोदयः वेदादिशास्त्रेषु ज्ञानं अलभत।

परवर्तीषु दशवर्षेषु जोन्समहोदयः शिक्षाव्यवस्थायाः कृते विभिन्नानि सामाजिककर्माणि अकरोत्।

**उपाधिः** - स **'अक्सफोर्डजोन्स'** इति नाम्नापि परिचितासीत्।

**ग्रन्थरचना** - डेनमार्कप्रदेशस्य राज्ञः सप्तमख्रिष्टानस्य अनुरोधेन १७७० ईशवीयाब्दे "Historie de Nader Chah" इति अनुवादमूलकं ग्रन्थमेकं - लिखितं जोन्समहोदयेन।

एतान् विना तेन वहूनां भारतीयसाहित्यानां आङ्गलभाषायां अनुवादः कृतः। तस्य संस्कृतविषयकाः ग्रन्थसमूहाः - (१) अभिज्ञानशकुन्तलम् इति नाटकस्य आङ्गलभाषायाम् अनुवादः (२) A Grammar if the persion Language इत्यादि ।

**विशेषकृतित्वम्** - भारोपीयभाषया सह भाषान्तरानां सादृश्यं तेनैव हि आदौ लक्षितम्।

**जीवनावसानम्** - १७९४ ईशवीयाब्दे २७ एप्रिल इति मासाङ्के अस्य महापुरुषस्य जीवनावसानम् अभवत्।

**उपसंहारः** - तेन प्रतिष्ठितम् 'एशियाटिकेसोसाइटि' अद्यापि साहित्यचर्चाविषये मध्यमणिरिव

KOUSIK PATRA

विराजमानः।

----------

टीका : **<u>चार्लस-उइलकिन्स</u>**

**आविर्भावः** - चार्लस-उइलकिन्समहोदयः १७४९ ईशवीयाब्दे इंल्याण्डप्रदेशान्तर्गते सामारसेटनगर्याम् अजायत।

**सदस्यः** - १७८८ ईशवीयाब्दे उइलकिन्समहोदयः 'रय्यालसोसाइटि' इत्यस्य सदस्यरूपेण निर्वाचितम् अभवत्।

**उपाधिः** - सः '**भारतवर्षस्य क्याक्सटन'** इति नाम्नापि परिचितासीत्।

**भारतवर्षागमनम्** - १७७० ईशवीयाब्दे उइलकिन्समहोदयः भारतवर्षम् आगच्छत्।

**भाषागतदक्षता** - विभिन्नेषु भाषासु निपुणतया स अल्पयासेन शीघ्रमेव च वङ्गभाषां अधिगतं अकरोत्। ततः स वङ्गभाषायाः मुद्रणकार्ये प्रवृत्त अभवत्। भाषायां 'टाइपस' इति पुस्तकं प्रकाशार्थं तेन 'भारतस्य क्याक्सटन' इति उपाधिः लव्धः। उइलकिन्समहोदयः वाराणस्यां पण्डितकालीनाथात् संस्कृताध्ययनं कृतवान्। अस्मिन् समये स महाभारतस्य अनुवादकार्यं प्रारम्भेत्।

**विशेषकर्म** - १७८४ ईशवीयाब्दे उइलकिन्समहोदयः 'एशियाटिक सोसाइटि' इत्यस्य प्रतिष्ठाकर्मणि आत्मनियोगम् अकरोत्।

**ग्रन्थरचना** - स आसीत् आङ्गललेखकः प्राच्यविदः च। सैव हि आदौ श्रीमद्भागवद्गीतायाः आङ्गलभाषायाम् अनुवादम् अकरोत्। १७८५ ईशवीयाब्दे तस्य आङ्गलभाषायां 'श्रीमद्भगवद्गीता' प्रकाशिता। अस्मै पुस्तकाय स सर्वाधिकं कृतित्त्वार्जनं अकरोत्। तेन अनुदिता गीता अञ्जसा फरासिभाषायां जार्मानभाषायां च अपि अनुदिता।

**स्वदेशप्रत्यागमनम्** - ओयारेणहेस्टिंसमहोदयः आसीत् भारतवर्षे उइलकिन्समहोदयस्य प्रधानः पृष्ठपोषकः। किन्तु हेस्टिंसमहोदयस्य प्रस्थानात् स असहायः अभवत्। १७८६ ईशवीयाब्दे स इंल्यण्डप्रदेशं प्रत्यागच्छत्। तत्र च गत्वा सः देवनागरीलिपेः इति निर्मितवान्। १८०८ साले तस्य पुस्तकमिदं प्रकाशितम्।

**विशेषसम्मानम्**- १८३३ ईशवीयाब्दे उइकिन्समहोदयः राजा-चतुर्थ-जर्जमहोदयेन इति सम्माने सम्मानितं अभवत्।

**महाप्रयानम्** - १८३६ ईशवीयाब्दे १३ मे मासाङ्के षडशीतिवर्षे अस्य महापुरुषस्य महाप्रयानम् अभवत्।

KOUSIK PATRA

----------

टीका : **<u>एइच्. एइच्. उइलसन</u>**

**आविर्भावः** - १७८६ ईशवीयाब्दे २६ सेप्टेम्बर इति मासाङ्के उइलसनमहोदयः इंल्यण्डप्रदेशे अजायत।

**ज्ञानलाभः** - सेन्टथमासचिकित्सालये स चिकित्साविषये ज्ञानं लव्धवान्।

**भारतवर्षागमनम्** - १८८० ईशवीयाब्दे च उइलसनमहोदयः भारते आगच्छत्। प्राचीनभारतीय-भाषायां तथा साहित्ये तस्यासीत् गभीरानुरागः।

**विशेषपदम्** - १८११ ईशवीयाब्दे सः 'एशियाटिकसोसाइटि' इत्यस्य सचिवरूपेण नियुक्तम् अभवत्। १८३२ ईशवीयाब्दे अक्सफोर्डविश्वविद्यालयस्य नवनिर्मिते वोडेनसभापतिपदे निर्वाचितं अभवत् सः।

**ग्रन्थरचना** - १८१३ ईशवीयाब्दे तेन कालिदासस्य विख्यातगीतिकाव्यस्य 'मेघदूतम्' इत्यस्य आङ्गलानुवादं प्रकाशितम्। सः हि प्रथमः जनः यः ऋग्वेदस्य आङ्गलानुवादं अकरोत्।

बहुप्रचेष्टायारणन्तरं तेन आदौ संस्कृत-आङ्गल-अभिधानं विरचितं प्रकाशितं च। १८७२ ईशवीयाब्दे उइलसनमहोदयेन 'Selected speciments of the theatre of te Hindus' इति पुस्तकं प्रकाशितम्। अस्मिन् पुस्तके भारतीयनाट्यतत्त्वम् आलोचितम्। उइलसनमहोदयः विशेषतः दक्षिणभारतीयः पाण्डुलिपिसमूहान् संगृह्य संग्रहमूलकं 'Mackenzie Collection on' इति निर्मितवान्।

तेन संस्कृतविषयकाः बहुग्रन्थाः विरचिताः, तद् यथा- (१) वङ्गभागेषु विष्णुपुरानम्। (२) मेघदूतः, वार्तावाहकः मेघः वा (३) An Introduction of the Grammar of Sanskrit Language for the use of Early students (४) षट्द्भागेषु ऋग्वेदसंहिता इत्यादि।

**जीवनावसानम्** - १८६० ईशवीयाब्दे ८ मे इति मासाङ्के अस्य संस्कृतानुरागिनः महाजनस्य जीवनावसानम् अभवत्।

**उपसंहारः** - उइलसनमहोदयः आसीत् विशिष्टः प्राच्यानुरागीः संस्कृतानुरागी च। संस्कृतसाहित्ये तस्य अवदानं अनस्वीकार्य्यम्।

--------

KOUSIK PATRA

टीका : **<u>म्याक्समुलारः</u>**

**भूमिका** - पाश्चात्येषु पण्डितेषु संस्कृतसाहित्ये अविस्मरणीय नाम भवति म्याक्समुलारः।

**आविर्भावः** - १८२३ खीष्टाब्दस्य डिसेम्बरमासस्य षष्ठदिवसे स जार्माणि इति देशे अजायत।

**पितरौ** - तस्य पितरौ आस्ताम् उइलहेलम-मुलारः आदेलहेड- मुलारश्च। वाल्यात् प्रभृति स एके संस्कृतिपरिवारे स्वीयजीवनम् अतिवाहितम्।

**कर्मजीवनम्** - जार्माणिदेशे जन्म लव्धे सति तस्य शिक्षा तथा कर्मजीवनमासीत् इंलण्ड-प्रदेशः। परवर्तिनि समये तेन ब्रिटिशनागरिकत्वं गृह्यते।

अक्सफोर्ड विश्वविद्यालयस्य प्राध्यापकरूपेण स स्वकीयकर्मजीवनस्य शुभारम्भः कृतः। अस्य विश्वविद्यालयस्य दर्शनविभागस्य स अप्रतिद्वन्द्वी अध्यापकः आसीत्।

**भारतवर्षं प्रति अनुरागः** - स आसीत् ब्रिटिश-नागरिकः परन्तु तस्य हृदये आसीत् खलु भारतवर्षः। भारतवर्षस्य समाज-संस्कृति-साहित्यं तस्मै अतीव रोचते। रामकृष्णदेवस्य विवेकानन्दस्य च सूक्त्या स अनुप्रेरितः। तस्य हृदये भारतागमनस्य अभिलाष आसीत् परन्तु भारतवर्षे ब्रिटिश-कार्यकलापस्य समालोचनार्थं ब्रिटिश-सर्वकारेण नानुमतिः प्रदत्ता। तस्मात् पाश्चात्ये स्थिते हि स संस्कृताध्ययनं कृतवान्।

**ग्रन्थरचना** - शेलिं-महोदयस्य प्रेरणाया स उपनिषदामनुवादः कृतः। नारायण-शर्मा विरचितो हितोपदेशः तेन जार्मानभाषायाम् अनूद्यते। १८४२-१८७४ खीष्टाब्दः पर्यन्त स ऋग्वेदस्य संस्करणस्योपरि कार्यं कृतवान्। ऋग्वेद-देवान् स प्रकृतेः रूपं मन्यते। तस्य सम्पादितानां प्रकाशितानां वा ग्रन्थानां सूची समासेन भवति -

(१) सायणभाष्येण साकं ऋग्वेदः, (२) हितोपदेशस्य जार्मानानुवादः, (३) मेघदूतस्य जार्मानानुवादः, (४) उपनिषदाम् आङ्गलानुवादः, (५) India-what can it teach us? प्रभृतयः।

भारतवर्षस्य माहात्म्यं India-what can it teach us? इति शीर्षके ग्रन्थे तेन प्रकाश्यते।

**उपाधिः** - पाश्चात्ये संस्कृतविद्यायाः प्रसारे स आसीत् सर्वाग्रगण्यः। वैदिके वाङ्मये तस्य दक्षता अवर्णनीया आसीत्। तस्मात् भारतीयाः तं 'मोक्षमूलेर' इति वदन्ति।

**देहान्तः** - अस्य भारतप्रेमिकस्य संस्कृतप्रेमिकस्य च देहान्तः भवति १९०० खीष्टाब्दस्य अक्टोवर-मासस्य सप्तविंशति-दिवसे।

**उपसंहारः** - म्याक्समुलारः आसीत् प्रख्यातः भारतविशारदः, दार्शनिकः, समाजतत्त्वविदः, पण्डितः अनुवादकश्च।

KOUSIK PATRA

-----------

टीका : **<u>जे. जि. वुहेलारः</u>**

**भूमिका** - वुहेलारमहोदयः आसीत् प्राचीनभारतीयः भाषाविशेषज्ञः आचारविशेषज्ञश्च।

**आविर्भावः** - १८३७ ईशवीयाब्दे १९ जुलाइ इति मासाङ्के ह्यानोभारप्रदेशस्य वरोस्टलनगर्य्याम् वुहेलारमहोदयः अजायत।

**भाषागतदक्षता** - ह्यानोभारप्रदेशश्य व्याकरणविद्यालये तेन संस्कृत जेन्दआवेस्ता-फार्सि-आर्मेनियान-आरवि इत्यादि भाषाः शिक्षिताः। १८३८ ईशवीयाब्दे वुहेलारमहोदयः पूर्वभाषायां प्रत्नतत्त्वत्विषये च 'डक्टरेट' इति अलभत्। तस्य शोधपत्रमासीत् - The Suffix-tes in Greek Grammar। तस्मिन्नेव वर्षे स संस्कृतपाण्डुलिप्यधयनार्थं प्यारिसप्रदेशं गतवान्। १८५९ ईशवीयाब्दे पुनः वुहेलारमहोदयः संस्कृतपाण्डुलिपिविषये अधिकज्ञानार्जनाय लण्डननगयीम् अगच्छत्। अस्मिन् समये स अक्सफोर्डविश्वविद्यालयस्य ग्रन्थागारे वैदिकपाण्डुलिपिविषये गहनज्ञानार्जनम् अकरोत्।

**भारतवर्षागमनं विचित्र कर्म च** : १८६३ ईशवीयाब्दे १० फेब्रुयारी मासाङ्के वुहेलारमहाशयः भारतवर्षम् आगच्छत्। तत्र च एलफिनस्टोनमहाविद्यालये अध्यापनाकर्मणि च नियुक्तम् अभवत्। १८८० ईशवीयाब्दं यावत् वुहलारमहोदयः भारतवर्षे अतिष्ठत्। तस्मिन् समये तेन अनेकानि उल्लेखयोग्यपुस्तकानि संगृहितानि।

**ग्रन्थरचना** - वुहेलारमहोदयः तस्य कर्मजीवने संस्कृतविषयका वहुग्रन्थाः सम्पादिताः, तद् यथा- (१) The root of Dhatupth not found on literature (२) आङ्गलभाषायां पञ्चतन्त्रम् (३) ब्रह्मलिपेः उत्पत्तिः (४) दशकुमारचरितम्। इति गद्यकाव्यस्य आङ्गलभाषायां अनुवादः। (५) मनुकृतानां आचाराणाम् आङ्गलभाषाया अनुवादः इत्यादि।

**महाप्रयानम्** - १८९८ ईशवीयाब्दे ८ एप्रिल इति मासाङ्के रहस्यमयभावेन अस्य संस्कृतानुरागिनः महामानवस्य महाप्रयानम् अभवत्।

**----------**

**टीका : <u>ए. जि. म्याक्डोनाल</u>**

**आविर्भावः** - म्याक्डोनालमहोदयः १८५४ ईशवीयाब्दे ११ मे इति मासाङ्के भारतवर्षस्य मुजाफफरनगर्या अजायत।

**पितृपरिचयः** - तस्य पितासीत् आलेकजाण्डारम्याक्डोनालः।

**शिक्षाजीवनम्** - १८७६ ईशवीयाब्दे म्याक्डोनालमहोदयः Corpus Christi महाविद्यालये

प्राथमिकशिक्षा अगृह्णत्, जार्मानी-चीना-संस्कृत इत्यादि तिसृषु भाषासु वृत्तिं च अलभत्। १८८० ईशवीयाब्दे सः स्नातकः अभवत्।

**कर्मजीवनम्** - सः जार्मानप्रदेशान्तर्गते टेलरियानमहाविद्यालये शिक्षकरूपेण नियुक्तं अभवत्। १८८३ ईशवीयाब्दे म्याक्डोनाबमहोदयः लिपजिगविश्वविद्यालयात् इति उपाधिं अलभत्। १८८८ ईशवीयाब्दे स अक्सफोर्डविश्वविद्यालये संस्कृतविषयस्य उपपरिदर्शकरूपेण नियुक्तम् अभवत्।

**सम्पादिताः ग्रन्थाः** - म्याक्डोनालमहोदयेन संस्कृतविषयकाः वहुग्रन्थाः सम्पादिताः तद् यथा-

1. A History of Sanskrit Literature (2004)
2. A History of Vedic Mythology (2004)
3. A Sanskrit Grammar for Students.
4. A Vedic Reader for Students. (1917)
5. A Vedic Grammar for Students. (1916)

**महाप्रयानम्** - १९३० ईशवीयाब्दे २८ डिसेम्वर इति मासाङ्के अस्य महापुरुषस्य महाप्रयानम् अभवत्।

**उपसंहारः** - संस्कृतविषये म्याक्डोनालमहोदयस्य अनुरागः सत्यमेव प्रशंसनीयः युक्तिसहकारेण तेन वेदादिशास्त्रानां, रामायणादिलौकिकशास्त्रानां रचनाकालं निर्णीतम्।

---------

**टीका : आलवार्ट-फ्रेडरिक-ओयेवारः**

**आविर्भावः** - प्रख्यातः जार्मानपण्डितः ओयेवारः १८२५ खीष्टाब्दस्य फेब्रुयारीमासस्य सप्तदशदिवसे जार्मानिदेशस्य ब्रेस्लाउ इति प्रदेशे अजायत।

**अध्ययनम्** - वार्लिननगर्यां स अध्ययनं कृतवान्। साहित्यं संस्कृतं प्रति तस्य अनुरागः आसीत् आवाल्यात्। संस्कृतविषयं नीत्वा स अतीव अध्ययनं गवेषणाकार्यञ्च कृतवान्।

**कर्मजीवनम्** - गवेषणाकार्यं समाप्य तेन इंलण्ड-फ्रान्स इति प्रदेशः गम्यते। तस्मात् प्रदेशात् जार्मानिनगर्यां प्रत्यागम्य स वार्लिन-विश्वविद्यालयस्य प्राध्यापकपदम् अलंकृतवान्।

ओयेवार आसीत् म्याक्समुलारस्य परमं मित्रम्। वौद्धधर्मस्य सामाजिकदर्शनानि तमाकर्षयति।

**ग्रन्थरचना** - संस्कृतसाहित्यं प्रति तस्य अनुरागः सर्वजनविदितः। वैदिकसाहित्यस्य कृते स स्वीयजीवनमुत्सर्गीकृतवान्। बहवः ग्रन्थाः तेन सम्पाद्यन्ते विरच्यन्ते च। तस्य ग्रन्थानां सूची निम्नोक्तप्रकारेण भवति-

(१) कृष्णयजुर्वेदस्य मैत्रायिनी संहितायाः सम्पादनम्।

KOUSIK PATRA

(२) महीधरभाष्येण साकं शुक्लयजुर्वेदान्तर्गतस्य वाजसनेयीसंहितायाः प्रकाशनम्।
(३) भाष्यसहकारेण शतपथब्राह्मणम्।
(४) बृहदारण्यकः।
(५) कात्यायनकृतस्य श्रौतसूत्रस्य सम्पादनम्।
(६) मालविकाग्निमित्रस्य जार्मानानुवादः।
(७) The History of Indian literature, प्रभृतयः।

**अमरलोकगमनम्** - १९०१ खीष्टाब्दस्य नभेम्बरमासस्य ३० दिवसे स अमरलोकं प्राप्तवान्।

**उपसंहारः** - अतः वक्तुं शक्यते यत्, पाश्चात्य-पण्डितेषु ओयेवार महोदयः सर्वाग्रगण्य आसीत्। संस्कृतभाषायाः सर्वासु शाखासु तस्य पाण्डित्यं, समुलभ्यते। तस्य सम्पादितेन ग्रन्थावलोकनेन इदम् अनुमीयते यत् वैदिकसाहित्यं प्रति तस्य अत्यासक्तिः आसीत्। तस्य वर्णमये कर्मजीवने तेन वहुनि शोधपत्रान्यपि सम्पादितानि। अतः दृश्यते तस्य जीवनं संस्कृतरागेन रञ्जितमासीत्।

----------

टीका : **स्वामी विवेकानन्दः**

**आविर्भावः** - रत्नप्रसविन्याः अस्माकं वङ्गजनन्याः क्रोडालोकितं कृत्वा १८६३ ईशवीयाब्दे १२ जानुयारी इति मासाङ्के स्वामीविवेकानन्दमहोदयः उत्तरकलिकातायां दत्तवंशे अजायत।

**पितरौ -** तस्य पितरौ खलु भुवनेश्वरी-विश्वनाथौ।

**वाल्यनाम** - तस्य वाल्यनामासीत् नरेन्द्रनाथः विले वेति।

**विशिष्टावदानम्** - श्रीरमाकृष्णदेवेन संस्पर्शेन तस्य जीवनस्य अभूतपूर्व परिवर्तनं साधितम् अभवत्। १८८६ ईशवीयाब्दे श्रीरामकृष्णदेवस्य मरणात् परं गुरुभ्रातृभिः सह मिलित्वा 'श्रीरामकृष्णसेवासंघ' प्रतिष्ठाव्रतं तेनैव हि गृहीतम्। स आसीत् उनविंशशतकस्य धर्मनेता, कर्मयोगी, गैरिकवसनधारी, विराव्यक्तित्वाधिकारी, अज्ञानतायाः विरुद्धे संग्रामीसैनिकश्च। तेनोच्यते- "Yes, The more everything seems to me to lie in manliness."

विवेकानन्दस्य लेखनी न केवलं साहित्यसाधनाय, अपि तु तामसिकताविनाशाय पौरुषत्वोत्थाय च। तेनैव हि शिक्षा प्राचीनरूपं परित्यज्य नवरूपेण सज्जिता। तेनोक्तम्- "Education is the manifestation of perfection already in man". संस्कृतक्षेत्रे स्वामीविवेकानन्दस्य अवदानं चतुर्भागेन विभक्तम्। यथा - हिन्दुत्वक्षेत्रे, अद्वैतवेदान्तक्षेत्रे, रामकृष्णमिलनमाध्यमे, स्वरचितस्रोत्रमाध्यमे।

**ग्रन्थरचना** - स्वामीविवेकानन्देन स्वरचितस्तोत्रमाध्यमे स्तोत्रसप्तं विरचितम्। (क) शिवस्तोत्रम्

KOUSIK PATRA

(षट्श्लोकाः), (ख) अम्बास्तोत्रम् (सप्तश्लोकाः)। (ग) श्रीरामकृष्णप्रणामः (एकश्लोकः)। (घ) प्रथम श्रीरामकृष्णस्तोत्रम् (चतुश्लोकाः)। (ङ) द्वितीय श्रीरमाकृष्णस्तोत्रम् (चतुश्लोकाः)। (च) तृतीय श्रीरामकृष्णस्तोत्रम् (एकश्लोकः)। (छ) श्रीरामकृष्ण प्रशस्ति (त्रयश्लोकाः)।

एभिः षडविंशतिश्लोकैः तेन संस्कृतवाङ्गयस्य वहवअव्यक्तभावाः व्यक्ताः। 'जीवसेवा हि ईश्वरसेवा'। 'उत्तिष्ठत जाग्रतः प्राप्यवरान् निवोधतः' इत्यादि एस्यैव उक्तिः।

**देवलोकगमनम्** - एवम्बिधस्य स्वदेशमन्त्रस्य उद्गाता स्वामीविवेकानन्दः १९०२ ईशवीयाब्दे ४ जुलाइ इति मासाङ्के देवलोकम् अगच्छत्।

**----------**

**टीका : श्रीअरविन्दः**

**भूमिका** - भारतमातुः श्रेष्ठः साधकसन्तानः अरविन्द घोषः यः देशप्रेमिकेन साकं एको भाषाविशारदः तथा पण्डितोऽपि आसीत्।

**आविर्भावः** - अयं दार्शनिककविः १८७२ खीष्टाब्दस्य आगष्टमासस्य पञ्चमदिवसे कलिकातायाम् अजायत।

**पितरौ** - तस्य पितरौ आसीत् कृष्णधनघोषः श्यामलतादेवी च।

**शिक्षाजीवनम्** - यदा अरविन्दः पञ्चमवर्ष प्राप्तवान् तदा शिक्षालाभार्थं सः दार्जिलिं इति नगर्याम् आगम्य 'ल्यारोट कनभेल्ट' नामके विद्यालये अध्ययनं कृतवान्।

**कर्मजीवनम्** - कृतीछात्र अरविन्दः योग्यता स्थितेऽपि सः विटिशसर्वकारस्याधीने न कर्म अकरोत्। शिक्षासमापनादनन्तरं स्वदेशे प्रत्यागत्य वरोदाराजाधीने महाविद्यालये सः अध्यापकपदम् अलंकृतम्।

**स्वाधीनतासंग्रामे अवदानम्** - अस्मिन् समये तस्य स्वदेशप्रणयस्य जागरणं भवति महाराष्ट्रस्य विप्लवी ठाकुरसाहेवस्य संस्पर्शे। १९०२ खीष्टाब्दे वङ्गदेशे विप्लवीसभा गठनार्थं स्वीयभ्राता वारीन्द्रकुमारघोषः तेन प्रेरितः। तदा वरोदा-महाविद्यालयस्य अध्यक्षपदं परित्यज्य प्रत्यक्षभावेन स्वाधीनतासंग्रामे स आत्मनियोगः कृतः। 'वन्देमातरम्' इति पत्रिकायाः सम्पादकोऽपि स आसीत्। राष्ट्रद्रोहितायाः अपराधे ब्रिटिशसर्वकारः तं कारागारे निक्षिप्तः।

**ग्रन्थरचना** - वन्दीदशायाः अवसाने अरविन्दः आध्यात्मिकजीवनस्य प्रारम्भः कृतः। अस्मिन् समये आङ्गल- वङ्ग-संस्कृतभाषाया तेन वहवः ग्रन्थाः विरचिताः।

अरविन्द हि आङ्गलभाषायाः प्रथमं ग्रन्थं विरचितवान् इति मन्यते। तेन साकुल्येन चत्वारिंशत् ग्रन्थाः

KOUSIK PATRA

प्रणीताः। तेषु सप्तग्रन्थाः वङ्गभाषायाम्, एको संस्कृतभाषायाम् त्रयत्रिशत् आङ्गलभाषायां विरचिताः। तस्य ग्रन्थेषु अन्यतमो भवति- 1. The life Divine, 2. Eassays on Gita, 3. Mother India, 4. The age of kalidasa, 5. The Renaissance in India, ६. काराकाहिनी (वङ्गभाषायाम्), ७. धर्म ओ जातीयता (वङ्गभाषायाम्), ८. भवानीभारती (संस्कृतभाषायाम्)।

**महाप्रयाणम्** - अयं महापुरुषः १९५० श्रीष्टाब्दास्य नभेम्बरमासस्य पञ्चमे दिवसे तस्य पण्डिचेरी आश्रमे चिराय नयननिमीलं कृतवान्।

**उपसंहारः** - अरविन्दशब्दस्य अर्थो भवति श्वेतपद्मः। श्वेतकमलमिव स आसीत् शुभ्रः तथा चित्तापहारकः। तस्य संग्रामम् तस्य वाणी अद्यापि अस्मान् जीवनमार्गं प्रदर्शयति।

---------

## Long Question and Answer

**१. दक्षिणपूर्व एशियामहादेशे रामायणस्य प्रभावः आलोचनीयः।**

रामायणं भारतवर्षस्य अन्यतमं महाकाव्यम्। सूर्यवंशः भारवर्षस्य अन्यतमः प्रातीनराजवंशः। प्राचेतस् वाल्मीकिः सूर्यवंशजातस्य पुरुषोत्तमस्य रामचन्द्रस्य अमियजीवनचरितमवलम्ब्य सप्तकाण्डेषु विभक्तं चतुर्विंशतिसहस्त्रश्लोकात्मकं महाकाव्यं रामायणं रचितवान्। आहिमसमुद्रपर्यन्तं समग्रं भारतवर्षं अनेन महाकाव्येन प्लावितम्। भारतीयजनमानसे चिरस्थायीप्रभावसम्पन्नं महाकाव्यं रामायणम्।

स्वमहिम्नि स्थितस्य रामायणस्य प्रभावेन यथा भारतीयजीवनं प्लावितं तथैव च प्लावितं विश्वजीवनम्। षोडशशतके सम्राट पुत्रस्य दाराशिकोमहाभागस्य उपनिषदां भगवद्गीतायाः अनुवादेन विश्ववासिनः भारतीयप्रज्ञायाः परिचयं प्राप्तवन्तः। तदन्तरं स्यार उइलियाम जोन्समहाभागस्य ग्रिफिथमहाभागस्य च अनूदितं रामायणं समग्रे पाश्चात्यजगति सुपरिचितं जातम्।

पाश्चात्यजगति रामकथा अष्टादशशतकात् यद्यपि परिचिता जाता, तथापि दक्षिण-पूर्वएशियामहादेशस्य विभिन्नदेशेषु रामकथायाः अस्तित्वं तस्मात् प्रागेव परिलक्षितं जातम्। भारतीयोपमहादेशेषु राष्टेषु वाणिज्यिकयोगसूत्रं सुप्राचीनम्। भारतीयवणिजां पण्यपरिवहनसूत्रेण रामायण-महाभारतं दक्षिण-पूर्वएशिया महादेशस्य विभिन्नप्रान्तेषु प्रचारितम् । परन्तु बौद्ध-हिन्दुसन्न्यसीपर्यटकानां माध्यमे अपि रामकथा उपसागरीयदेशेषु प्रचारिता प्रसारिता च जाता।

थाइल्याण्डदक्षिण-पूर्वएशियामहादेशस्य अन्यतमः गुरुत्वपूर्णः देशः। तत्र रामकथा 'रामकेइन' नाम्ना परिचितम्। केइनशब्दस्य अर्थ 'कृष्ण' > कानाइ > केइन यथा भवति तथा 'काहिनी' अपि भवति। सुप्राचीनकाले थाइल्याण्डदेशस्य राजधानी 'आयुथाया' (अयोध्या) इति ख्याता आसीत्, थाइराजानः अपि आत्मनः रामचन्द्रस्य उत्तरपुरुषरूपेण विभावयन्ति स्म। सुप्राचीने सुखोथाइ शिलालेखे 'फ्रा

KOUSIK PATRA

रामगुहा' उल्लिखिता श्रासीत्। १७८२ खीष्टाब्दे तत्र चक्रीराजवंशस्य प्रथमरामस्य राजत्वकाले 'रामकेइन' ग्रन्थः रचितः श्रभवत्। रामकेइनग्रन्थः यद्यपि रामायणनानुसारं रचितः, तथापि तस्मिन् ग्रन्थेः थाइदेशस्य समाजजीवनं लोकजीवनं साहित्यं च प्रतिफलितम्।

कम्बोडिया दक्षिण-पूर्वएशिया महादेशस्य अन्तर्गतः। सुप्राचीनकालात् भारतवर्षेण सह कम्बोडियादेशस्य यथा वाणिज्यिकसम्पर्क तथा बौद्धिकसम्पर्क स्थापितमासीत्। कम्बोडियादेशस्य प्राचीनतमा भाषा आसीत् ख्मेर भाषा। सुप्राचीनकालात् ख्मेर भाषया सह संस्कृतभाषायाः सम्पर्क गवेषकैः प्रमाणितम्। मूलतः वाणिज्यिकयोगायोगमाश्रित्य उभययोः साहित्यिकयोगमपि प्रवर्तितम्। खीष्टिये सप्तमशतके, परवर्त्तिनि श्रङ्करशासनकाले तत्र रामकाहिनीम् आश्रित्य कम्बोडियारामायणं 'रामकेर' रामकेरति' वा रचितमभवत्। रामकेरतिग्रन्थे थेरवादीबौद्धानां प्रभावः सुपरिचितः। रामायणस्य रामचन्द्रः रामकेरतिग्रन्थे 'फ्रा रीम' तथा सीतादेवी 'नियाङ् सेदा' नाम्ना परिचिता। तत्र रामकथामाश्रित्य 'लकाउइन' लोकनृत्यम् अतीव समादृतम्।

भारतीयोपमहादेशे इन्दोनेशिया अन्यतमः देशः। श्रयञ्च देशः वर्तमाने मूलतः इसलामाश्रितः देशः। अस्मिन् देशेऽपि सुदीर्घकालात् रामायणस्य प्रभावः परिलक्ष्यते। वाल्मीकिरामायणम् इन्दोनेशियादेशे 'काकाउइन रामायणम्' नाम्ना परिचितम्। अनुमीयते यत् खीष्टिये ८७० शतके जाभाद्वीपे राज्ञः मपु सिन्दकस्य राजत्वकाले काकाउइन रामायणं विरचितम्। इन्दोनेशीयरामायणे संस्कृतमहाकवेः भर्तृहरेः 'रावणवधमहाकाव्यस्य' विशषः प्रभावः दृश्यते। परवर्तीकाले इन्दोनेशियादेशे रामायणस्य द्वितीयं संस्करणं रचितं जातम्। अष्टादशशतके यशदिपुरानामकेन केनापि इसलामधर्मीयकविना रामायणस्य द्वितीयं संस्करणं रचितम्। तच्च रामायणं 'सेरत राम' इति नाम्ना परिचितम्। रामायणाश्रितं 'ओयाङकुलित' नृत्यनाट्यं समग्रे इन्दोनेशियाराष्ट्र अत्यन्तं जनप्रियम्।

मालयेशिया दक्षिण-पूर्वएशियामहादेशस्यापि अन्यतमः प्रसिद्धः राष्ट्रः। मुसलमानाध्युसिते अस्मिन् राष्ट्रेऽपि रामायणस्य सुमहान्प्रभावः विद्यते। भारतीयसाहित्यानुसारं मालयेशिया पूर्वं मलयदेशः इति ख्यातः आसीत्। खीष्टिये षष्ठशतके मलयोपद्वीपस्य 'पट्टानि' नामके स्थाने रामकथायाः निदर्शनम् आविष्कृतम्। मालयेशियादेशे रामायणम् 'हिकायत सेरि राम' इति नाम्ना परिचितम्। 'हिकायत' कश्चित् आरवीयः शब्दः यस्यार्थः 'काहिनी'। सेरि राम - श्रीरामः। अथ 'हिकायत सेरि राम' शब्दस्य अर्थः भवति 'श्रीरामस्य काहिनी'। मलयेदशस्य जातीयजीवने 'हिकायत सेरि राम' ग्रन्थस्य सुमहान् प्रभावः परिलक्ष्यते। अस्य देशस्य विख्यातं लोकनृत्यं 'केल्यान्टन ड्याल्याङ'। रामायणकथाम् उपजीव्य लोकनृत्यमिदं विरचितम्।

दक्षिण-पूर्वएशियामहादेशस्य नवीनतमः देशः लाउसदेशः। वर्तमाने अयं देशः बौद्ध प्रभावितः। अत्रापि रामकथा जनेषु सुपरिचिता। लाउसदेशे प्रचलिता रामकथा 'फ्रा लक फ्रा राम' इति। उल्लेख्यं लाउसरामायणे प्रधानचरित्रं 'फ्रा लक' तथा लक्ष्मणः। रामचन्द्रः तत्र गौणः। फ्रा लक फ्रा राम लाउसदेशस्य जातीय ग्रन्थः।

KOUSIK PATRA

मायानमारदेशः भारतवर्षस्य निकटतमः प्रतिवेशी। भारतीयशास्त्रे साहित्ये च वर्तमानस्य मायानमारदेशः ब्रह्मदेशः इति ख्यातः। ब्रह्मदेशश्य प्राचीनाः राजानः आत्मनः अयोध्यायाः उत्तराधिकारीरूपेण विभायन्ति स्म। रामकथा रामायणस्य काहिनी वा ब्रह्मदेशे सुपरिचिता। अत्र च रामायणं 'यम जातदय' 'यमायण' वा नाम्ना परिचितम्। अस्मिन् ग्रन्थे रामः 'यमः' सीता च 'थिदा' नाम्ना परिचिता।

एतद्व्यतीतं दक्षिण-पूर्वएशियामहादेशस्य भियेतनाम, फिलिपाइन वुनेइ प्रभृतिदेशेषु अपि रामकथा सुपरिचिता अस्ति।

--------

**१. लोकसंस्कृतिशब्दस्य कोऽर्थः ? दक्षिण-पूर्वएशियाभूखण्डे लोकसंस्कृतौ महाभारतस्य भूमिका पर्यालोचनीया।**

लोकसंस्कृतिशब्देन 'लोकानां संस्कृतिः' अथवा 'लोकाश्रिता संस्कृतिः' बोध्यते। वस्तुतः लोकशब्दः बह्वर्थव्यञ्जकः। साधारणार्थे लोकशब्देन 'मनुष्यः', 'जनः' अर्थः एव भवति। पुनः लोकशब्देन समग्र जगत् एव बोध्यते - यथा च गीतायाम् - लोकान् समाहर्तुमिह प्रवृत्तः।

भगवता पाणिनिना भाषा द्विविधा प्रोक्ता- वैदिकी लौकिकी च। पातञ्जलमहाभाष्येऽपि - 'यथा वैदिकेषु लौकिकेषु च'। लोके भव - लौकिकः। साधारणमनुष्यजीवने प्रचलितः इत्यर्थे लौकिकः। साहित्ये दर्शने च 'लोकायतः' शब्दः प्राप्यते - लोकयतं साहित्यं, लोकायतं दर्शनम्। तत्र लोकेषु साधारणजनजीवनेषु आयतः विस्तृतः प्रचलितः इत्यर्थे लोकायतः शब्दः भवति।

इंरेजीभाषायां लोकशब्दस्य प्रतिशब्दः भवति 'Folk'। तत्र 'Folk' शब्दस्य अर्थः 'People in general' अथवा 'a particular type of people'। केमब्रिज अभिधानानुसारं लोकशब्देन 'People, espe- cially those of a particular group of type' अर्थः परिगृहीतः भवति।

लोकसंस्कृतिशब्दस्य सम्भाव्यार्थः अथ भवति - प्रथागतशिक्षाबहिर्भूतानां अनभिजातानां साधारण मनुष्याणां युगान्तसञ्चितभावधारायाः स्वतःस्फुर्तचर्चा।

महाकाव्यं महाभारतं पराशरनन्दनस्य वेदव्यासस्य अमरलेखनीप्रसूतं काव्यम्। आकारस्य गौरवे, भावस्य च महत्त्वे समुद्रमिव रत्नाढ्यं महाकाव्यं महाभारतम्। महाभारतं विश्वस्य प्रथमं गणकाव्यम्। उच्चकोटी अभिजात-ज्ञानालोकितजीवनेन सह अतिसाधारणमनुष्यजीवनमपि परमस्नेहेन महाकविना अत्र आलोकितम्। धर्म-दर्शन-साहित्य-विज्ञानविषयेन सह साधारणजनचित्तविनोद विषयोऽपि अत्र बहुशः परिवेशितः। फलतः विशेषतः वणिजां वाणिज्यार्थं विदेशगमनकाले अवसरयापनार्थं चित्तविनोदनार्थं च तैः स्वेषु कर्मस्थलेषु महाभारतमपि आनीतम्। इत्थं महाभारतीयकथा उपमहादेशस्य विविधेषु देशेषु प्रचारिता प्रसारिता च जाता।

KOUSIK PATRA

दक्षिण-पूर्वएशिया भूखण्डस्य श्रन्यतमः देशः इन्दोनेशिया। अस्मिन् देशे सुप्राचीनकालात् महाभारतस्य प्रभावः परिलक्षितः भवति। श्रद्य प्रभृतिः २०००-२५०० वर्षपूर्वे भारतीयाः पण्डिताः दार्शनिकाश्च सौभ्रातृत्वस्य वार्तया सह यवद्वीप-सुवर्णद्वीप- वालिद्वीपान् श्रागतवन्तः। तस्मादेव कालात् इन्दोनेशियादेशे रामायण- महाभारतं परिचितम् आसीत्। प्रख्यातगवेषक स्य इन्द्रजित्वन्द्योपाध्यास्य गवेषणानुसारं- 'Naturally, some of the Mahabharata narratives in Indousia may be older than the Indian Mahabharata in its present corpus, which was still evolving as late as 4 th Century A.D.' इन्दोनेशियादेशस्य प्राक्तनराष्ट्रपतिना सुकर्णमहोदयेनापि स्वीकृतम्- 'In the veins of every one of my people flows the blood of Indian ancestors'। जाभादेशीये लोकजीवने साहित्ये च महाभारतस्य प्रभावः सुचिरकालात् प्रवर्तितः श्रासीत्। तत्र जनप्रियं छायानृत्यं 'ओयाङ कुलित' महाभारतीयकथामवल्यम्ब्य विरचितम्। गवेषकानाम् अनुमानं ख्रीष्टिये चतुर्थशतके जाभानृपस्य श्रीमहाप्याङ्गाङ्गस्य शासनकाले अस्य छायानृत्यस्य प्रचलनम् अभवत्।

'ओयाङ कुलित' छायानृत्यं त्रिमात्रिकाभिः पुत्तलिकाभिः परिवेशितं भवति। छागचर्मणा महिषचर्मणा वा ताः पुत्तलिकाः निर्मिताः भवन्ति। तत्र नृत्यपरिचालकः 'ड्यालाङ' नाम्ना अभिधीयते। 'ड्यालाङ' शिल्पी इसलामधर्मावलम्बी, चरित्रेण स महाभारतस्य 'रूपोजीपवी 'सदृशः। महाभारतीयकथामाश्रित्य 'ओयाङकुलित' नृत्यस्य विषयः रचितः भवति। तेषु च विषयेषु काकाउइन भारतयुद्ध' 'काकाउइन अर्जुनविवाह', 'हरिवंश', 'काकाउइन घटोत्कच' अन्यतमाः।

कम्बोडियादेशे अपि 'ओयाङकुलित' छायानृत्यं जनप्रियम्। तत्र स्थितेषु अङ्करभाट-अङ्कर थोम मन्दिरगात्रेषु महाभारतीयकथायाः चित्रायणं जातम्। कम्बोडिया बौद्धधर्मप्रभावितः देशः। तत्र विवाहानुष्ठाने 'क्यालेवा' नामकम् अनुष्ठानविशेषं पाल्यते। तस्मिन् अनुष्ठाने आयुष्मती नववधूः हस्ते पवित्रं रक्तिमसूत्रं धारयति।

थाइल्याण्डदेशस्य जातीयग्रन्थः 'रामकेइन'। संस्कतकृष्णशब्दस्य रूपान्तरम् 'केइन' शब्दः। तत्रापि रामकथया सह कृष्णकथा श्रपि प्रचलिता। थाइलोकसाहित्येषु महाभारतीयकथायाः रूपान्तरं बहुशः प्राचीनः थाइनृपतिः 'भूमिवल-अदुल्यदेज' (अतुल्यतेजः) आत्मानं नवमरामरूपेण घोषितं कृतवान्।

प्राचीने मलयदेशे तथा वर्तमानस्य मालयेशियादेशेऽपि महाभारतं सुपरिचितम्। महाभारतकथामाश्रित्य 'हिकायेत प्याराङ् पाण्डवजय' मलयदेशस्य जनप्रियं साहित्यम्। इन्दोनेशियादेशस्य अनुसारं मलयदेशे अपि महाभारताश्रितं 'ओयाङ् ओङ्ग', 'ओरङ्ग' नृत्यनाट्यं प्रचलितम्। संयुक्तराष्ट्रसङ्घन एतादृशं नृत्यनाट्यं 'National Heritage' रूपेण घोषितम्।

उल्लेख्यं यत् महाभारतीये कुरुक्षेत्रयुद्धे कौरवपाण्डवाणां पक्षावलम्बिणः बहवः उपसागरीयाः राजानः वेदव्यासेन उल्लिखिताः। तेषु नृपेषु सिन्धु-केकय-मद्रराजः (पाकिस्तान), गान्धारनृपः

KOUSIK PATRA

(आफगानिस्थान), श्रश्वकराजः (इराण), कम्बोजराजः (ताजाकिस्थान), यवनराजः (ग्रीक) अन्यतमाः।

एवञ्च १९८८ साले प्रयोजकेन वि. आर. चोपरामहोदयेन सम्प्रचारितं दूरदर्शनधारावाहिकं महाभारतम् दक्षिण-पूर्वएशिया महादेशेन सह समग्रे मध्यप्राच्ये एव जनप्रियधारावाहिकरूपेण प्रशंशितम्।

----------

**३. पाश्चात्ये श्रीमद्भगवद्गीतायाः प्रभावः आलोचनीयः ।**

श्रीमद्भगवद्गीता सनातनभारतवर्षस्य हृदयमन्थनजाता सुधा। कुरुक्षेत्रस्य रणाङ्गने कर्मवीरम् अर्जुनं स्वकर्मणि पुनःप्रवर्तनाय अवतारपुरुषेण श्रीकृष्णेण ये खलु उपदेशाः प्रदत्ताः तेषां सङ्कलनम् अमृतमयी भागवतीकथा श्रीमद्भगवद्गीता। सप्तशती गीता श्रष्टादशाध्यायेषु विभक्ता। अन्येभ्यः शास्त्रग्रन्थेभ्यः गीता अनन्या। अन्याः सर्वे शास्त्रग्रन्थाः ऋषिभिः प्रोक्ताः, किन्तु गीताशास्त्रं श्रीभगवता स्वयं प्रोक्तम्- 'या स्वयं पद्मनाभस्य मुखपद्माद्विनिसृता'।

अर्जुनं पुरस्कृत्य श्रीभगवता गीतामृतः विश्वजनेभ्य उपदिष्टः। वर्ण-धर्म-जाति-सम्प्रदायनिरपेक्षः गीताग्रन्थः विश्वकल्यणाय नियोजितः। अथ सप्तदशशतकस्य मध्यवर्तीसमये सम्राटपुत्रेण दाराशिकोमहाभागेन पारसीकभाषायां गीतायाः अनुवादमात्रं गीतारश्मिः दिग्विदिक्षु सम्प्रचारिता जाता। इंरेजराजकर्मचारिणा स्यार चार्लस् उइलकिन्स महाभागेन आङ्गलभाषायाम् अनूदिता भगवद्गीता समग्रे पाश्चात्ये जगति सम्प्रचारिता। तदनन्तरं ल्याटिन-जार्मान-फ्रान्स- इंरेजी भाषासु गीतायाः अनुवादः निरन्तरं प्रकाशितः जातः। परिसंख्यानानुसारं एयावत्कालपर्यन्तं विश्वस्य द्विशताधिकासु भाषासु गीतायाः सहस्त्रद्वयं संस्करणं प्रकाशितमभवत्।

पाश्चात्यदेशेषु जार्मानदेशे गीतानुध्यानं सर्वाधिकं परिलक्ष्यते। जार्मानपण्डितः जेकव उइलहेल्म हाओयार महोदयः गीतां तस्य चिरन्तनी मातृरूपेण वन्दितवान् - 'Geeta is my Mother. I lost my earthly mother who gave me birth long ago, but this Eternal mother has completely filled her place by my side ever since' बहवः जार्मानचिन्तानायकाः यथा कान्ट श्लेगेल-शिलार- हार्डार-हेगेल प्रमुखाः गीतायाः अध्यात्मदंर्शनेन उद्बुद्धाः आसन्।

श्रूयानक्युइटाल डुपेरण महोदयस्य गीतानुवादं पठित्वा फरासी पण्डिताः भारतीयप्रज्ञायाः अनुध्याने व्यापृताः अभवन्। चार्लस् उइलकिन्स महोदयस्य गीताग्रन्थेन, म्यास्कमूलारमहोदयस्य The Sacred Books of the East ग्रन्थेन च फ्रान्सदेशीयाः विद्वज्जनाः गीतायाः दर्शनं प्रति आकृष्टाः अभवन्। ते च चिन्तानायकाः विश्वमानवतायाः श्राध्यात्मिकोन्नयने गीतोपदेशस्य प्रयोजनीयतां उपलब्धवन्तः।

KOUSIK PATRA

श्रमेरिकादेशोऽपि भग्वद्गीतायाः विश्वात्मबोधे उत्साहितः जातः। श्रमेरिकादेशस्य विख्यातः कवि-साहित्यिकः राल्फ्ओयाल्डो एमार्सनमहोदयः गीताज्ञानेन आलोकितः आसीत्। स्वामीविवेकानन्दः एमार्सनमहोदयस्य गीताज्ञानम् उच्चैः प्रशंसितवान्। एमार्सनमहोदयस्य 'ब्रह्म' कविता गीतादर्शनेन आलोकिता।

श्रूयामोस् ब्रोनसन श्रयालकोटमहोदयेन श्रमेरिकायाः वोस्टननगरे गीतापाठकानाम् संगठनमेकं रचितम्। फ्राङ्कलिन स्यावोर्णमहोदयस्य 'Leaves of Grass' गीतोपदेशेन समृद्धं काव्यम्। श्रूयालदोस हाक्सलिमहोदयस्य 'The Near and The Far and Island' उपन्यासेऽपि गीताज्ञानं प्रतिफलितम्।

इंल्याण्डदेशेऽपि भगवद्गीतायाः सुमहान् प्रभावः दृश्यते। स्यार उइलियाम जोन्समहाभागेन 'एशियाटिक सोसाइटि' इति संस्थायाः स्थापनात् परं इंल्याण्डवासिनः पण्डिताः भारतीयप्रज्ञां प्रति उत्साहिनः अभवन्। उइलकिन्समहोदयस्य अनूदितं गीताग्रन्थं पठित्वा, गीतामाधुर्यं च अनुभूय आङ्गलविद्वज्जनाः गीतानुध्याने निरताः जाताः। तत्र स्यार एडुइन आर्नल्डमहाभागः श्रमित्राक्षरछन्दसा भगवंद्गीतायाः आङ्गलानुवादं प्रकाशितवान्। तत्र विशिष्टाः इरेजकवयः कोलेरिज-ओयार्डस् ओयार्थ-शेली-स्कट्महाभागाः गीतायाः विश्वात्मावोधं तेषां काव्येषु परिस्फुटितवन्तः। टेनिसनमहाभागस्य 'The Ancient Sage' कविता गीताज्ञानेस्योपरि आधारिता।

'लिटलवय' नामकस्य भयङ्करविस्फोरकस्य श्राविष्कर्ता जुलियास रवार्ट ओपेनहाइमार नामकः कश्चित् विज्ञानी। अनेन विस्फोरकेन जापानदेशे १९४५ खीष्टाव्दे भयङ्करी ध्वंसलीला संगठिता आसीत्। भयङ्करों ध्वंसलीलामिमां संपश्य विज्ञानी ओपेनहाइमारमहोदयः भगवद्गीतायाः श्लोकमुच्चार्य श्रात्मनः

प्रतिक्रियाम् अभिव्यक्तवान्। स च श्लोकः - **"दिवि सूर्यसहस्रस्य भवेद् युगपदुत्थिता।**

**यदि भाः सा स्याद्भासस्तस्य महात्मनः।।" (गीता - ११/१२)**

एवं भगवद्गीतायाः प्रभावः पाश्चात्यजगतः सर्वत्रैव परिलक्षितः भवति।

--------

KOUSIK PATRA

# SALTORA NETAJI CENTENARY COLLEGE

*(Affiliated to Bankura University)*

Saltora, 722158, Dist.- Bankura, West Bengal

## Model Questions and Answers

Semester-III

Subject: B.A. SANSKRIT (Honours)

Course Code: AHSNS303C-7

Course Title: Theory of Self (Bṛhadaranyakopanisad)

KOUSIK PATRA

Prepared by

Kousik Patra

Assistant Professor

Department of Sanskrit

Saltora Netaji Centenary College

E-mail ID : patrakousikjrf@gmail.com

Mobile No : 7872177720

Short Questions (लघूत्तरीयाः प्रश्नाः)

**१) बृहदारण्यकोपनिषत् कस्य वेदस्य अन्तर्गता?**

**उत्तरम् -** शुक्लयजुर्वेदे बृहदारण्यकम् इति नामधेयम् आरण्यकम् अस्ति। तस्य च आरण्यकस्य अन्तिमे विद्यमानाः षड् अध्यायाः बृहदारण्यकोपनिषद् अस्ति।

**२) बृहदारण्यकोपनिषदि कति अध्यायाः सन्ति? तत्र कति काण्डानि?**

**उत्तरम् -** बृहदारण्यकोपनिषदि षड् अध्यायाः सन्ति। अत्र मधुकाण्डं याज्ञवल्क्यकाण्डं खिल-काण्डञ्चेति काण्डत्रयं विद्यते।

**३) बृहदारण्यकोपनिषदः प्रसिद्धं भाष्यं किं केन च तद्विरचितम् ?**

**उत्तरम्** - बृहदारण्यकोपनिषदः शाङ्करभाष्यं प्रसिद्धं भाष्यम्। तद् भाष्यम् अद्वैतवादिना शङ्कराचार्येण विरचितम्।

**४) शाङ्ङ्करभाष्यमाश्रित्य भामतीटीका केन विरचिता? शाङ्करभाष्यस्य वार्तिकं केन प्रणीतम् ?**

**उत्तरम्** - शाङ्करभाष्यम् आश्रित्य भामतीटीकाम् आचार्यः वाचस्पतिमिश्रः रचितवान्। शङ्काराचार्यस्य शिष्यः सुरेश्वराचार्यः शाङ्करभाष्यस्य वार्तिकं प्रणीतवान्।

**५) बृहदारण्यकोपनिषदः षडध्यायी इति नामकरणं किमर्थम्? अत्र कति ब्राह्मणानि सन्ति?**

**उत्तरम्** - बृहदारण्यकोपनिषदि षड् अध्यायाः सन्ति, अत इयम् उपनिषत् षडघ्यायी इत्युच्यते। अत्र अध्यायषट्के सप्तचत्वारिंशद् ब्राह्मणानि सन्ति।

**६) बृहदारण्यकोपनिषदि मुख्यः प्रवक्ता कः? तस्य पत्न्याः नाम किम् ?**

**उत्तरम्** - बृहदारण्यकोपनिषदि मुख्यः प्रवक्ता भवति ब्रह्मज्ञः याज्ञवल्क्यः। तस्य मैत्रेयी कात्यायनी चेति पत्नीद्वयम् आसीत्।

**७) ब्रह्मज्ञानिनो याज्ञवल्क्यस्य कति पत्न्यः आसन्? तासां नामानि कानि ?**

**उत्तरम् -** ब्रह्मज्ञानिनो याज्ञवल्क्यस्य पत्नीद्वयम् आसीत्। तयोः मैत्रेयी इति कात्यायनी चाभिधानम्।

**८) ब्रह्मज्ञानिनो याज्ञवल्क्यस्य ज्येष्ठा पत्नी का? तस्याः स्वभावः कीदृशः?**

**उत्तरम्** - ब्रह्मज्ञानिनो याज्ञवल्क्यस्य ज्येष्ठा पत्नी मैत्रेयी। सा ब्रह्मवादिनी आसीत्। अर्थात् सर्वदा सा आत्मतत्त्वं कथयति विचारयति स्मा

**९) ब्रह्मज्ञानिनो याज्ञवल्क्यस्य कनिष्ठा पत्नी का? तस्याः स्वभावः कीदृशः?**

KOUSIK PATRA

**उत्तरम्** - ब्रह्मज्ञानिनो याज्ञवल्क्वस्य कनिष्ठा पत्नी कात्यायनी। सा स्त्रीप्रज्ञाविशिष्टा गार्हस्थ्याश्रमस्य कर्मसु निपुणा आसीत्।

**१०) वृहदारण्यकोपनिषदि चतुर्थाध्यायस्य चतुर्थब्राह्मणस्य किं नाम? अस्य च नाम्नः कारणं किम्?**

उत्तरम् - बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य चतुर्थब्राह्मणस्य शारीरकब्राह्मणम् इत्यभिधानम्। शरीरे भवः शारीरः। शारीर एव शारीरकः आत्मा। शारीरक आत्मा अस्मिन् ब्राह्मणे प्रतिपाद्यते, अत एतस्य ब्राह्मणस्य शारीरकब्राह्मणम् इत्यभिधानम्।

**११) वृहदारण्यकोपनिषदि चतुर्थाध्यायस्य चतुर्थब्राह्मणस्य किं किं नाम?**

**उत्तरम् -** बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य चतुर्थब्राह्मणस्य शारीरकब्राह्मणम् इत्यभिधानम्। एतस्य च ब्राह्मणस्य जनकयाज्ञवल्क्यसंवादः इति नामान्तरम्।

**१२) वृहदारण्यकोपनिषदि चतुर्थाध्यायस्य चतुर्थब्राह्मणस्य द्वितीयाध्यायस्य चतुर्थब्राह्मणस्य च किं किं नाम?**

**उत्तरम्** - बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य चतुर्थब्राह्मणं शारीरकब्राह्मणम्। अत्र च द्वितीयाध्यायस्य चतुर्थब्राह्मणं मैत्रेयीब्राह्मणम्।

---------

**संस्कृत व्याख्या**

**यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।**

**अथ मर्योऽमृतो भवत्यत्र ब्रह्म समश्नुते।। इति।**

**उत्सः** - आलोच्यः मन्त्रोऽयं शुक्लयजुर्वेदस्य शतपथब्राह्मणान्तर्गतायाः बृहदारण्यकोपनिषदः आम्नातः।

**प्रसङ्गः** - वैदेहकस्य जनकस्य जिज्ञासामुखेन आत्मज्ञस्य अनुत्क्रमणविषये ब्रह्मज्ञेन याज्ञवल्क्येन अयं मन्त्रः उदाहृतः।

**व्याख्या** - प्राकृतः जनः कामनायाः वशवर्ती सन् पुनः पुनः जायते म्रियते च। तस्य हृदि काम्यप्राप्तिवासना सदैव तीव्रा भवति। इहामुत्रार्थाः पुत्रवित्तलोकैषणाः अनात्मज्ञस्य पुरुषस्य बुद्धिमाश्रित्य वर्तन्ते। किन्तु आत्मकामतया आप्तकामस्य तिस्रः एषणाः समूलम् उच्छिद्यन्ते। एषणाविच्छेदे अविद्या विनाशं गच्छति। आत्मज्ञानसम्पन्नः विद्वान् अमृतत्वं लभते। आत्मज्ञानोदयेन पुरुषः ब्रह्म विदित्वा ब्रह्मैव भवति। तदा पुरुषः मुक्तः सर्वात्मभूतः सन् संसारित्वं सर्वथा त्यजति। मुक्तस्य पुरुषस्य इयम् अवस्था उपमायोगेन याज्ञवल्क्येन व्याख्याता। निर्व्वयनी निर्मोकः सर्पत्वक्

KOUSIK PATRA

भवति। यथा सर्पेण परित्यक्तः निर्मोकः सर्पाश्रये वल्मीके प्राणहीनः वर्तते तथैव मुक्तपुरुषेण अनात्मतया परित्यक्तं शरीरं मृतवत् शेते इति शम्।

-------

**संस्कृत व्याख्या-**

**अणुः पन्था विततः पुराणो मां स्पृष्टोऽनुवित्तो मयैव।**

**तेन धीरा अपियन्ति ब्रह्मविदः स्वर्गं लोकमित उर्द्धं विमुक्ताः।।**

**उत्सः** - आलोच्यः मन्त्रोऽयं शुक्लयजुर्वेदस्य शतपथब्राह्मणान्तर्गतायाः बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य चतुर्थब्राह्मणात् आम्नातः।

**प्रसङ्गः -** आत्मकामस्य ब्रह्मज्ञस्य मोक्षप्राप्तिविषयः आलोचितः अस्मिन् मन्त्रे। आत्मकामतया आप्तकामः ब्रह्मविद् मोक्षं प्राप्नोति इति ब्राह्मणवाक्यं सविस्तरं प्रतिपादितम् अस्मिन् मन्त्रे।

**व्याख्या** - मोक्षमार्गः अतिसूक्ष्मः दुर्विज्ञेयः 'दुर्गमपथस्तत् कवयः वदन्ति'। सः च ज्ञानमार्गः संसारतरणहेतुत्वात् विततः वितरः वा, पुराणः चिरन्तनत्वात्। प्रज्ञावलेन दुर्विज्ञेया चिरन्तनी इयं ब्रह्मविद्या ब्रह्मज्ञेन याज्ञवल्क्येन लब्धा। याज्ञवल्कस्य उपदेशेन वैदेहकः जनकः अपि विततं वितरं ज्ञानामार्ग प्राप्तवान्। महात्मनः याज्ञवल्कस्य श्रयं सिद्धान्तः यत् प्रज्ञावान् ब्रह्मविद् ज्ञानमार्गेन जीवन्नपि शरीराभिमानशून्यः सन् विमुक्तः भवति। अथ विमुक्तः ज्ञानी देहपातनात् परं ब्रह्मविद्याफलं मोक्षपदं प्राप्नोति। मोक्षप्राप्तः ज्ञानी कदापि लोकान्तरं न गच्छति, सः ब्रह्म अधिगच्छति इति भावः।

----------

**संस्कृत व्याख्या -**

**अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।**

**ततो भूय इव ते तमो य उ विद्यायां रताः।।**

**उत्सः** - आलोच्यः सन्दर्भोऽयं शुक्लयजुर्वेदस्य शतपथब्राह्मणान्तर्गतायाः बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य चतुर्थब्राह्मणात् आम्नातः।

**प्रसङ्गः** - मन्त्रेऽस्मिन् विद्याविद्यारतस्य पुरुषस्य गतिः वर्णिता।

**व्याख्या** - ज्ञानं सर्वापेक्षा पवित्रतरं वस्तु। न हि ज्ञानेन सदृशं पवित्रमिह विद्यते। 'ज्ञानात् मुक्तिः कर्मणा वन्धः' इति वेदान्तोपदेशः। मुक्तिस्तु परमपुरुषार्थः। इयं मुक्तिः कर्मोपासनया न लब्धा। यतः कर्मोपासना अविद्या भवति। विद्यातः अन्या साध्यसाधनलक्षणा अविद्या। अग्निहोत्रादिकर्म अविद्या

KOUSIK PATRA

भवति। तेन अग्निहोत्रादिकर्मणा मोक्षप्राप्तिः न भवति। संसारपरवशाः कर्ममार्गिनः जन्ममृत्युप्रवाहे पुनः पुनः, आवर्तन्ते। अथ उक्तम् 'अन्धं तमः प्रविशन्ति येऽविद्यामुपासते'। परन्तु कर्मप्रतिपादिकायां वेदविद्यायां ये निरतास्ते ततोऽधिके गभीरतरे तमसि प्रविशन्ति। अत्र मन्त्रे विधिनिषेधपरः वेदार्थः विद्याशब्देन लक्षितः। ते च विद्यानिरताः पुरुषाः विधिनिषेधलक्षणं वेदार्थमेव साकल्येन वेदं जानन्ति। अथ ते ज्ञानपापिनः। ज्ञात्वा श्रपि पापाचरणम् अधिकतराय दोषाय भवति। अथ विद्यामार्गिनः विद्योपासनया संसारगतिमेव प्राप्नुवन्ति, न तु मोक्षम्। ईशोपनिषदि अपि श्रयं मन्त्रः पठितः। विद्याविद्ययोः सामञ्जस्यविधानमुखेन ईशोपनिषदि उक्तम्-

**"विद्यां चाविद्यां च यस्तद्वेदोभयं सह।**

**अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।।"**

------------

**संस्कृत व्याख्या-**

**अनन्दा नाम ते लोका अन्धेन तमसावृताः।**

**तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधो जनाः।।**

**उत्सः** - आलोच्यः सन्दर्भोऽयं शुक्लयजुर्वेदस्य शतपथब्राह्मणान्तर्गतायाः बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य चतुर्थब्राह्मणात् आम्नातः।

**प्रसङ्गः** - अज्ञानिभिः प्राप्तस्य 'अनन्द' इति लोकस्य वर्णना प्रदत्ता अस्मिन् मन्त्रे महर्षिणा याज्ञवल्क्यपादेन।

**व्याख्या -** शास्त्रज्ञानरहितानाम् अज्ञानिनां पुरतः आत्मज्योतिः कदापि न प्रज्वलिता भवति। ज्ञानाभावात् ते जनाः पुनः पुनः जननमरणचक्रे आवर्तन्ते। किन्तु शास्त्रज्ञाननिष्णाताः विद्वांसोऽपि आत्मज्ञानाभावात् मुक्तिं न प्राप्नुवन्ति। तेषाम् अवस्था शास्त्रज्ञानरहितेभ्येऽपि भयङ्करी भवति। आत्मज्ञानाभावात् अज्ञानतिमिराच्छन्नाः सन्तु यथा शास्त्रज्ञानरहिताः तथा शास्त्रज्ञाननिष्णाताः सर्वे जनाः पुनः पुनः जायन्ते म्रियन्ते च। ईशोपनिषदि अपि इयं भावना भाषान्तरेण प्रकाशिता -

**"असुर्या नाम ते लोका अन्धेन तमसावृताः।**

**तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।।"**

अत्र 'लोक' शब्दः जन्मवाचकः। कर्मफलानि लोक्यन्ते दृश्यन्ते भुज्यन्ते इति लोकाः। तमःशब्दश्च अज्ञानवाची। अनात्मज्ञाः लोकाः अनन्दाः आनन्दरहिताः। यतः सच्चिदानन्दस्वरूपं ब्रह्म तैः चिरम् अप्राप्तम्। अथ ते खलु जनाः अनन्दत्वं भजन्ते।

KOUSIK PATRA

---------

**यस्यानुवित्तः प्रतिबुद्ध आत्माऽस्मिन् संदेह्यो गहने प्रविष्टः।**

**स विश्वकृत् स हि सर्वस्य कर्त्ता तस्य लोकः स उ लोक एव।। (४/४/१३)**

**उत्सः** - आलोच्यः सन्दर्भोऽयं शुक्लयजुर्वेदस्य शतपथब्राह्मणान्तर्गतायाः बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य चतुर्थब्राह्मणात् आम्नातः। आत्मनः महत्त्ववर्णनामुखेन ब्रह्मज्ञेन याज्ञवल्क्येन अयं मन्त्रः उदाहृतः।

**व्याख्या -** 'सर्वं खल्विदं ब्रह्म', 'अयमात्मा सर्वभूतेषु गूढ़ः' इति श्रुतिवाक्यं व्याख्यातम् अस्मिन् मन्त्रे। पाञ्चभौतिके जीवशरीरे कूटस्थः सर्वगतः श्रात्मा प्रत्यगात्मतया विराजते। प्रत्यगात्मा जीवात्मा। जीवः ब्रह्मैव नापरः। किन्तु अविद्यावशात् पाञ्चभौतिकशरीरस्थितं आत्मानं जीवभावापन्नं ज्ञात्वा मानवः विडम्वनां प्राप्नोति। अविद्या नाम भ्रान्तज्ञानम् अध्यारोपः। किन्तु श्रात्मतत्त्वोपलव्ध्या श्रविद्या दूरीभूता भवति। तदा जीवब्रह्मणोः एकत्वम् अनुभूय साधकः ब्रह्मज्ञः भवति। श्रनर्थसङ्कले सन्देहास्पदशरीरे परमात्मज्ञानमनुभूय साधकः ब्रह्मज्ञः विश्वकृत् भवति। आत्मज्ञानप्रभावात् सर्वं विश्वं तस्यैव भवति, सः सर्वस्य विश्वस्य आत्मारूपेण प्रतिभाति। विश्वात्मना सह ब्रह्मज्ञः अभिन्नः भवति। उक्तञ्च ईशोपनिषदि-

**"यस्मिन् सर्वाणि भूतानि आत्मन्येवानुपश्यति।**

**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।"**

-----------

**"यदैतमनुपश्यत्यात्मानं देवमञ्जसा।**

**ईशानं भूतभव्यस्य न ततो विजुगुप्सते।।" (४/४/१५)**

**उत्सः** - आलोच्यः सन्दर्थोऽयं शुक्लयजुर्वेदस्य शतपथब्राह्मणान्तर्गतायाः बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य चतुर्थब्राह्मणात् आम्नातः।

**प्रसङ्गः** - मन्त्रेऽस्मिन् अभेददर्शिनः आत्मज्ञस्य निर्भयता प्रतिपादिता।

**व्याख्या- 'ब्रह्म वेद ब्रह्मैव भवति'**- मुमुक्षुः साधकः अनर्थसङ्कले अस्मिन् देहे ब्रह्मज्ञस्य आचार्यस्य उपदेशेन ब्रह्मसायुज्यं प्राप्नोति। तत्त्वज्ञानात् **'अहं ब्रह्मास्मि'** इत्येवम् अनुभूय ब्रह्मज्ञः अमृतः भवति। निरवच्छिन्नां ब्रह्मानन्दधारां समास्वादयन् सः कृतार्थो भवति, समग्रेण विश्वात्मना एकीभूतः सन् सः विश्वकृत् भवति । विश्वात्मभावनया भावितः मुमुक्षुः जरामरणादिकं भयम् परिहाय अभयमन्त्रम् अनुसृत्य सर्वेषु भवति समदर्शी। समदर्शी न विभेति कुतश्चन। उक्तञ्च कठोपनिषदि -

KOUSIK PATRA

**"य इमं मध्वदं वेद आत्मानं जीवमन्तिकात्।**

**ईशानं भूतभव्यस्य न ततो विजुगुप्सते।।"**

ईशानं परमात्मानं ज्ञात्वा ब्रह्मज्ञः स्वं गोपयितुं न इच्छति। सर्वेषु भूतेषु आत्मानम् अनुभूय साधकः कमपि निन्दितुं न प्रवर्तते। यतः न कश्चित् जनः आत्मानं निन्दति। निन्दाकार्यं द्वैतदर्शनस्य फलम्। किन्तु एकात्मदर्शी ब्रह्मज्ञः एकात्मदर्शने प्रभवति, निन्दाविषयम् अप्राप्य सः सर्वभूतेषु आत्मानं प्रकाशयति, न विजुगुप्सते।

**------**

**यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः।**

**तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम्।। (४/४/१७)**

**उत्सः** - आलोच्यः सन्दर्भोऽयं शुक्लयजुर्वेदस्य शतपथब्राह्मणान्तर्गतायाः बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य चतुर्थब्राह्मणात् उत्कलितः।

**प्रसङ्गः** - ब्रह्म सर्वावभासकत्वेन ज्योतिषामपि ज्योतिः तथा अमृतस्वरूपम्। मन्त्रेऽस्मिन् सर्वाधिष्ठानत्वेन ब्रह्मणः अमृतत्वं प्रतिपादितं ब्रह्मज्ञेन याज्ञवल्क्येन।

**व्याख्या** - 'पञ्चजना' इति शब्दः आचार्यैः बहुधा व्याख्यातः। गन्धर्वाः पितरः देवाः श्रसुराः रक्षांसि च पञ्चजनाः इति केचित् मन्यन्ते, अपरे तु ब्राह्मणादयश्चत्वारः वर्णाः निषादपञ्चमाः। गन्धर्वादयः ब्राह्मणादयः वा यथा वा भवन्तु पञ्चजनाः तथा अव्याकृतः सूक्ष्म श्राकाशश्च परब्रह्मणि सर्वे स्थिताः। पूर्वाध्याये ब्रह्मविदुषर्षी गार्गीं प्रति उपदेशमुखन याज्ञवल्क्येन प्रतिपादितम्- 'एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति'। प्रकृतं तु आत्मा विश्वचराचरस्य आधारः। स्थावर-जङ्गमात्मकविश्वचराचरः परमात्मनि लीनः। अयमात्मा एव ब्रह्म। ब्रह्मैव चामृतम्। यस्तावत् आत्मानं ब्रह्मरूपेण जानाति, सः अमृतस्वरूपः भवति। महर्षिः याज्ञवल्क्योऽपि ब्रह्म ज्ञात्वा ब्रह्मैव अभवत्।

**--------**

**प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः।**

**ते निचिक्युर्ब्रह्म पुराणमग्र्यम्।। (४/४/१८)**

**उत्सः - आलोच्यः सन्दर्भोऽयं शुक्लयजुर्वेदस्य** शतपथब्राह्मणान्तर्गतायाः बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य चतुर्थब्राह्मणात् आम्नातः।

**प्रसङ्गः** - अवाङ्मनसगोचरेण ब्रह्मणा चक्षुरादीनाम् इन्द्रियाणां प्रकाशनं विवृतमस्मिन् मन्त्रे।

KOUSIK PATRA

**व्याख्या - 'तस्य भासा सर्वमिदं विभाति'** जगज्जीवनं ब्रह्मणः अवभासम्। चक्षुप्रभृतीनि इन्द्रियाणि चैतन्यात्मज्योतिषा क्रियाशीलानि भवन्ति। स्वरूपतः इन्द्रियाणि सर्वाणि काष्ठलोष्ट्रवद् अचेतनानि। ब्रह्मशक्त्या शक्तिमन्तः सन्तु चक्षुरादयः स्व स्व कर्मसु प्रभवन्ति, एवञ्च प्राणापानादिपञ्चवृत्तिविशिष्टस्य प्राणस्य आत्मनाधिष्ठितस्यैव प्राणनम् उपपद्यते न तु आत्मनानधिष्ठितस्य। एवञ्च आत्माधिष्ठितानां चक्षुरादीनाम् इन्द्रियाणां दर्शनादिक्रियाः सम्पद्यन्ते। तेन च आत्मा चक्षुषश्चक्षुः, श्रोत्रस्य श्रोत्रम्, मनसश्च मनः भवति। ये च ब्रह्मविदः एवंविधं ब्रह्म वेदितुम् अर्हन्ति, ते सत्यं ज्ञानमनन्तं ब्रह्म विजानन्ति। प्रत्यगात्मा एव ब्रह्म इति ज्ञानं ब्रहह्मज्ञानम्। इत्थं ब्रह्म ज्ञात्वा साधकः ब्रह्मज्ञः भवति। उक्तञ्च मुण्डकोपनिषदि-

**'हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्।**

**तच्छुभ्रं ज्योतिषां ज्योतिस्तद् यदात्मविदो विदुः।।'**

---------

**मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन।**

**मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।। (४/४/१९)**

**उत्सः -** आलोच्यः सन्दर्भोऽयं शुक्लयजुर्वेदस्य शतपथब्राह्मणान्तर्गतायाः बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य चतुर्थब्राह्मणात् आम्नातः।

**प्रसङ्गः** - नानात्वदर्शिनः जनस्य दुर्गतिव्याख्यामुखेन ब्रह्मर्षिणा याज्ञवल्क्यपादेन अयं श्लोकः उक्तः।

**व्याख्या -** मनः हि ब्रह्मसाक्षात्कारे करणं भवति। गीताभाष्येऽपि उक्तम्- **'शास्त्राचार्योपदेशशमादिसंस्कृतं मनः आत्मदर्शने करणं भवति'** इति। किन्तु ब्रह्म हि श्रवाङ्मनसगोचरम्। तर्हि मनसः अगोचरब्रह्मविषये मनः कथं करणं भवेत्? एतस्योत्तरे वदति-मनः द्विविधं भवति - संस्कृतम् असंस्कृतं चेति। आचार्याणामुपदेशेन मनसः संस्कारत्वं साध्यते। श्राचार्योपदेशात् श्रवणमनननिदिध्यासेन मनः संस्कृतं भवति। कामसम्पृक्तं मनः असंस्कृतम्। संस्कृतं मनो ब्रह्मविषयीकर्तुं प्रभवति। पञ्चदशीग्रन्थे अपि मनसः स्वभावः उल्लिखितः -

**"मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च।**

**अशुद्धं कामसम्पर्काच्छुद्धं काम विवर्जितम्।।"**

आचार्योपदेशेन शास्त्रभक्त्या च सह मनः आत्मदर्शने प्रभवति। नानात्वं विहाय मनः तदा सर्वभूतेषु एकत्वमनुपश्यति। किन्तु अविद्यावशात् मनुष्यानां ब्रह्मणि ज्ञातृज्ञेयज्ञानादिभेदज्ञानं भवति। भेददर्शी मानवः पुनः पुनः जन्ममरणस्वभावे चक्रे आवर्तते। किन्तु आचार्योपदेशेन श्रुत्युपदेशेन च सुसंस्कृतं मनः अज्ञानावरणं विनश्य चैतन्यज्योतिराकारं प्राप्नोति। तेन च चैतन्यज्योतिषा आत्मज्योतिषा मनसा

ब्रह्मविज्ञानं सुकरं भवति इति।

--------

## Long Questions and Answers (दीर्घप्रश्नोत्तरमाला)

**१) जीवात्मन उत्क्रमणं वृहदारण्यकोपनिषद्दिशा प्रतिपादयत।**

**उत्तरम्** -

**भूमिका** - शुक्लयजुर्वेदस्य काण्वशाखायाः माध्यन्दिनशाखायाश्च शतपथब्राह्मणम् अतीव प्रसिद्धम्। शतपथब्राह्मणस्य सप्तदशकाण्डस्य शेषांशः भवति बृहदारण्यकोपनिषत्। षडध्यायात्मिकायाः बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य चतुर्थब्राह्मणं शारीरकब्राह्मणम् इति प्रसिद्धम्। अत्र शरीर भवः शारीरकः य आत्मा तद्विषयकम् आलोचनं विद्यते। विदेहापति जनकं प्रति आत्मतत्त्वोपदेशकाले ब्रह्मज्ञो याज्ञवल्क्यः मुमूर्षव्यक्तेः देहाद् जीवात्मन उत्क्रमणं प्रतिपादयामास। स एवांशः अत्र समासेन प्रस्तूयते।

**वृहदारण्यकोपनिषद्दिशा जीवात्मन उत्क्रमणम्** -

उपनिषत्प्रतिपाद्य आत्मा अजरः अमरः नित्यशुद्धबुद्धमुक्तस्वभावः निर्विशेषः निरुपाधिकः निर्गुणञ्च। स आत्मा सर्वव्यापी सर्वगामी चा आत्मा यद्यपि सर्वगतः तथापि तस्य एकस्माद् देहाद् देहान्तरगमने श्रुतिप्रमाणं विद्यते। वस्तुतः सर्वगतस्य अन्यत्र गतिः न सम्भवति, अतः अन्यत्र गमनम् अविद्यानिबन्धनमेवा आत्मा यदा शरीर विद्यते स हि जीवात्मा इत्युच्यते। वस्तुतः अयं जीवात्मा परमात्मा नित्यशुद्धबुद्धमुक्तस्वभावश्च अभिन्नः। परन्तु परमात्मा हि निरुपाधिकः भवति। अतस्तस्य उत्क्रमणं नास्ति। किन्तु जीवात्मा सोपाधिकः, अतस्तस्य उत्क्रान्तिः विद्यते एवा जीवात्मा शरीरी भवति। तस्य शरीरत्रयं स्थूलशरीरं लिशरीरं कारणशरीरं चा रक्तमांसास्थिप्रभूतिभिः विनिर्मितं पृथिव्यादिपञ्चभूतजातं पाञ्चभौतिकं शरीरं स्थूलशरीरम्। प्राणापानसमानोदानव्यानाः पञ्च प्राणाः, वाक्पाणिपादपायूपस्थानि पञ्च कर्मेन्द्रियाणि, चक्षुष्कर्णजिह्वानासिकात्वगाख्यानि पञ्च ज्ञानेन्द्रियाणि बुद्धिमनसी इत्येतेषां सप्तदशानाम् अवयवानां समन्वयेन रचितं शरीरं लिङ्गशरीरं सूक्ष्मशरीरं वा उच्यते। लिङ्गशरीरविषये पञ्चदशीकारः प्राह -

**"बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसधिया।**

**शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते।।" इति।**

मिथ्याभूतविश्वप्रपञ्चस्य कारणम् अज्ञानम्, तन्निष्ठं शरीरं कारणशरीरम्। त्रिविधशरीरमध्ये स्थूलशरीरं जननमरणाधीनम्। सूक्ष्मकारणशरीरे मुक्तिपर्यन्तम् अवतिष्ठते। वस्तुतः लिङ्ङ्गशरीरम् एव उपाधिः। लिङ्गशरीरोपहित आत्मा एव जीवात्मा, स हि भोगे प्रवर्तते। लिङ्गशरीरमादाय एव जीवात्मा

पापपुण्यभोगाय लोकान् गच्छति।

जराव्याध्यादिकारणवशाद् यदा स्थूलशरीरं जीर्णं भवति तदा जीवात्मा मुमूर्षः भवति। जीवात्मा तदा सप्तदशावयवात्मकं लिङ्गशरीरमादाय स्थूलदेहं त्यजति एतदेव जीवात्मन उत्क्रमणम् इति प्रसिद्धम्।

उत्क्रान्तिकाले मुमूर्षोः देहः दुर्बलः भवति। तदा वागादीनि इन्द्रियाणि तेषाम् अधिष्ठातृदेवताभावाद् आत्मानम् अभिगच्छति। आत्मा च एतानि इन्द्रियाणि स्वस्मिन् उपसंहृत्य हृदयाकाशे विराजते। आदित्यादयः देवाः चक्षुरादीन्द्रियाणाम् अधिष्ठातारः। आदित्यः तदा पराङ्गुखः भवति, अतः रूपादिविषयग्रहणे मुमूर्षुः अक्षमो भवति। अत एव समाम्नातं बृहदारण्यकोपनिषदि-

**"स यत्रायमात्मा नेत्य सन्मोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति, स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति, स यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्ततेऽथारूपज्ञो भवति।" इति।**

तदा चक्षुरादीनामिन्द्रियाणां लिङ्ङ्गशरीरेण सह एकीभवनात् तानि कार्याणि न कुर्वन्ति। तदा मुमूर्षोः हृदयस्य अग्रं नाडीमुखम् आत्मतेजसा प्रद्योतते। तेन आत्मज्योतिषा प्रकाशमानेन आत्मा मुमूर्षोः चक्षुरिन्द्रियाद् मूर्जः अन्येभ्यः शरीरावयवेभ्यो वा निर्गच्छति। आत्मनः उत्क्रान्तेः परं पञ्चवृत्त्यात्मकः प्राण. उत्क्रामति। ततः परं प्राणमुत्क्रामन्तम् अभिलक्ष्य वागादीनि इन्द्रियाणि अपि उत्क्रामन्ति। यदा सविज्ञान आत्मा परलोकं प्रस्थितो भवति तदा विद्याकर्मणी पूर्वप्रज्ञा च तम् अनुसरति। पूर्वप्रज्ञा नाम अतीतकर्मानुभवजनितवासना अर्थात् संस्कारः। संस्कारम् आश्रित्य एव देहान्तरं लभते। श्रीमद्भगवद्गीतायां भगवान् श्रीकृष्णः अस्मिन् प्रसङ्गे प्राह -

**“यं यं वापि स्मरन्भावं त्यजन्त्यन्ते कलेवरम्।**

**तं तमेवैति कौन्तेय सदा तद्भावभावितः।।" इति।**

जीवात्मनः देहान्तरप्राप्तविषये याज्ञवल्क्यमुखेन श्रुतिः दृष्टान्तं समाम्नाति -

**"तद्यथा तृणजलायुका तृणस्यान्तं गत्वान्यमाक्रममाक्रम्यात्मानमपु- संहरत्येवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वान्यमाक्रममाक्रम्यात्मानमुप- संहरति।"** इति।

यथा तृणजलूका एकस्य तृणस्य प्रान्तभागं गत्वा तृणान्तरम् अवलम्ब्य स्वशरीरपश्चाद्भागं पूर्वभागे प्रवेशयति तथैव अयम् आत्मा एक देहं त्यक्त्वा देहान्तरं आश्रित्य आत्मभावम् आरभते। अत्र भाष्ये शङ्कारचार्यः प्राह -

**"तत्र च देहनिर्गमनात् प्राक् हृदयस्था पूर्वप्रज्ञा यथा कर्म यथाश्रुत इव देहान्तरमारभते। निर्मिते देहान्तरे जीव उत्क्रामति।"** इति। देहान्तरप्राप्तौ दृष्टान्तान्तरं श्रीमद्भगवद्गीतायां प्रोक्तम्-

**"वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।**

KOUSIK PATRA

**तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नधानि देही।।" इति।**

बृहदारण्यकोपनिषदि पुनः जीवदेहनिर्माणदृष्टान्तः याज्ञवल्क्येन प्रदत्तः। यथा स्वर्णकारः पुरातनं सुवर्णांशं गृहीत्वा अतिशयेन प्रीतिप्रदम् अन्य रूपं निर्माति तथैव अयम् आत्मा इदं शरीरं विनाश्य विद्याकर्मपूर्वप्रज्ञासहित अभिनवं देहान्तरं निर्माति तच्च देहान्तरं पित्र्यं पितृलोकोपभोग्यं, गान्धर्वं गन्धर्वलोकोपभोग्य, दैवं देवलोकोपभोग्यं, प्राजापत्यं प्रजापतिलोकोपभोग्यं, ब्राह्मं ब्रह्मलोकोपभोग्यम् अन्येषां भूताना वा सम्बन्धि भवति।

जीवात्मा हि काममयः। स यथा कामनां करोति तथा सङ्कल्पः भवति। सङ्कल्पम् आश्रित्य कर्म करोति। यथा कर्म करोति तथा कर्मफलं प्राप्नोति।

यस्मिन् विषये मन निश्चयेन सक्तं भवति कामवान् आत्मा तत्फलप्राप्तये कर्म करोति। ततः तत्कर्मफलप्राप्तिः भवति। अतः काम एवं मूल संसारस्य। तथाहि समाम्नातं बृहदारण्यकोपनिषदि -

**"तदेव सक्तः सह कर्मणैति लिङ्गं मनो पत्र निषक्तमस्या**

**प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम्।।**

**तस्माल्लोकात्पुनरेत्यस्मै लोकाप कर्मणे।।" इति।**

**उपसंहारः** - अविद्याप्रभावाद् आसक्तमनसा कर्मकरणात् एव फलभोगः। फलभोगाच्च परं पुनः। इहलोकप्राप्तिः। एवं समासेन बृहदारण्यकोपनिषदिशा जीवात्मन उत्क्रमणं वर्णितम्।

-------------

KOUSIK PATRA

# SALTORA NETAJI CENTENARY COLLEGE

*(Affiliated to Bankura University)*

Saltora, 722158, Dist.- Bankura, West Bengal

## Model Questions and Answers

Semester-IV

Subject: B.A. SANSKRIT (Honours)

Course Code: AHSNS402C-9

Course Title: History of Indian Philosophy

Course Topic: Philosophy - Astika Philosophy

KOUSIK PATRA

Prepared by

Kousik Patra

Assistant Professor

Department of Sanskrit

Saltora Netaji Centenary College

E-mail ID : patrakousikjrf@gmail.com

Mobile No : 7872177720

## Long Question

**) न्यायदर्शने कानि प्रमाणानि स्वीकृतानि? न्यायदर्शनस्य प्रमाणतत्त्वं सविस्तृतम् आलोच्यताम्।**

**उत्तरम्- प्रमाणतत्त्वम्**

प्रमाणादेव प्रमेयसिद्धिः भवति। यथार्थानुभवसाधनं प्रमाणम्। न्यायनये प्रत्यक्षम्, अनुमानम्, उपमानं, शब्दः चेति भेदात् प्रमाणं चतुर्विधम्। एतैः प्रमाणैः च यथाक्रमं प्रत्यक्षम्, अनुमितिः, उपमितिः, शाब्दः च इति प्रमाचतुष्टयम् उत्पद्यते। प्रमा यथार्थः अनुभवः ज्ञानं वा।

### १) प्रत्यक्षम्

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् उच्यते। तच्च प्रत्यक्षं निर्विकल्पकं सविकल्पकञ्चेति भेदेन द्विविधम् अस्ति। निष्प्रकारकं ज्ञानं निर्विकल्पकं प्रत्यक्षम्, सप्रकारकं ज्ञानञ्च सविकल्पकं प्रत्यक्षम्। प्रत्यक्षज्ञानस्य करणं प्रत्यक्षप्रमाणम्। तच्च इन्द्रियमेव।

### १.१) सन्निकर्षः

इन्द्रियस्य अर्थेन विषयेण वा सह यः संसर्गः, सम्बन्धः, यद्वशाद् आत्मनि ज्ञानम् उत्पद्यते स सम्बन्धः एव सन्निकर्षः उच्यते। स च सन्निकर्षः लौकिकालौकिकभेदेन द्विविधः। लौकिक-सन्निकर्षः संयोगः, संयुक्तसमवायः, संयुक्तसमवेत-समवायः, समवायः, समवेतसमवायः, विशेष्यविशेषणभावश्चेति भेदेन षड्विधः। चक्षुषा घटप्रत्यक्षे संयोगः सन्निकर्षः। चक्षुषा घटरूपप्रत्यक्षे संयुक्तसमवायः सन्निकर्षः। चक्षुषा रूपत्वजातिप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः। श्रो१त्रेण शब्दप्रत्यक्षे समवायः सन्निकर्षः। श्रोत्रेण शब्दत्वप्रत्यक्षे च समवेतसमवायः सन्निकर्षः। चक्षुषा अभावप्रत्यक्षे विशेषविशेषणभावः सन्निकर्षः। अलौकिकञ्च सामान्यलक्षणं, ज्ञानलक्षणं, योगजञ्चेति भेदात् त्रिविधम्।

### १.२) कारणम्

कार्यनियतपूर्ववृत्ति कारणम्। कार्यञ्च प्रागभावप्रतियोगि। अर्थात् यत् कार्यात् पूर्वं नियमेन वर्तते तत् कारणमित्युच्यते। तच्च कारणम् अनन्यथासिद्धं भवति। समवायि असमवायि निमित्तञ्चेति भेदात् कारणञ्च त्रिविधम्। यत् समवेतं कार्यमुत्पद्यते तत् समवायि कारणम्। यथा तन्तवः पटस्य समवायि कारणम्। कार्येण कारणेन वा सह एकस्मिन्नर्थे समवेतत्वे सति यत् कारणं तद् असमवायिकारणम्। यथा पटं प्रति तन्तुसंयोगः असमवायिकारणं भवति। समवाय्यसमवायिकारणभिन्नं कारणं निमित्तकारणं भवति। यथा पटस्य निमित्तकारणं तुरीवेमादिकम्।

### २) अनुमानम्

अनुमितिकरणम् अनुमानम्। अनुमितिः परामर्शजन्यं ज्ञानम् अस्ति। व्याप्तिविशिष्टं पक्षधर्मताज्ञानं

KOUSIK PATRA

परामर्शः। 'यत्र यत्र धूमः (हेतुः) तत्र तत्र वह्निः (साध्यः) इति नियतसाहचर्यनियमः एव व्याप्तिः। वस्तुतः हेतुसाध्ययोः साहचर्यनियमः व्याप्तिः। यत् साध्यते अनुमीयते तत् साध्यम् (वह्निः)। साध्यसाधनं हेतुः (धूमः)। सन्दिग्धसाध्यवान् पक्षः (पर्वतादिः)। हेतोः (धूमस्य) पक्षवृत्तित्वं (पर्वतादिवृत्तित्वम्) पक्षधर्मता। वह्निव्याप्यः धूमः अस्मिन् पर्वते अस्ति (वह्निव्याप्यधूमवान् पर्वतः) इति परामर्शज्ञानम्। तस्मात् परामर्शज्ञानात् 'पर्वतः वह्निमान्' इति अनुमितिः उत्पद्यते। तस्याः अनुमितेः करणं प्राचीनन्यायनये (फलायोगव्यवच्छिन्नं कारणं करणम्) परामर्शः, नव्यन्यायनये (व्यापारवत् असाधारणं कारणं करणम्) च व्याप्तिस्मृतिः। अतः प्राचीनन्यायनये परामर्शज्ञानम् अनुमानं प्रमाणम्, नवीनन्यायनये च व्याप्तिस्मृतिः अनुमानं प्रमाणम्।

पूर्ववत्, शेषवत्, सामान्यतोदृष्टम् इति भेदेन अनुमानं त्रिविधम्। कारणात् कार्यस्य अनुमानम् पूर्ववत् अनुमानं, यथा- वृष्टिर्भवेत् मेघस्य सजलत्वात्। कार्यं दृष्ट्वा कारणस्य अनुमानम् शेषवत् अनुमानं, यथा- वृष्टिर्जाता नद्या वर्धितजलवतीत्वात्। येन परोक्षवस्तुनः हि सामान्यतया ज्ञानं भवति तत् सामान्यतोदृष्टम्', यथा- आम्रवृक्षा मञ्जरीवन्तोऽस्याम्रवृक्षस्य उद्गत-मञ्जरीवत्वात्।

प्रयोजनाधारेण अनुमानं स्वार्थानुमानं परार्थानुमानञ्चेति भेदेन द्विविधम्। स्वसंशयनिरसनार्थं क्रियमाणमनुमानं स्वार्थानुमानम् अपि च परशङ्का-निरसनार्थं विधीयमानम् अनुमानं परार्थानुमानम् इति उच्यते। किंवा स्वान्तःप्रतिपत्त्यर्थं स्वार्थानुमानं परप्रतिपत्त्यर्थं च परार्थानुमानं प्रयुज्यते, इत्यपि वक्तुं शक्यते। स्वार्थानुमानस्थले हेतुं लिङ्गञ्च दृष्ट्वा साध्यं निश्चीयते। परार्थानुमाने तु प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनाख्य-पञ्चावयववाक्यानां प्रयोगः निधीयते।

नव्यनैयायिकाः अनुमानस्य प्रभेदान् एवं मन्यन्ते- केवलान्वयि, केवलव्यतिरेकि, अन्वयव्यतिरेकि च। अन्वयस्य अर्थः भवति 'साहचर्यम्' इति। व्यतिरेकस्य च अर्थः अविनाभावः इति। 'यत्र धूमस्तत्राग्निः' इत्यन्वयस्य स्वरूपं अपि च 'यत्राग्निः न, तत्र धूमोऽपि न' (इदं न तर्हि इदम् अपि न) इत्येतद् व्यतिरेकस्य स्वरूपं भवति।

### ३) <u>उपमानम्</u>

उपमितिकरणम् उपमानं प्रमाणम्। संज्ञासंज्ञिनोः सम्बन्धज्ञानम् उपमितिः। गवादिप्रसिद्धवस्तुनः साधर्म्यात् गवयाद्यप्रसिद्ध-वस्तुविषयकं यद् ज्ञानम् उपलब्धं भवति तद् 'उपमितिः' इति उच्यते। उपमितेः साधनं यत् तदेव उपमानं प्रमाणम्।

प्राचीनन्यायनये अतिदेशवाक्यार्थस्मरणम् उपमानं प्रमाणम्, नवीनन्यायनये च सादृश्यज्ञानम् उपमानं प्रमाणम्, अतिदेशवाक्यार्थस्मरणं च व्यापारः।

### ४) <u>शब्दः</u>

आप्तवाक्यं शब्दः। वस्तुनः यथार्थरूपवेत्ता आप्तः इति उच्यते। सः हि भ्रमादिदोषशून्यः। तस्य यद्

वाक्यं तदेव शब्दः, तदेव प्रमाणम्।

प्राचीनन्यायनये पदार्थज्ञानं (स्मरणात्मकम्) शब्दप्रमाणं, नवीनन्यायनये च पदज्ञानम् (स्मरणात्मकम्) इति ज्ञेयम्। शब्दप्रमाणं दृष्टार्थम् अदृष्टार्थञ्चेति द्विविधम्। लौकिकविषये दृष्टार्थम्, अलौकिकविषये च अदृष्टार्थम्।

------

## २) सांख्यदर्शनस्वीकृतानि पञ्चविंशति तत्त्वानि आलोच्यन्ताम्।

**उत्तरम्-** सांख्यदर्शने प्रतिपाद्यविषयः 'तत्त्वम्' इति अभिधीयते। तत्त्वं जगतः मौलिकोपादानम् इति मन्यते। द्वैतवादिनि सांख्यदर्शने मूलभूतसिद्धान्तद्वयं स्वीकृतम् - नित्यप्रतिकृतिः नित्यपुरुषश्चेति।

प्रकृतिः त्रिगुणात्मिका, अविवेकी, विषया, सामान्या, अचेतनात्मिका, जननात्मिका च। अन्येषु दर्शनेषु यत् प्रायः आत्मा इति पदेन निर्दिश्यते, तत् सांख्यदर्शने पुरुषपदेन निर्दिश्यते। पुरुषः प्रकृतेः विपरीतः अर्थात् अत्रिगुणः, विवेकी, अविषयः, असामान्यः, चेतनः, अप्रसवधर्मी -

**"त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।**

**व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्॥" (सांख्यकारिका -११)**

अत्रिगुणत्वं, विवेकीत्वम्, अविषयत्वम्, असामान्यमानत्वं, चेतनत्वम्, अप्रशवधर्मीत्वं च एतेषु धर्मेषु चेतनत्वधर्मेण अविषयत्वधर्मेण च पुरुषस्य साक्षीत्वं द्रष्टत्वं च सिद्ध्यति। यतः चेतनः एव द्रष्टा भवति अचेतनः न द्रष्टा भवति। अन्यः यं स्वविषयं प्रदर्शयति, यस्य दर्शने स्वकीया क्रिया नास्ति सः साक्षी उच्यते। यदा प्रकृतिः पुरुषस्य समक्षं स्वस्वरूपम् उपस्थापयति तदा पुरुषः केवलं तत् प्रकृतिरूपं पश्यति। अत्रिगुणत्वात् पुरुषस्य कैवल्यः सिद्धः भवति। दुःखस्य ऐकान्तिकः आत्यन्तिकः च अभावः एव कैवल्यम्। कैवल्यं पुरुषस्य स्वाभाविकः धर्मः। अत्रिगुणत्वस्य कारणात् पुरुषः मध्यस्थः अर्थात् तटस्थः उदासीनः वा उच्यते। फलतः यद्यपि पुरुषः प्रकृतेः रूपदर्शने साक्षी भवति, परन्तु पुरुषः स्वाभाविकतया उदासीनः भवति। विवेकीत्वेन च अप्रशवधर्मीत्वेन च पुरुषः अकर्ता इति सिद्ध्यति -

**"तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य।**

**कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च॥" (सांख्यकारिका -१९)**

संघातपरार्थत्वात्, त्रिगुणादिविपर्ययात्, अधिष्ठानात्, भोक्तृभावात्, कैवल्यार्थं प्रवृत्तेः च पुरुषोऽस्ति इति सिद्धम् -

**"सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।**

KOUSIK PATRA

**पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च॥" (सांख्यकारिका -१७)**

संख्यानुसारं पुरुषाः संख्यायां बहवः सन्ति। जन्ममरणकरणानां प्रतिनियमात्, अयुगपत्प्रवृत्तेः, त्रैगुण्यविपर्ययात् च पुरुषस्य बहुत्वं सिद्ध्यति -

**"जन्ममरणकरणानां प्रतिनियमादयुगपत्र्धवृत्तेश्च।**

**पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव॥" (सांख्यकारिका -१८)**

पुरुषस्य संयोगात् अचेतनः महदादिः चेतन्यवत् प्रतिभाति, त्रिगुणस्य आधिपत्यात् च उदासीनः पुरुषः कर्तारूपेण प्रतिभाति।

अविवेकवशात् पुरुषः बद्धावस्थाप्राप्तः भवति। अतः बद्धावस्थाप्राप्तः पुरुषः अविवेकी इति वक्तुं शक्यते। पुरुषस्य अविवेकः विनश्यति, तस्य विनाशेन पुरुषः मोक्षं कैवल्यं वा प्राप्नोति।

पुरुषविमोक्षाय अपि च प्रधानभोगाय तथा मूलप्रकृतेः दर्शनाय च पङ्ग्वन्धवद् उभयोरपि संयोगः सिद्ध्यति। पुरुषस्य प्रकृतेः च सम्बन्धस्य कारणात् महदादेः व्यक्तस्य जगतः सृष्टिः भवति -

**"पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रदानस्य।**

**पङ्ग्वन्धवदुभयोरपि संयोगस्ततकृतः सर्गः॥" (सांख्यकारिका -२१)**

प्रकृतिपुरुषयोः सम्बन्धस्य परिणामेण साक्षात्सम्बन्धेन परम्परया वा साकल्येन त्रयविंशतिविधानि तत्त्वानि उत्पद्यन्ते। ईश्वरकृष्णस्य सांख्यकारिकायाः द्वाविंशतितमकारिकायाम् एषः उत्पत्तिक्रमः यथा दर्शितः –

**"प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः।**

**तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि।"" (सांख्यकारिका-२२)**

अर्थात् प्रकृत्याः महत्, महतः अहंकारः, अहंकारात् षोडश विकाराः (नेत्र-कर्ण-नासिका-जिह्वा-त्वगाख्यानि पञ्चज्ञानेन्द्रियाणि; वाक्-पाणि-पाद-पायु-उपस्थाख्यानि पञ्चकर्मेन्द्रियाणि), उभयेन्द्रियं च मनः - एतानि एकादशेन्द्रियाणि; तथा गन्ध-रस-रूप-स्पर्श-शब्दाख्यानि पञ्चतन्मात्राणि वा पञ्चसूक्ष्मभूतानि) तथा गन्ध-रस-रूप-स्पर्श-शब्दाख्येभ्यः पञ्चतन्मात्रेभ्यः पञ्चसूक्ष्मभूतेभ्यः खितिः पृथिवी वा, अप् जलं वा, तेजः अग्निः वा, मरुत् वायुः वा, आकाशं व्योम् वा) इति पञ्चमहाभूतानि उत्पद्यन्ते। फलतः सांख्यदर्शने साकल्येन पञ्चविंशतिः तत्त्वानि ज्ञायन्ते। एतानि तत्त्वानि 'पञ्चविंशतितत्त्वम्' इति नाम्ना दार्शनिकजगति अभिधीयते। ईश्वरकृष्णस्य सांख्यकारिकायाः तृतीयायां कारिकायां सांख्यविषयत्वेन एतानि पञ्चविंशतितत्त्वानि उल्लिखितानि सन्ति -

KOUSIK PATRA

**"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।**

**षोडकस्तु विकारो न प्रकृतिर्नविकृतिः पुरुषः॥" (सांख्यकारिका -३)**

मूलप्रकृतिः अविकृतिः अर्थात् न कस्यचित् तत्त्वस्य विकारः कार्यं वा। महादादीनि सप्ततत्त्वानि (महत्, अहङ्कारः गन्ध-रस-रूप-स्पर्श-शब्दाख्यानि पञ्चतन्मात्राणि च) युगपत् प्रकृतयः (एकस्य तत्त्वस्य कारणानि) विकृतयः (अन्यतत्त्वस्य कार्याणि च। षोडश तत्त्वानि (एकादशेन्द्रियाणि-पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि च उभयेन्द्रियं मनः पञ्चमहाभूतानि च) केवलं विकृतयः (कस्यचित् तत्त्वस्य कार्याणि)। पुरुषः न प्रकृतिः (न कस्यचित् तत्त्वस्य कारणं) न विकृतिः (न च अन्यस्य तत्त्वस्य कार्यम्)। वाचस्पतिमिश्रः स्वस्य 'सांख्यतत्त्वकौमुदी' इति ग्रन्थे ईश्वरकृष्णस्य तृतीयायाः कारिकायाः व्याख्याप्रसङ्गे आह - **"संक्षेपतो हि शास्त्रार्थस्य चतस्रो विधाः। कश्चिदर्थः प्रकृतिरेव, कश्चिदर्थो विकृतिरेव, कश्चित् प्रकृतिविकृतिरेव कश्चिदनुभयरूपः।"**

अर्थात् सांख्यशास्त्रस्य पञ्चसविंशतितत्त्वं संक्षेपेण चतुर्विधम् - (१) किञ्चित् तत्त्वं केवलं प्रकृतिः (कारणम्) - **मूला प्रकृतिः**, (२) किञ्चित् तत्त्वं केवलं विकृतिः (कार्यम्) - **एकादशेन्द्रियाणि पञ्चमहाभूतानि च**, (३) किञ्चित् तत्त्वं प्रकृतिः (कारणम्) अपि च विकृतिः (कार्यम्) उभयात्मकम् - **महत् बुद्धिः वा, अहंकारः, पञ्चतन्माणि च,** (४) किञ्चिदपि तत्त्वं न प्रकृतिः (न कारणं), न विकृतिः (न कार्यम्) - **पुरुषः ज्ञः वा।**

दिक्, कालः चेति सांख्यदर्शने पृथक् तत्त्वरूपेण न स्वीक्रियते, यतः सांख्यनये एतत् द्वयम् आकाशस्य अन्तर्गतम् - **"दिक् कालाकाशादिभ्यः .............।"**

अथ प्रश्नः उत्पद्यते यत्, प्रकृतिः इत्यादयः किमर्थं 'तत्त्वानि' इति उच्यन्ते? यद्यपि सांख्यकारिकायाम् अस्मिन् विषये किमपि न उक्तं, परन्तु युक्तिदीपिकायाम् अस्मिन् विषये संक्षिप्तप्रकाशः दत्तः। तत्र उच्यते यत्, वस्तुनः मूर्तावस्थातः अमूर्तावस्थायां परिणतिः द्विविधा भवति। तत्त्वानि सृष्ट्याः विनाशपर्यन्तं मूर्तरूपेण तिष्टन्ति। पक्षान्तरे अन्ये तु पदार्थाः किञ्चित्कालं यावत् मूर्तावस्थां लब्ध्वा अपि अमूर्तावस्थायां परिणम्यन्ते। एतत् तत्त्ववर्णनं महदादिषु त्रपविंशतितत्त्वेषु प्रवर्तते, न तु प्रकृतिपुरुषयोः। प्रकृतिपुरुषौ नित्यत्वात् प्रलयकालेऽपि तिष्ठतः। अत एव वक्तुं शक्यते यत्, यत् प्रलयकालपर्यन्तं तिष्ठति अपि च जीवकूलस्य सुखोपभोगं उत्पादयति - तत् तत्त्वम्। अपि च व्युत्पत्तिदृष्ट्या 'तत्त्वम्' इति शब्दः 'तन्' धातुतः निष्पद्यते। अस्य 'तन्' धातोः अर्थात् वक्तुं शक्यते यत्, **'तनु विस्तारे'** यत् दूरगामि चिरस्थायि तत् तत्त्वम्, यत् लक्षयोजनं यावत् स्थितं, प्रलयकालपर्यन्तं स्थास्यति च तत् तत्त्वम्। अस्मिन् सन्दर्भे डॉ. पुलिनबिहारी चक्रवर्ती महाशयः एकस्य अज्ञातस्य आचार्यस्य उल्लेखं कृत्वा अवदत् यत्,

**"तदुक्तं गुरुदेवाचार्येण -**

KOUSIK PATRA

**तत्त्वात् सन्तत्वाच्च तत्त्वानिति तत्त्वविदुः।**

**तत्त्वं देशतो वाप्तिः सन्तत्वञ्च कालतः।**

**लक्षदियोजनव्यापि तत्त्वं मा प्रलयात् स्थितम्।**

**अन्यथा स्तम्भकुस्तादिरपि तत्त्वं प्रसज्यते।।"**

**-----**

**३) सांख्यदर्शननये दुःखं कतिविधम्? कानि च तानि? दुःखनिवृत्तेरुपायः आलोच्यताम्।**

**उत्तरम्-** जगति दुःखम् चरमं सत्यम् एव इति मन्यते, जीवानां तदेव दुःखं संख्यातीतम्। दुःखं त्रिविधम् - आध्यात्मिकम्, आधिदैविकम्, आधिभौतिकं चेति। शरीरमनःजातानि दुःखानि आध्यात्मिकदुःखानि। व्याधिजनितानि कष्टानि शारीरिकदुःखानि, अपमानतिरस्कारादीनि मानसिकदुःखानि। सर्पादिभ्यः दस्युतस्करादिभ्यः च समुद्भूतानि दुःखनि आधिभौतिकदुखरूपेण गण्यन्ते। देवानाम् अभिसम्पादवशात् प्राकृतिकविपर्ययवशात् च समुद्भूतानि दुखनि आधिदैविकदुःखरूपेण गण्यन्ते।

जीवानां सर्वाणि एव दुःखानि एतेषु त्रिविधेषु दुःखेषु एव अन्तर्भुक्तानि भवन्ति। एतैः त्रिविधदुःखैः पीडितत्वत् जीवस्य दुःखत्रयस्य विनाशकोपाये जिज्ञासा उद्भावति।

दुःखात् निवृत्तिलाभार्थं ये खलु लौकिकाः उपायाः परिदृष्यन्ते ते तु न अवश्यम्भाविनः ऐकान्तिकाः आत्यन्तिकाः च। दुःखं यदि न स्यात् नित्यं वा, तर्हि तस्य निवृत्तेः उपायाः न तिष्ठन्ति। कितु दुःखं भवति अनित्यं च सत्यं तस्य विनाशस्य उपायाः सन्ति इति मन्यते। अतः शास्त्रोक्तदुःखस्य समुच्छेदस्य जिज्ञासा यथोपयुक्ता इति सत्यम् -

**"दुःखत्रयाभिघाताद् जिज्ञासा तदपघातके हेतौ।**

**दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात्॥" (सांख्यकारिका -१)**

दुःखात् मुक्तिलाभाय द्वौ उपायौ आस्ताम् इति ऐकान्तिकः आत्यन्तिकः च। दुःखस्य अवश्यतया विनाशः ऐकान्तिकः इति कथ्यते। परन्तु विनाशात् परं दुःखस्य पुनरागमनस्य अभावः आत्यन्तिकः इति कथ्यते। दृष्टोपायैः दुःखस्य विनाशः कथमपि न सम्भवति। अपि च अदृष्टोपायेन आनुश्रविकोपायेन वा दुःखस्य विनाशः कथमपि न सम्भवति इति सर्वजनस्य सिद्धान्तः। यागदिरूपोपायः आनुश्रविकः श्रुतिः वा। सः हि अविशुद्धिक्षयातिशययुक्तः। श्रुत्याम् उक्तम् - 'स्वर्गकामो यजेत।' किन्तु किमपि यज्ञकर्म मुहूर्तसाध्यं, किमपि अहोरात्रसाध्यं, किमपि वा संवत्सरसाध्यम्। एतस्मात् कारणात् ईदृशं यज्ञकर्म आत्मज्ञानं तथा व्यक्ताव्यक्तज्ञविवेकज्ञानम् उत्पादयितुं न शक्नोति। किन्तु केवलं आत्मज्ञानं तथा व्यक्ताव्यक्तज्ञविवेकज्ञानम् इति दुःखस्य

KOUSIK PATRA

चिरविनाशां कर्तुं शक्नोति इति संशयः नास्ति। अपि च 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इति शास्त्रवचनेन मुक्तिलाारूपस्य पुण्यस्य विनाशः अवश्यम्भावी इति सत्यमेव। अतः दृष्टवदानुश्रविकोपायैः ऐकान्तिकी आत्यन्तिकी च दुःखनिवृत्तिः न सम्भवति। अतः व्यक्ताव्यक्तज्ञानां विवेकज्ञानेन एव ऐकान्तिकी आत्यन्तिकी च दुःखनिवृत्तिः सम्भवति - इति शास्त्रस्य सिद्धान्तः -

**"दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः।**

**तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्॥" (सांख्यकारिका-२)**

व्यक्तं च अव्यक्तं च ज्ञश्च तेषां समाहारः 'व्यक्ताव्यक्तज्ञाः' इत्येषां विज्ञानम् इति 'व्यक्ताव्यज्ञविज्ञानम्', तस्मात् व्यक्ताव्यक्तज्ञविज्ञानात् दुःखत्रयनिवृत्तिः। अत्र महदादिभूतपर्यन्तं समग्रप्रपञ्चं व्यक्तम्, मूलप्रकृतिस्तु अव्यक्तं सैव प्रधानमित्युच्यते, ज्ञश्च पुरुषः। एतेषां विवेकेन दुःखत्रयस्य आत्यन्तिकैकान्तिकनिवृत्तिः। अयम् एव अपवर्गः मोक्षः वा सांख्यदर्शनस्य परमप्रयोजनम् अस्ति।

--------

**४) योगदर्शनस्य अष्ट योगाङ्गानि आलोच्यन्ताम्।**

**उत्तरम्-** निर्विकारत्वादि-हेतोः योगदर्शनं यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयश्चेति अष्टसाधनानि निदधाति - **"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि।"(योगसूत्रम् -२/२९)**

तानि इमानि सन्ति -

**क) यमः** - तत्र अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रह-भेदेन यमः पञ्चविधः - **"अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः।"(योगसूत्रम् -२/३०)**

**i) अहिंसा** - परपीडनाभावः अहिंसा इति कथ्यते। अहिंसकं प्रति न कोऽपि प्राणी वैरी भवति। सर्वेऽपि प्राणिनः तस्मिन् वैररहिताः भवन्ति - **"अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः।"(योगसूत्रम् -२/३५)**

**ii) सत्यम्** - कीदृशस्यापि असत्यस्य अभाषणं सत्यम् इति कथ्यते। सत्यभाषणेन वाणी अमोघा भवति। सत्यभाषी यद् वदति तस्य प्रकाशनमात्रेण फलोपलब्धिः जायते- **"सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्।"(योगसूत्रम् -२/३६)**

**iii) अस्तेयम्** - चौर्यकर्मणः त्यागः अस्तेयम् इति कथ्यते। अस्तेयात् सर्वसम्पदां सर्वरत्नानां वा लाभः भवति। अस्तेयसाधकः कुत्रापि रागी नैव भवति, तदभावात् असौ तु सम्पदा रत्नेन वा स्वयमेव मृग्यते - **"अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्।"(योगसूत्रम् -२/३७)**

KOUSIK PATRA

**iv) ब्रह्मचर्यम्** - उपस्थेन्द्रियसंयमः ब्रह्मचर्यम् इति कथ्यते। विषय-वासनानां दिशं प्रति न गमनं ब्रह्मचर्यम् इति गीयते। ब्रह्मचर्येण शारीरिकं मानसिकम् आत्मिकञ्च बलम् एधते - **"ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः।"(योगसूत्रम् -२/३८)।** तत्साहाय्येन योगे अन्तरायमन्तरोन्नतिर्भवति।

**v) अपरिग्रहः** - लोभात् परेषाम् अन्येषां वा वस्तुनः अपरिग्रहणम् 'अपरिग्रहः' इति कथ्यते। अपरिग्रहात् भूत-भावि-जन्म-ज्ञानमुत्पद्यते। विगतकाले मम जन्म कीदृशम् आसीत् ? कुत्र च अहम् आसम् ? अपि च आगामिनि जन्मनि कोऽहं भविष्यामि ? कुत्र च तद् भवेद् ? इति एतत् सर्वम् अपरिग्रही वेत्ति।

**ख) नियमः** - शौच-सन्तोष-तपः-स्वाध्याय-ईश्वरप्रणिधान-भेदेन नियमः पञ्चविधः- **"शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः।"(योगसूत्रम् -२/३२)**

**i) शौचम्** - बाह्याभ्यन्तरशुद्धिः **'शौचम्'** इति कथ्यते। बहिःशुद्धिस्थैर्य्यात् स्वशरीरे घृणा उत्पद्यते। अतः परकीयशरीरैरस्पर्शो भवति। शैचात् सत्त्वशुद्धिः चित्तशुद्धिर्वा, सौमनस्यम्, ऐकाग्र्यम्, इन्द्रियजयः, आत्मदर्शनयोग्यत्वम् उपजायते।

**ii) सन्तोषः** - समुचितोद्योगेन यथाप्राप्ते वस्तुनि सतुष्टिः **'सन्तोषः'** इति कथ्यते। सन्तोषात् निरतिशयानन्दप्राप्तिर्भवति।[१६३]

**iii) तपः** - सुखदुःखशोकहर्षादिद्वन्द्वसहिष्णुता **'तपः'** इति कथ्यते। अनुष्ठियमानात् तपसः अशुद्धिक्षयात् अधर्मादिविनाशात् वा अणिमाद्या कायसिद्धिः, दूरदर्शनाद्या इन्द्रियसिद्धिश्च भवति।

**iv) स्वाध्यायः** - नियमपूर्वकं मोक्षशास्त्राणाम् अध्ययनं **'स्वाध्यायः'** इति कथ्यते। स्वाध्यायात् इष्टदेवतादर्शनं भवति।

**v) ईश्वरप्रणिधानम्** - तस्मै परमगुरवे स्वकीयम् सर्वार्पणम् ईश्वरध्यानं वा **'ईश्वरप्रणिधानम्'** इति कथ्यते। ईश्वरप्रणिधानात् समाधिसिद्धिः योगनिष्पत्तिर्वा भवति।

**ग) आसनम्** - स्थिरतया दीर्घकालं यावत् सुखेन निषदनम् आसनम् इति कथ्यते - **"स्थिरसुखमासनम्।" (योगसूत्रम्-२/४६)।** पद्मासन-सिद्धासन-शीर्षासनादीनि योगासनानि अत्र संगृह्यन्ते। योगासनैः कायरोगचिकित्सापि सञ्जायते।

**घ)प्राणायामः** -बाह्यवायोः आचमनं श्वासः, अन्तर्गतवायोः निःसारणं च प्रश्वासः, तयोः श्वासप्रश्वासयोः गतिविच्छेदः प्राणायामः इति कथ्यते - " **तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः।"(योगसूत्रम्-२/४९।** सः च पूरक-रेचक-बाह्यकुम्भक-आभ्यन्तरकुम्भकभेदात् चतुर्विधः। **पूरकः** गृहीतश्वासस्य अन्तर्निरोधः। **रेचकः** अन्तर्गतप्रश्वासस्य बहिर्निरोधः। **बाह्यकुम्भकः** बहिर्निरुद्धस्य वायोः बहिरेव यावच्छक्यं निरोधः। **आभ्यन्तरकुम्भकः** अन्तर्निरुद्धस्य वायोः अन्तरेव

KOUSIK PATRA

यावच्छक्यं निरोधः। प्राणायामेन शरीरमलप्रक्षयः, शरीरशुद्धिः, नैरोग्यं च भवति।

**ङ) प्रत्याहारः** - इन्द्रियाणां स्वविषयेभ्यः निवृत्तिः अन्तर्मुखी वृत्तिश्च प्रत्याहारः इति कथ्यते। **"स्वविषज्ञयासम्प्रयोगे चित्तस्य स्वानुकार इवेन्द्रियाणां प्रत्याहारः।" (योगसूत्रम्-२/५४)।** एतस्माद् इन्द्रियाणां परमं वशित्वम् उपपद्यते।

यमादीनि पञ्च योगाङ्गानि बहिरङ्गसाधनानि मन्यन्ते, धारणा-ध्यान-समाधयश्चेति त्रयः अन्तरङ्गसाधनानि इति।

**च) धारणा** - हृदयकमले, नासिकाग्रे, भ्रूमध्ये, अन्यत्र वा कस्मिंश्चित् निर्दिष्टे स्थाने चित्तस्य एकाग्रता धारणा इति कथ्यते- **"देशबन्धश्चित्तस्य धारणा।"(योगसूत्रम्-३/१)।** धारणया मनसः निग्रहः, एकाग्रतया विषयैक्ये मनसः अभिरुचिश्च प्रवर्तते।

**छ) ध्यानम् -** एकाग्रीकृते चित्ते ध्येयस्य वस्तुनः एकाकाररूपेण प्रवाहः ध्यानम् इति कथ्यते- **"तत्र प्रत्ययैकतानता ध्यानम्।"(योगसूत्रम्-३/२)।** एकस्यैव वस्तुनः ऐकाग्रेण चेतसा चिन्तनं तल्लीनत्वं च ध्यानम् इत्यनेन संसूच्यते।

**ज) समाधिः -** सम्यग् अधीयते एकाग्रीक्रियते विक्षेपान् परित्यज्य मनः यत्र स समाधिः। यदा ध्यानं ध्येयाकाररूपं स्वरूपशून्यमिव वा भवति तदा समाधिः इति कथ्यते- **"तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।"(योगसूत्रम्-३/३)।** समाध्यवस्थायां ध्यान-ध्यातृ-ध्येयानाम् एकरूपता संपद्यते।

धारणा-ध्यान-समाधयः त्रयमेतत् 'संयमः' इति कथ्यते **-"त्रयमेकत्र संयमः।" (योगसूत्रम्-३/४)।** संयमस्य वशीकरणेन विवेकख्यातेः तत्त्वज्ञानस्य वा समुदयः सञ्जायते।

एवम् अष्टाङ्गयोगसाधनेन साधकः स्वचित्तवृत्तिनिरोधाद् ऐकान्तिकम् आत्यन्तिकं च सुखं विन्दति मोक्षं च अधिच्छति।

**--------**

## Short Note: <u>असत्कार्यवादः</u>

नैयायिकाः असत्कार्यवादिनः। तेषां नये कार्यम् उत्पत्तेः प्राक् तदीये उपादानकारणे असत् अर्थात् न तिष्ठति। घटकार्यम् उत्पत्तेः प्राक् घटकारणे मृत्तिकायां कदापि न तिष्ठति। कार्यं कारणात् भिन्नमेव। असत्कार्यवादानुसारेण सतः कारणात् असतः कार्यस्य उत्पत्तिः भवति। कार्योत्पत्तेः प्राक् सति उपादानकारणे असतः कार्यस्य या उत्पत्तिः सा 'आरम्भः' इति कथ्यते। जगतः उपादानकारणं परमाणुसमूहः सत् अर्थात् नित्यम्। परमाणुतः द्व्यणुकादेः उत्पत्तिः भवति। द्व्यणुकादिकं कार्यजातम् उत्पत्तेः प्राक् नास्ति। विनाशात् अनन्तरं न च स्यात्। अतः न्यायनये सतः कारणादेव असत् कार्यं

KOUSIK PATRA

जायते। एष एव असत्कार्यवादः आरम्भवादस्य मूलम्। महर्षिणा गौतमेन अपि उच्यते यत्, यतः कार्यस्य उत्पत्तिविनाशौ प्रत्यक्षसिद्धौ अतः कार्यम् असदेव।

--------

### Short Note: <u>न्यायदर्शनदिशा मोक्षः अपवर्गः वा</u>

पुरुषार्थचतुष्टये मोक्षः परमः पुरुषार्थः। स हि मोक्षः निःश्रेयसं, मुक्तिः, अपवर्गः, निर्वाणम् इत्यादिभिः पदैः कथ्यते। मोक्षलाभार्थमेव न्यायदर्शनस्य प्रवृत्तिः भवति।

अतः प्रमाणादीनां षोडशपदार्थानां तत्त्वज्ञानात् निःश्रेयसलाभः भवति इति न्यायदर्शनस्य आदिमसूत्रे उच्यते। तच्च निःश्रेयसम् अपवर्गः वा द्वादशविधेषु प्रमेयेषु अन्यतमम्। दुःखस्य आत्यन्तिकी निवृत्तिः मोक्षः, अपवर्गः, निःश्रेयसं वेति। दुःखानां कारणं जन्म पुनरुत्पत्तिर्वा। अतः पुनर्जन्मविनाशे सर्वेषां दुःखानाम् आत्यन्तिकी निवृत्तिः सम्भवेत्। जन्मनः कारणं तावत् प्रवृत्तिः। प्रवृत्त्या एव शुभाशुभानि कर्मफलानि उत्पद्यन्ते। तेषां कर्मफलानां भोगार्थं पुनर्जन्म भवति। प्रवृत्तेश्च कारणानि रागद्वेषमोहादिदोषाः। दोषाणां च कारणं देहादौ आत्माभिमानरूपं मिथ्याज्ञानम्। अतः मिथ्याज्ञाननाशे दोषनाशः, दोषनाशे प्रवृत्तिनाशः, प्रवृत्तिनाशे जन्मरोधः, जन्मरोधे च दुःखनाशः, दुःखस्य आत्यन्तिक्यां निवृत्तौ च मोक्षः, अपवर्गः, निःश्रेयसं वा स्यात्। अतः गौतमेन द्वितीये न्यायसूत्रे मोक्षलाभस्य क्रमः निर्दिष्टः।

--------

### Short Note: <u>न्यायदर्शनसम्मतं द्वादशप्रमेयतत्त्वम्</u>

न्यायदर्शने आत्मा, शरीरम्, इन्द्रियम्, अर्थः, बुद्धिः, मनः, प्रवृत्तिः, दोषः, प्रेत्यभावः, फलम्, दुःखम्, अपवर्गश्चेति द्वादश प्रमेयाणि स्वीकृतानि।

**१. आत्मा** - आत्मा सर्वस्य द्रष्टा, सर्वस्य भोक्ता, सर्वज्ञः, सर्वानुभावी च। इच्छा, द्वेषः, प्रयत्नः, सुखं, दुःखं, ज्ञानं चेति आत्मनः गुणाः।

**२. शरीरम्** - शरीरं खलु आत्मनः भोगायतनम्। तत् च चेष्टेन्द्रियार्थानाम् आश्रयस्थलम्।

**३. इन्द्रियाणि** - भोगसाधनानि पञ्चभूतजन्यानि घ्राणादीनि पञ्च इन्द्रियाणि सन्ति।

**४. अर्थाः** - गन्धः, रसः, रूपं, स्पर्शः, शब्दः चेति पृथिव्यादिगुणाः भोग्यविषयाः अर्थाः भवन्ति।

**५. बुद्धिः** - बुद्धिः उपलब्धिः ज्ञानम् अस्ति।

**६. मनः** - मनः अन्तःकरणम् अन्तरिन्द्रियम् अस्ति। युगपत् ज्ञानानाम् अनुत्पत्तिः मनसः अनुमापकम्।

KOUSIK PATRA

**७. प्रवृत्तिः** - वाचिकं मानसिक तथा शारीरिकं कर्म प्रवृत्तिः भवति।

**८. दोषः** - रागः, द्वेषः, मोहः चेति प्रवृत्तिकारणं दोषः भवति।

**९. प्रेत्यभावः** - मरणात् परं पुनर्जन्म प्रेत्यभावः।

**१०. फलम्** - प्रवृत्तिदोषजातः अर्थः फलम्।

**११. दुःखम्** - पीडालक्षणं दुःखम्। दुःखानुषङ्गञ्च दुःखम्।

**१२. अपवर्गः** - दुःखात् जन्मनः आत्यन्तिकी विमुक्तिः अपवर्गः।

अत्र उक्तानि द्वादश प्रमेयाणि व्यतिरिच्य संशयादयः ये पदार्थाः भवन्ति, तेषाम् अपि प्रमेयपदार्थे अन्तर्भावः भवति। मोक्षलाभे आत्मादीनां तत्त्वज्ञानानां साक्षात् उपयोगः अस्ति। अतः तेषाम् प्रमेयसूत्रे पृथक् उल्लेखः कृतः।

-------

## Short Note: <u>**वैशेषिकदर्शनसम्मतः विशेषः**</u>

विशेषाः नित्यद्रव्यवृत्तयः अनन्ता एव। पृथिव्यादिद्रव्यचतुष्टयस्य परमाणवः तथा आकाशादिद्रव्यपञ्चकं च नित्यद्रव्याणि। अतः पृथिव्यादिद्रव्यचतुष्टयस्य परमाणुषु तथा आकाशादिपञ्चद्रव्येषु विशेषाः विद्यन्ते। तस्माच्च विशेषाः अनन्ताः एव। अतः महर्षिकणादेन वैशेषिकसूत्रे उक्तञ्च-**"अन्यत्रान्त्येभ्यो विशेषेभ्यः"** इति। अन्तेऽवसाने भवन्ति इति अनन्त्याः, यतः न व्यावर्त्तकान्तरमस्तीत्यर्थः। अतः विशेषाः नित्यद्रव्यवृत्तयः व्यावर्तकाः भेदकाः वा। यथा सावयवद्रव्याणि अवयवादिभेदत्वेन सावयवद्रव्येभ्यः भिद्यन्ते। तथा च निरवयवनित्यद्रव्याणि अपि विशेषपदार्थभेदत्वेन नित्यद्रव्यान्तराद्भिद्यन्ते। प्रलयकाले पार्थिवजलीयतैजसवायवीयाः परमाणवः पृथिवीत्वादिभेदेन भिद्यन्ते। समानजातीयानां तु पार्थिवादिपरमाणूनां परस्पराद् भेदकः कश्चित् धर्मः न विद्यते। अतः तद्भेदज्ञानार्थं पार्थिवादिपरमाणुषु भेदकधर्मः विशेषः अङ्गीक्रियते। शब्दसमवायिकारणतावच्छेदकत्वेन च आकाशे भेदकधर्मः विशेषः अङ्गीक्रियते। एवञ्च प्रलयकाले गुणानां लोपे दिक्कालयोः भेदज्ञानाय तयोरपि भेदकधर्मः विशेषः अङ्गीक्रियते। मुक्तावस्थायाम् आत्मनां भेदज्ञानाय च आत्मस्वपि भेदकधर्मः विशेषपदार्थः स्वीक्रियते। स च भेदकधर्मः विशेषपदार्थः एव वैशेषिकदर्शनस्य विशेषः।

-----------

## Short Note: <u>**वैशेषिकदर्शनसम्मतः परमाणुवादः (भूतचतुष्टयस्य उत्पत्तिनाशक्रमः)**</u>

वैशेषिकनये पृथिव्यप्तेजोवायुद्रव्यचतुष्टयस्य परमाणवः नित्याः भवन्ति। परमाणवः अतीन्द्रियाः

KOUSIK PATRA

नित्याः अणुपरिमाणविशिष्टाः च भवन्ति।

जालसूर्यमरीचिस्थं सूक्ष्मतमं यत् उपलभ्यते तत् सावयवम्, चाक्षुषद्रव्यत्वात् पटवत्। द्व्यणुकावयवोऽपि सावयवो महदारम्भकत्वात् तन्तुवत्। यो द्व्यणुकावयवः स परमाणुः। परमाणुविषये प्रसिद्धः श्लोकः यथा-

**"ज्वालमध्यगते भानौ यत् सूक्ष्मं दृश्यते रजः।**

**तस्य षष्ठतमो भागः परमाणु प्रकीर्त्तितः।।" इति।**

ईश्वरस्य चिकीर्षावशात् परमाणुषु क्रिया जायते। ततः परमाणुद्वयसंयोगे सति द्वयणुकम् उत्पद्यते। ततः त्रिभिः द्वयाणुकैः त्र्यणुकम्। एवं चतुरणुकादिक्रमेण महती पृथिवी, महत्य आपो, महत् तेजो, महान् वायुरुत्पद्यते। एवम् उत्पन्नस्य कार्यद्रव्यस्य संजिहीर्यावशात् परमाणुषु क्रिया। क्रियया परमाणुद्वयविभागे सति द्वयणुकनाशः। तत त्र्यणुकनाशः। ततः चतुरणुकस्य नाश इत्येवं पृथिव्यादिनाशः।

प्राचीननये असमवायिकारणनाशेन (परमाणुद्वयसंयोगनाशेन) द्व्यणुकनाशः तथा समवायिकारणनाशेन (व्यणुकद्वयनाशेन) च त्र्यणुकनाशः भवतः। किन्तु नवीननये सर्वत्र एव असमवायिकारणनाशेन द्व्यणुकादिकार्यनाशः इति।

-----------

### Short Note: सांख्यदर्शनस्वीकृतानि प्रमाणानि :

येन यथार्थं ज्ञानं लभ्यते तद् 'प्राणम्' इति कथ्यते। यथार्थं ज्ञानम् उपलब्धिः वा प्रमा उच्यते। सांख्यनये बुद्धिवृत्तिः ज्ञानस्य करणं प्रमाणं .वा कथ्यते, पुरुषस्य व्यक्तबुद्धिवृत्तिः ज्ञानं प्रमा वा कथ्यते। तदनुसारेण चैतन्येन प्रकटिता बौद्धिकवृद्धिः एव न प्रमापदवाच्या। असन्दिग्धा, अविपरीता, अनधिगता विषयात्मिका चित्तवृत्तिः एव प्रमाणं, तस्य व्यक्तं परिणामं प्रमा। प्रमाणस्य पुरुषनिष्टं बोधरूपं फलं प्रमा इति। तस्य (प्रमायाः) साधनं प्रमाणम्।

सांख्यदर्शने दृष्टं प्रत्यक्षं वा, अनुमानं, अपि च शब्दम् आप्तवचनं वा इति त्रीणि प्रमाणानि स्वीकृतानि। उपमानम्, अर्थापत्तिः, अनुपलब्धिः इत्यादीनि अपराणि सर्वाणि प्रमाणानि दृष्ट-अनुमान-आप्तवचनाख्यैः त्रिभिः प्रमाणैः सिद्धानि भवन्ति। अतः सांख्यशास्त्रे दृष्टं प्रत्यक्षं वा, अनुमानं, शब्दम् आप्तवचनं वा एतानि त्रिविधानि प्रमाणानि एव इष्टानि, यतः प्रमाणेन एव प्रमेयसिद्धिः भवति -

**"दृष्टमनुमानमापतवचनं च सर्वप्रमाणसिद्धत्वात्।**

**त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि॥" (सांख्यकारिका -४)**

**i) दृष्टं प्रत्यक्षं वा** - विषयैः सह सन्निकृष्टैः इन्द्रियैः उत्पन्नं ज्ञानं दृष्टं प्रत्यक्षं वा प्रमाणम्।

**ii) अनुमानम्** -लिङ्गलिङ्गिपूर्वकम् अनुमानं त्रिविधम् - पूर्ववत्, शेषवत्, सामान्यतोदृष्टञ्चेति।

**iii) आप्तवाचनं शब्दप्रमाणं वा** - वेदवाक्यम् ऋषिवाक्यम् आप्तवाचनं शब्दप्रमाणम् वेति कथ्यते।

**"प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्।**

**तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं तु॥" (सांख्यकारिका -५)**

-----

Short Note: **सत्कार्यवादः**

सांख्यदर्शनस्य कार्यकारणविषयकः सिद्धान्तः अत्यद्भुतः संदृश्यते। सांख्यनये उत्पत्तेः पूर्वम् अपि कार्यं कारणेऽव्यक्तरूपेण तिष्ठति। वस्तुतस्तु कार्यकारणयोः मध्ये भेदः नास्ति। कार्यस्य अव्यक्तावस्था एव कारणम् इति कथ्यते। अपि च कारणस्य व्यक्तावस्था एव 'कार्यम्' इति कथ्यते। न तत्र तात्त्विकः भेदः, व्यवहारवशात् एव 'इदं कार्यम्', 'इदं कारणम्', इत्यनेन प्रकारेण अभिधीयते। सांख्यस्य एषः सिद्धान्तः 'सत्कार्यवादः' वा 'परिणामवादः' इति उच्यते। सांख्यनये असदकरणात्, उपादानग्रहणात्, सर्वसम्भवाभावात्, शक्तस्य शक्यकरणात्, कारणभावात् चेति पञ्चभिः हेतुभिः सत्कार्यवादः सिद्ध्यति -

**"असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात्।**

**शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम्॥" (सांख्यकारिका-९)**

---------

Short Question: **चित्तवृत्तयः** -

चित्तस्य वृत्तिः परिणामविशेषः वा चित्तवृत्तिः। प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः इति एताः चित्तस्य पञ्च वृत्तयः सन्ति- **"प्रमाणविपर्ययविकल्पनिद्रास्मृतयः।"(योगसूत्रम् -१/६)**

**i) प्रमाणम्** - यथार्थानुभवः प्रमा, प्रमायाः करणं प्रमाणम् इति। प्रत्यक्षानुमानागमाः प्रमाणानि।

**ii) विपर्ययः** - मिथ्याज्ञानं विपर्ययः इति पदेन व्यपदिष्टं भवति - **"विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्।"(योगसूत्रम् -१/८)**

**iii) विकल्पः** - विकल्पः इति पदेन कल्पितं वस्तु समुपस्थाप्यते। वस्तुतः तु तस्य वस्तुनः स्थितिः कालत्रयेऽपि न दृश्यते। विकल्पे वस्तुशून्यत्वेऽपि शब्दज्ञानमाहात्म्यनिबन्धनः व्यवहारः दृश्यते -

KOUSIK PATRA

**"शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः।"(योगसूत्रम् -१/९)।**

**iv) निद्रा-** निद्राख्या चित्तवृत्तिः तमोगुणप्रधाना भवति। तत्कारणात् जाग्रत्-स्वप्नावस्थयोः अनुभवः लीयते। निद्रायां मनः क्रियारतमेव भवति। विषयज्ञानस्य च अभावः भवति। तस्मात् वृत्तिरियम् अभाव-प्रत्ययालम्बना इति उच्यते- **"अभावप्रत्ययालम्बना वृत्तिर्निद्रा।"(योगसूत्रम् -१/१०)।**

**v) स्मृतिः** - अतीतानाम् अनुभवानां यथावत् मानसिकी प्रतीतिः 'स्मृतिः' इति कथ्यते- **"अनुभूतविषयासंप्रमोषः स्मृतिः।"(योगसूत्रम् -१/११)**

---------

Short Question **चित्तभूमयः** - चित्तस्य भूमिः सहजप्रवृत्तिरेव चित्तभूमिः इति कथ्यते। क्षिप्त-मूढ-विक्षिप्त-एकाग्र-निरुद्धाख्याः पञ्च चित्तभूमयः सन्ति -**"क्षिप्तं, मूढं, विक्षिप्तम्, एकाग्रं, निरुद्धमिति चित्तभूमयः।" (व्यासभाष्यम्, योगसूत्रम् -१/१)।**

एतासु अवस्थासु रजोगुणप्रधाना क्षिप्तावस्था, तमोगुणप्रधाना मूढावस्था च। अतः इमे द्वेऽप्यवस्थे योगार्थं समुचिते नैव भवतः। एवमेव विक्षिप्तावस्थायां मनः एकस्मिन् विषये चिरं न तिष्ठति, तत् शीघ्रमेव विषयान्तरं धावति, अतः सा अवस्था अपि योगानुकूला नास्ति। सत्त्वगुणप्रधानत्वात् एकाग्रावस्था निरुद्धावस्था चेति द्वेऽप्यवस्थे अवश्यमेव योगानुकूले भवतः।

एकाग्रावस्थायां तु चित्तं चिरम् एकस्मिन् विषये आरूढं भवति। अर्थात्, अस्याम् अवस्थायां चित्तं कमपि विषयं चिरं ध्यातुं शक्नोति, अतः इयम् अवस्था योगानुकूला अस्ति। योगस्य इयम् अवस्था प्रथमसोपानरूपेण कल्पते। निरुद्धावस्था तु चित्तस्य अन्तिमावस्था अस्ति। अस्याम् अवस्थायां चित्तस्य सर्वाः वृत्तयः लुप्ताः भवन्ति, अतः चित्तं स्वकीयां स्वाभाविकीं शान्तावस्थाम् अधिगच्छति।

---------

Short Question: **योगः समाधिर्वा -**

योगः एव समाधिः - **"योगः समाधिः।"(व्यासभाष्यम्, योगसूत्रम् -१/१)।** योगस्तु चित्तवृत्तिनिरोधः - **"योगश्चित्तवृत्तिनिरोधः।" (योगसूत्रम् -१/२)**। एकाग्रावस्थायाः नामान्तरमेव सम्प्रज्ञातसमाधिः सम्प्रज्ञातयोगः वा। निरुद्धावस्थायाश्च नामान्तरं हि असम्प्रज्ञातसमाधिः असम्प्रज्ञातयोगः वा।

**i) सम्प्रज्ञातसमाधिः** - सम्प्रज्ञातसमाधौ चित्तं ध्येये लीनं भूत्वा तन्मयं भवति। सम्यक् ज्ञायते साक्षात्क्रियते ध्येयम् अस्मिन् इति सम्प्रज्ञातसमाधिः सम्प्रज्ञातयोगः वा। असम्प्रज्ञातसमाधौ तु सर्वासाम् अपि चित्तवृत्तीनां विषयाणाञ्च तिरोभावः सञ्जायते। तत्र न किञ्चित् प्रज्ञायते इति असम्प्रज्ञातसमाधिः असम्प्रज्ञातयोगः वा।

KOUSIK PATRA

सम्प्रज्ञातसमाधिः वितर्क-विचार-आनन्द-अस्मिताभेदत्वात् चतुर्विधा भवति- **"वितर्कविचारानन्दास्मितारूपानुगमात्संप्रज्ञातः।"(योगसूत्रम् -१/१७)।**

**क. सवितर्क-सम्प्रज्ञातसमाधिः** - यदा कस्मिंश्चित् स्थूले भौतिकपदार्थे (मूर्त्यादौ) चित्तम् अविचलभावेन समवस्थाप्यते, तदा सा समाधिः सवितर्क-सम्प्रज्ञातसमाधिः इति कथ्यते।

**ख. सविचार-सम्प्रज्ञातसमाधिः** - स्थूलात् (मूर्त्यादेः) चित्तम् आवर्ज्य यदा कस्मिंश्चित् सूक्ष्मे विषये (तन्मात्रे) चित्तं स्थाप्यते, तदा सा समाधिः सविचार-सम्प्रज्ञातसमाधिः इति कथ्यते।

**ग. सानन्द-सम्प्रज्ञातसमाधिः** - यदा सूक्ष्मादपि (तन्मात्रात्) चित्तम् आवर्ज्य कस्मिंश्चित् सूक्ष्मतरे विषये ध्यानार्थम् आरोप्यते, तदा सा समाधिः सानन्द-सम्प्रज्ञातसमाधिः इति कथ्यते।

**घ. सास्मिता-सम्प्रज्ञातसमाधिः** - यदा च ध्यानम् अहङ्कारगोचरं क्रियते तदा सा समाधिः सास्मिता-सम्प्रज्ञातसमाधिः इति कथ्यते। अस्याः समाधेः फलम् आत्मसाक्षात्कारः भवति।

**ii) असम्प्रज्ञातसमाधिः -** यदा चित्तं सर्वेभ्योऽपि बाह्येभ्यः आभ्यन्तरेभ्यश्च विषयेभ्यः दूरीभवति, तदा सा स्थितिः असम्प्रज्ञातसमाधिः इति कथ्यते। असम्प्रज्ञातसमाधिरेव परमयोगः। इमम् असम्प्रज्ञातसमाधिप्रपन्नः योगी मुक्तः भवति। तस्य कृते संसारः बन्धनकारणं न भवति। अस्याम् अवस्थायां हि आत्मा मुक्तावस्थाजनितं प्रकाशम् अनुभवति। तदा सः आनन्दमयः भवति।

उपायप्रत्यय-भवप्रत्यय-भेदेन इयं समाधिः द्विविधा। तत्र उपायप्रत्ययसमाधिः योगिनां भवति- **"स खल्वयं द्विविधः—उपायप्रत्ययो भवप्रत्ययश्च। तत्रोपायप्रत्ययो योगिनां भवति।" (व्यासभाष्यम्, योगसूत्रम् -१/१८)।** भवप्रत्ययसमाधिः विदेहप्रकृतिलयानां च भवति- **"भवप्रत्ययो विदेहप्रकृतिलयानाम्।"(योगसूत्रम् -१/१९)**

------

Short Note: <u>योगदर्शनसम्मतं कैवल्यस्वरूपम्</u>

एतज्जागतिकं भोगमात्रं सुख-दुःख-मोहात्मकं सत्त्वरजस्तमोगुणात्मकत्वात्। तत्रापि दुःखानामेव आधिक्यम्। आध्यात्मिकाधिदैविकाधिभौतिकभेदात् तद् दुःखं त्रिविधिम्। तेभ्यस्त्रिविधदुःखेभ्यः पीडितः मानवः तन्निराशाय प्रवर्तते, तस्मादेव मुमुक्षुत्वम्। दुःखत्रयनिराशाय या जिज्ञासा भवति तया च ईश्वर-प्रणिधानेन वेदशास्त्राद्यभ्यासेन विवेकज्ञानात्मकं सम्यक् ज्ञानम् उत्पद्यते।

प्रकृति-पुरुषयोः विवेकज्ञानादेव सुख-दुःख-मोहान् प्रकृतिप्रदत्तान् भोगान् वा अननुभवन् जीवः बन्धनात् मुच्यते। पुरुषप्रकृत्योः संयोगः अर्थात् भोक्तृत्वभोग्यत्वरूपः सम्बन्धः हेयहेतुः संसारनिदानं वा-**"द्रष्टृदृश्ययोः संयोगो हेयहेतुः।"(योगसूत्रम्-२/१७)।** पुरुषप्रकृत्योः संयोगस्य तथा प्रकृतिजन्यदुःखत्रयस्य हेतुः अविद्या एव- **"तस्य हेतुरविद्या।"(योगसूत्रम्-२/२४)।** तस्याः अविद्यायाः

अभावात् पुरुषप्रकृत्योः संयोगाभावः अर्थात् भोक्तृत्वभोग्यत्वसम्बन्धाभावः हानम् आत्यन्तिकः बन्धोपरमः वा कथ्यते, तत् हानं दृशोः आत्मनः कैवल्यं स्वरूपेऽवस्थानं मुक्तिर्वा कथ्यते-**"तदभावात् संयोगाभावो हानं तद्दृशेः कैवल्यम्।"(योगसूत्रम्-२/२५)**

अविप्लवा अविद्याविरहिता वा विवेकख्यातिः प्रकृतिपुरुषभेदज्ञानं वा हानोपायः दुःखत्यागस्य कारणं वा भवति- **"विवेकख्यातिरविप्लवा हानोपायः।" (योगसूत्रम्-२/२६)।**

यमनियमादीनां योगाङ्गानाम् अनुष्ठानात् अशुद्धिक्षये अविद्यादिक्लेशनिवृत्तौ वा विवेकज्ञानपर्यन्तं तत्त्वज्ञानस्य अभिव्यक्तिर्भवति- **"योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः।"(योगसूत्रम्-२/२८)**

अन्यच्च चित्तस्य शुद्धौ वृत्तिराहित्ये वा, पुरुषस्य शुद्धौ स्वरूपप्रतिष्ठायां वा कैवल्यं मुक्तिर्वा भवति, तत्र च विवेकज्ञानं भवतु मा वा भूत् नापेक्ष्यते इत्यर्थः - **"सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति।"(योगसूत्रम्-३/५५)**

पुरुषार्थशून्यानां भोगापवर्गरहितानां सत्त्वादीनां गुणानां प्रतिप्रसवः प्रतिसर्गः प्रलयः प्रतिलोमपरिणामेन प्रकृतिरूपतया अवस्थानं वा कैवल्यम् इति कथ्यते अथवा पुरुषस्य स्वरूपप्रतिष्ठा कैवल्यम् इति कथ्यते- **"पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति।"(योगसूत्रम्-४/३४)**

-------

## Short Note: <u>अभिहितान्वयवादः अन्विताभिधानवादः च</u>

पदैः अर्थज्ञानस्य पद्धतिः का इति विषये मीमांसकसम्प्रदाये मतद्वयं प्रसिद्धम् - कुमारिलभट्टस्य अभिहितान्वयवादः, प्रभाकरस्य अन्विताभिधानवादः चेति। अभिहितान्वयवादिनां नये एकस्मिन् वाक्ये प्रयुक्तानां पदानाम् अर्थज्ञानम् आदौ भवति, ततः वाक्ये तेषाम् अन्वयः भवति। पदैः अभिहितस्य अर्थस्य वाक्ये अन्वयः अङ्गीक्रियते इति कारणात् एते अभिहितान्वयवादिनः। अन्विताभिधानवादिनां नये पदानां वाक्ये अन्वयात् परम् अभिहितस्य अर्थस्य ज्ञानं भवति, अर्थात् पदानि परस्परं वाक्यान्वितानि सन्ति अर्थज्ञानं जनयन्ति, न तानि पृथक्तया अर्थबोधाय समर्थानि। पदानाम् अन्वयात् परम् अभिहितस्य अर्थस्य बोधः अङ्गीक्रियते इति कारणात् एते अन्विताभिधानवादिनः।

--------

## Short Note: <u>मीमांसादर्शनसम्मतं धर्मलक्षणम्</u>

मीमांसादर्शने विचार्यविषयः तावत् धर्मः इति। मीमांसादर्शनस्य प्रणेता आचार्यः जैमिनिः

KOUSIK PATRA

द्वादशलक्षणीग्रन्थस्य प्रारम्भे सूत्रं प्रणितवान् - **"अथातो धर्मजिज्ञासा"** इति। अतः मीमांसादर्शनानुसारेण कः नाम धर्मः इति ज्ञातव्यम्। धर्मविषये मीमांसासूत्रं हि - **"चोदनालक्षणोऽर्थो धर्मः"** इति। यद्यपि चोदनापदस्य अर्थः प्रेरकत्वम् तथापि अत्र चोदनापदस्य अर्थः विधिरूपः वेदः। अतः वेदे यत् कर्तव्यत्वेन प्रतिपाद्यते स एव धर्मः इति ज्ञातव्यम्। अर्थसंग्रकारस्य लौगाक्षिभास्करस्य नये - **'यागादिरेव धर्मः'**। धर्मस्य लक्षणं हि - **'वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः'** इति। वेदेन प्रतिपाद्यते यः विषयः, यश्च प्रयोजनवान् (अर्थवान्) भवति स धर्मः। तथाहि - भोजनं यद्यपि प्रयोजनवत् तथापि तत् स्वाभाविकं, न तु वेदप्रतिपाद्यम्, अतः भोजनं न धर्मः। श्येनादियागः वेदेन प्रतिपाद्यते चेत् अपि न धर्मः, यतो हि तत्र अर्थवत्त्वं नास्ति, अनर्थवत्त्वम् एव अस्ति। 'स्वाध्यायोऽध्येतव्यः' इति वेदवाक्येन प्रत्यहं येवपाठः कर्तव्यरूपेण विधीयते, अत्र अर्थवत्त्वम् अपि विद्यते इति कारणात् स्वाध्यायः धर्मः इति ज्ञातव्यम्। 'यजेत स्वर्गकामः' इति वेदवाक्येन विधीयते यत्, यः स्वर्गम् इच्छति सः यागं कुर्यात् इति। अत्र वेदप्रतिपाद्यत्वम् अस्ति, अर्थवत्त्वम् अपि अस्ति इति कारणात् अयं धर्मः।

------

## Short Note: <u>मीमांसादर्शननये भावना</u>

'यजेत स्वर्गकामः' इत्यादिवाक्येन स्वर्गम् उद्दिश्य पुरुषं प्रति यागः विधीयते। यजेत इत्यत्र अंशद्वयम् अस्ति - यजिधातुः, प्रत्ययः च। प्रत्ययेऽपि अंशद्वयम् अस्ति - आख्यातत्वं, लिङ्त्वं च। तत्र आख्यातत्वं दशलकारेषु अपि साधारणम्, लिङ्गत्वं तु लिङ्गात्रे एव अस्ति।

'यजेत' इत्यत्र यत् अंशद्वयम् अस्ति तत्र उभयाभ्याम् अपि अंशाभ्यां भावना एव उच्यते। ननु का नाम भावना इति चेत् कथ्यते अर्थसंग्रहकारेण - **"भावना नाम भवितुर्भवनानुकूलः भावयितुः व्यापारविशेषः"** इति। अस्यार्थः हि भवितुः उत्पद्यमानस्य भवनानुकूलः उत्पत्त्यनुकूलः भावयितुः उत्पादयितुः प्रयोजकस्य व्यापारविशेषः भावना इति। यथा ओदनस्य पाके उत्पद्यमानस्य ओदनस्य उत्पत्त्यनुकूलः देवदत्तस्य व्यापारविशेषः भावना इत्यर्थः। यथा 'यजेत स्वर्गकाम' इत्यत्र उत्पद्यमानस्य धात्वर्थस्य स्वर्गस्य वा उत्पत्त्यनुकूलः स्वर्गकामस्य व्यापारः उत्पद्यमानायाः च स्वर्गकामप्रवृत्तेः उत्पत्त्यनुकूलः लिङः व्यापारविशेषः।

सा च भावना द्विधा- शाब्दी भावना, आर्थी भावना चेति।

### i) <u>शाब्दी भावना</u>

शाब्दी भावना नाम पुरुषप्रवृत्त्यनुकूलः भावयितुः व्यापारविशेषः। सा च लिङ् इति अंशेन उच्यते। लिङ्-श्रवणे अयं मां प्रवर्तयति, मत्प्रवृत्त्यनुकूलव्यापारवान् अयम् इति शाब्दबोधः नियमेन एव प्रतीयते। यत् यस्मात् शब्दात् नियमतः प्रतीयते तत् तस्य वाच्यम्। यथा गाम् आनय इति वाक्ये गोशब्दस्य गोत्वम्।

KOUSIK PATRA

स च व्यापारविशेषः लौकिकवाक्ये पुरुषनिष्ठः अभिप्रायविशेषः। वैदिकवाक्ये तु पुरुषाभावात् लिङ्गादिशब्दनिष्ठः एव। अत एव शाब्दीभावना इति व्यवहियते।

**ii) <u>आर्थी भावना</u>**

प्रयोजनेच्छाजनितक्रियाविषयव्यापारः आर्थी भावना इति। प्रयोजनस्य स्वर्गादिरूपफलस्य इच्छया रागादिविशेषेण जनितः यः यागादिक्रियाविषयः पुरुषस्य व्यापारविशेषः सा आर्थी भावना इत्यर्थः। सा च आख्यातत्वांशेन उच्यते, यतो हि आख्यातसामान्येन व्यापारः बोध्यते।

--------

Short Note: **<u>मीमांसादर्शननये विधिः</u>**

अज्ञातस्य अर्थस्य ज्ञापकः वेदभागः विधिः इति कथ्यते। यथा 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति विधिः। यः स्वर्गम् इच्छति सः अनिहोत्रयाणं कुर्यात् इति अस्यार्थः। अयं विधिः वेदं विना न अन्येन केनापि प्रमाणेन ज्ञातुं शक्यते। अतः अज्ञातस्य अर्थस्य ज्ञापकत्वात् इदं वेदवाक्यं विधिवाक्यम् इति कथ्यते।

स च विधिः चतुर्विधः - उत्पत्तिविधिः, विनियोगविधिः अधिकारविधिः, प्रयोगविधिः चेति।

**१. उत्पत्तिविधिः**

तत्र कर्मस्वरूपमात्रबोधकः विधिः उत्पत्तिविधिः। यथा- 'अग्निहोत्रं जुहोति' इति। अत्र च विधौ कर्मणः करणत्वेन अन्वयः। अग्निहोत्रहोमेन इष्टं भावयेत् इत्यर्थः।

**२. विनियोगविधिः**

अङ्गप्रधानसम्बन्धबोधकः विधिः विनियोगविधिः। यथा - 'दध्ना जुहोति' इति। स हि तृतीयया प्रतिपन्नस्य अङ्गभावस्य दध्नः होमसम्बन्धं विधत्ते। दध्ना होमं भावयेत् इत्यर्थः।

विनियोगविधेः सहकारिभूतानि षट् प्रमाणानि सन्ति। तानि हि श्रुति-लिङ्ग-वाक्य-प्रकरण- स्थान-समाख्यारूपाणि।

**३ अधिकारविधिः**

कर्मजन्यफलस्वाम्यबोधकः विधिः अधिकारविधिः। कर्मजन्यफलस्वाम्यं नाम कर्मजन्यफलभोक्तृत्वम्। स च 'यजेत स्वर्गकामः' इत्यादिरूपः। स्वर्गम् उद्दिश्य यागं विदधता अनेन स्वर्गकामस्य यागजन्यफलभोक्तृत्वं प्रतिपाद्यते।

**४. प्रयोगविधिः**

KOUSIK PATRA

प्रयोगप्राशुभावबोधकः विधिः प्रयोगविधिः। येन विधिवाक्येन प्रयोगस्य शीघ्रतासम्पादनं बोध्यते सः प्रयोगविधिः इति कथ्यते।

इत्थं विधेः चातुर्विध्यं संक्षेपेण प्रतिपादितम्।

--------

Short Note: **मीमांसादर्शननये मोक्षः**

प्राचीनमीमांसादर्शने स्वर्गलाभ एव परमपुरुषार्थः इति उक्तम्। किन्तु परवर्तिनि काले मीमांसकाः मोक्षम् एव परमपुरुषार्थरूपेण अङ्गीकुर्वन्ति। शरीरादिभिः सह जीवस्य सम्बन्धः एव बन्धनम्। यदा शरीरादिभिः सह जीवस्य सम्बन्धनाशः भवति तदा मोक्षः। यावत् शरीरं विद्यते तावत् सुखदुःखभोगः सम्भवति। प्रभाकरनये मोक्षे जीवस्य सर्वप्रकाराणां दुःखानाम् आत्यन्तिकतया विनाशः भवति। कुमारिलभट्टनये काम्यनिषिद्धकर्मणोः परित्यागेन नित्यनैमित्तिककर्मानुष्ठानेन सुख-दुःखभोगेन यस्य सर्वं पापं क्षीणं भवति स शमदमादिपालनेन वेदान्तादिभिः प्रदर्शितोपायेन आत्मतत्त्वविचारेण मोक्षं प्राप्नोति। मोक्षः नाम न केवलं दुःखाभावः, अपि तु आनन्दस्य अभिव्यक्तिः। मोक्षे शरीरस्य विनाशः भवति, तेन जीवस्य पुनर्जन्म न भवति।

---------

KOUSIK PATRA

# SALTORA NETAJI CENTENARY COLLEGE

*(Affiliated to Bankura University)*

Saltora, 722158, Dist.- Bankura, West Bengal

## Model Questions and Answers

Semester-V

Subject: B.A. SANSKRIT (Honours)

Course Code: AHSNS504DSE-2

Course Title: B. Kavya: Modern Sanskrit Darama (Daridradurdaivam)

Prepared by

Kousik Patra

Assistant Professor

Department of Sanskrit

Saltora Netaji Centenary College

E-mail ID : patrakousikjrf@gmail.com

Mobile No : 7872177720

KOUSIK PATRA

## Short Questions (लघूत्तरीयाः प्रश्नाः)

**१. दरिद्रदुर्दैवम् कीदृशं रूपकम् ? इदं केन विरचितम्?**

**उत्तरम्-** दरिद्रदुर्दैवमेकम् शुद्धप्रहसनम्। इदं श्रीजीवन्यायतीर्थेन विरचितम्।

**२. दरिद्रदुर्दैवमिति प्रहसने नान्दीश्लोके कस्य स्तुतिः विहिता ?**

**उत्तरम्-** दरिद्रदुर्दैवस्य नान्दीश्लोके ललाटलोचनस्य शिवस्य स्तुतिर्विहितास्ति।

**३. दरिद्रदुर्दैवमिति प्रहसनं कुत्र सर्वप्रथमं उपस्थीयते ?**

**उत्तरम्-** ऋषिवङ्किमचन्द्रमहाविद्यालयस्य वार्षिकभाषापरिषदुत्सवे दरिद्रदुर्दैवमिति प्रहसनस्य सर्वप्रथममुपस्थापनमभवत्।

**४. दरिद्रदुर्दैवमिति प्रहसनं आदौ कुत्र अभिनीतम् ? प्रसहनकारेण सह तस्य स्थानस्य सम्पर्क किमासीत् ?**

**उत्तरम्-** दरिद्रदुर्दैवमिति प्रहसनं आदौ ऋषिवङ्किमचन्द्रमहाविद्यालये अभिनीतम्। प्रहसनकारः श्रीजीवन्यायतीर्थरासीत् आसीत् अस्य महाविद्यालयस्य अध्यापकः।

**५. अस्य प्रहसनस्य प्रयोगनिर्वाहाय सूत्रधारेण कं आहूतवान् ?**

**उत्तरम्-** अस्य प्रहसनस्य प्रयोगनिर्वाहाय सूत्रधारेण विदूषकं आहूतवान्।

**६. वक्रेश्वरानुसारेण मन्दोदरी कियत् परिमाणम् अन्नं खादति ?**

**उत्तरम्-** वक्रेश्वरस्य मतानुसारेण मन्दोदरी दिवसस्य चतुःप्रसृतेः अधिकपरिमाणानि अन्नानि खादति।

**७. मन्दोदयीनुसारेण पुत्रौ स्वामीः च कियत्परिमाणम् अन्नं खादन्ति ?**

**उत्तरम्-** सल्पपरिमाणेन अनेन प्रत्यावर्तमानं पतिमुद्दिश्य मन्दोदरी पतिपुत्रादीनां भोजनपरिमाणं प्रकटयति। ततः अवदत् लम्बोदरः त्रिप्रसृतिमितान्, षडाननः द्विप्रसृतिमितान् तथा वक्रेश्वरोऽपि त्रिप्रसृतिमितान् अन्नानि खादन्ति।

**८. लम्बोदर-षडाननयोः मध्ये कः ज्येष्ठः कश्च कनिष्ठः ?**

**उत्तरम्-** वक्रेश्वरस्य द्वयोः पुत्रयोः लम्बोदर-षडाननयोः मध्ये लम्बोदरः षडाननात् अधिकं खादन्ति, तस्मात् लम्बोदरः ज्येष्ठः षडाननश्च कनिष्ठः।

**९. वक्रेश्वरः भिक्षायाः गृहप्रवेशस्य प्राक्काले तण्डुलान् कुत्र गोपयति ?**

**उत्तरम्-** भिक्षायाः प्रत्यावर्तनकाले गृहप्रवेशस्य प्राक्काले प्राप्तेषु तण्डुलेषु स्वशरीरं रक्षार्थ कांश्चन तण्डुलान् स्वीयकच्छवस्त्रेण गोपयति।

**१०. वक्रेश्वरस्य परिवारस्य सर्वेषां नाम उल्लेखयतु।**

**उत्तरम्-** वक्रेश्वरस्य भार्या मन्दोदरी, तस्य पुत्रौ लम्बोदर-षडाननौ।

KOUSIK PATRA

**११. भिक्षारतस्य वक्रेश्वरस्य परिचयं दीयते।**

**उत्तरम्-** भिक्षारतः वक्रेश्वरः आसीत् वृद्धश्छिन्नकर्पटश्छिन्नपादुकाश्छिन्नातपत्र। वर्णनमिदं विदूषकेन कृतवान्।

**१२. 'कुतः पर्याप्तस्तण्डुलः ?' - इत्यस्य वक्ता कः ? तस्य स्वभावः कीदृशः ?**

**उत्तरम्-** आलोच्योक्तेः वक्ता वक्रेश्वरशर्माब्राह्मणः। स चासीत् खलः, वञ्चकः, दुर्मुखः, प्रतारकः आदि स्वभावविशिष्टः।

**१३. 'आः गर्दभीतनयौ तिष्ठतः' - अस्य वक्ता कः ? कौ गर्दभीतनयौ ?**

**उत्तरम्-** अस्य वाक्यस्य वक्ता वक्रेश्वरशर्मा। वनेश्वरेण परस्परं विवदमानौ लम्बोदर-पडाननौ गर्दभीतनयौ उक्तम्।

**१४. लम्वोदरः केन उदरपूर्णम् कृतम् ?**

**उत्तरम्-** लम्बोदरः आम्रातकपत्रैः उदरपूर्णम् कृतम्।

**१५. अधिकेषु दिवसेषु मन्दोदरी किं अखादत् ?**

**उत्तरम्-** अधिकेषु दिवसेषु मन्दोदरी तिन्तिडीपत्रझोलेन, कदाचित् वा आम्रातकपत्रक्वाथेन तस्याः उदरपूर्ति कृतवती।

**१६. लम्वोदर-षडाननयोः विवादः किमर्थमभवत् ?**

**उत्तरम्-** पितुः कृते प्रतीक्षमानौ लम्बोदर षडाननौ पितुः प्राप्तानां भिक्षालब्धानां द्रव्यानां ताभ्यां वण्टनं कीदृशं भविष्यति, विषयेऽस्मिन् तौ विवादं कृतवन्तौ।

**१७. कलत्रापत्यानि वञ्चनार्थं मन्दोदरी विचारप्रार्थनाय कान् आह्वयितुम् इच्छति ?**

**उत्तरम्-** कलत्रापत्यानि वञ्चनार्थ मन्दोदरी विचारप्रार्थनाय पल्लीवासीभद्रमहोदयान् आह्वयितुं इच्छति।

**१८. शिवप्रदत्तानां दिव्यपाशकानां कः महिमा ?**

**उत्तरम्-** इष्टप्राप्तस्य संकल्पं कृत्वा पाशकक्षेपनेन संकल्पानुसारं फलं प्राप्यते जनः- अयं च पाशकानां महिमा।

**१९. सिद्धः कः ?**

**उत्तरम्-** देवयोनिषु सिद्धः एकः वर्गः। सिध् क्तः इति सिद्धः देवयोनिविशेषः इत्यमरः । तथोक्तं भरतेन- **'सा तु अनिमादिगुणोपेतो विश्ववसुप्रभृतिः'**।

**२०. अस्मिन् प्रहसने भरतवाक्यं केन उक्तम् ?**

**उत्तरम्-** अस्मिन् प्रहसने भरतवाक्यं सिद्धेनोक्तम्।

**२१. सिद्धस्य समीपे कति पाशकाः आसन् ?**

**उत्तरम्-** अस्मिन् प्रहसने सिद्धस्य समीपे त्रयः पाशकाः आसन्। पृथिवीभ्रमणसौकर्याय स्वयं देवदेवेन तस्मै इमे पाशकाः प्रदत्ताः।

KOUSIK PATRA

**२२. वक्रेश्वराय दिव्यपाशकाः केन प्रदत्ताः ?**

**उत्तरम्-** असाध्यसाधने निपुणाः दिव्यपाशकाः वक्रेश्वराय सिद्धायाः अनुरोधेन सिद्धेन प्रदत्ताः ।

**२३. 'नाहमीदृशं दृश्यं सोढुं क्षमास्मि'** - कस्याः उक्तिरियम् ? दृश्यं किम् ?

**उत्तरम्-** आलोच्योक्तिरियं सिद्धस्य प्रियायाः सिद्धायाः। मातुः समीपे तस्य पुत्रः जलाभावात् मुमूर्षते - पृथिव्याः इदृश्यं दृश्यं द्रष्टुं सोढुं वा सिद्धा असमर्था इति।

**२४. आदौ पाशकान् केन क्षिप्तवान् ? किमर्थं तेन पाशकाः क्षिप्ताः ?**

**उत्तरम्-** आदौ सिद्धेनैव पाशकान् क्षिप्तवान्। आगमने विलम्बायाः सिद्धायाः वदने पौढगुम्फोदयः भवतु इत्यासीत् प्रथमपाशकक्षेपस्य संकल्पम्।

**२५. अन्तिमवारं पाशकक्षेपं किमर्थम् अभवत् ? केन च संकल्पितम् ?**

**उत्तरम्-** अन्तिमवारस्य पाशकक्षेपस्य संकल्पं वक्रेश्वरेण कृतम्। तस्य प्रतिवेशिनः यथावत् दरिद्राः भवेयु इति संकल्प्य वक्रेश्वरः पाशकान् क्षिप्तवान्।

**२६. पाशकान् कः सिद्धाय प्रदत्तवान् किमर्थं च प्रदत्तम् ?**

**उत्तरम्-** देवदेवेन सिद्धाय इमे पाशकाः प्रदत्ताः। पृथिवीभ्रमणसौकर्याय सिद्धाय प्रदत्तमिमे दिव्यपाशकाः।

**२७. क्षुद्ररामस्य गृहे आगतेभ्यः याचकेभ्यः कीदृशं दानं प्रदीयते पूर्वपुरुषक्रमात् ?**

**उत्तरम्-** क्षुद्ररामस्य गृहे आगतेभ्यः याचकेभ्यः ताम्रपणार्घ प्रदीयते पूर्वपुरुषक्रमात्।

**२८. मन्दोदरी वक्रेश्वरस्य कतमा पत्नी ?**

**उत्तरम्-** मन्दोदरी वक्रेश्वरस्य द्वितीया पत्नी।

**२९. क्षुद्ररामः कोटीश्वरः भविष्यतीति कस्य भविष्यद्वाणी ?**

**उत्तरम्-** क्षुद्ररामः कोटीश्वरः भविष्यतीति विश्वविश्रुतस्य ज्योतिर्शस्य सुदर्शनशाखिणः भविष्यद्वाण्यम्। क्षुद्ररामेण सञ्चितं मुद्रालक्षं वर्षमध्येन शतगुणं वर्धिष्यते इति तस्य अभिमतम्।

**३०. 'तद्देहि नः काञ्चन भिक्षाम्' - कस्योक्तिरियम् ? अत्र काञ्चन इति शब्दस्य कोऽर्थः ?**

**उत्तरम्-** आलोच्योक्तिरियं क्षुद्ररामशुद्दिश्य वक्रेश्वरस्य। अत्र काञ्चन इत्यस्यार्थः किञ्चिदिति। किन्तु क्षुद्ररामेण अस्य शब्दस्य सुवर्णार्थं गृहीतवान्।

**३१. कीदृशा भिक्षादानरीतिः क्षुद्ररामस्य परिवारे प्रचलिता आसीत् ?**

**उत्तरम्-** क्षुद्ररामस्य वंशे पथि भिक्षादानं सर्वथा परित्यज्यम्। गृहागतेभ्यः याचकेभ्यः यथाशक्तिः धनादि प्रदीयते।

**३२. 'अरे पात्रेसमितौ' - कस्योक्तिरियम् ? पात्रेसमितौ शब्देन कौ वोध्येते ?**

KOUSIK PATRA

**उत्तरम्-** अलोच्योक्तिरियं वक्रेश्वरशर्मणः। अनेन शब्देन लम्बोदर-षडाननौं' बोध्येते। पात्रे भोजनसमये एव समितः सङ्गतः इति पात्रेसमितः। अर्थात् भोजनादनन्तरं यो न मिलितः सः।

------

KOUSIK PATRA

**<u>व्याख्या कार्या</u> (संस्कृतभाषया देवनागरीलिप्या च)**

**धातुर्हि सृष्टिवैचित्र्यं कार्यं द्वाभ्यां हि मेलनात्।**

**नैकेन वस्तुना भाव्यं मुषलोदूखले यथा।।**

**उत्सः** - पञ्चाननतर्करत्नात्मजेन वङ्गरत्नेन श्रीजीवेन विरचितस्य दरिद्रदुर्दैवमिति प्रहसनस्य प्रस्तावनांशे श्लोकोऽयम् उपलभ्यते।

**प्रसङ्गः** - विदूषकमुद्दिश्य सूत्रधारस्य उक्तिरियम्।

**व्याख्या** - अस्य प्रहसनस्य अतीव सारगर्भयुक्तः श्लोकोऽयं। अनेन श्लोकेन श्रीजीवस्य दार्शनिकज्ञानं प्रकाश्यते। सुकौशलेन कविरत्र धातुपदेन भगवन्तं सूचयति। एकेन किमपि न सृज्यते। अस्मिन् सृष्टिविषये सर्वेषां वेदादिशास्त्राणां तथा वैज्ञानिकानां मतैक्यम् समुपलभ्यते। अस्य जगतः सर्वे वस्तुनः प्राणिनश्च द्वाभ्यां सृजन्ति, नैकेन वस्तुना। सांख्यातत्त्वमपि तत् प्रतिपादयति। सांख्यकारिकायाः तत्त्वमिदं श्रीजीव. मुषलोदूखलाभ्यां प्रकाशयति। अनेन सांख्यस्य पुरुष-प्रकृतितत्त्वं समुपवर्णितमिति ममानुभवः।

**छन्दः** - श्लोकोऽयं अनुष्टुपछन्दसा गुम्फितः। अस्य छन्दसः लक्षणं यथा-

**'पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः।**

**गुरु षष्ठञ्च पादानां शेषेष्वनियमो मतः।।'**

**अलंकारः -** श्लोकेऽस्मिन् उपमालंकारः दृश्यते, अर्थान्तरन्यासोऽपि दृश्यते। उभययोः परस्परनिरपेक्षतया संसृष्टिः च।

-----

**स्त्रीभाग्येन भवेल्लक्ष्मीः पत्युरित्युच्यते जनैः।**

**अहो ! त्वद्भाग्ययोगेन दुर्भिक्षं न जहाति माम्।।**

**उत्सः** -पञ्चाननतर्करत्नात्मजेन वङ्गरत्नेन श्रीजीवेन विरचितस्य दरिद्रदुर्दैवमिति प्रहसनस्य प्रस्तावनांशे श्लोकोऽयम् उपलभ्यते।

**प्रसङ्गः** - श्लोकोऽयं प्रथममुखसन्धौ मन्दोदर्यै वनेश्वरेण प्रयुज्यते।

**व्याख्या** - स्त्री गृहलक्ष्मीरूपेण पूजिता भवति अस्माकं समाजे। तस्याः आगमनेन पतिगृहस्य सुखसमृद्धिः वृद्धिर्जातेति सर्वे मन्यन्ते। यदि अस्य विपरीतं जायते तर्हि तामलक्ष्मीरूपेण कल्पन्ते। पतिगृहस्य इयं वृत्तिः परम्पराक्रमेण आगच्छति। भार्या लक्ष्मीकल्पने नास्ति दोषः। किन्तु अलक्ष्मीकल्पाय तां पीडनं असम्मानञ्च न कर्तव्यम्। यतः यत्र नार्यस्तु पूज्यन्ते तत्र देवता। किन्तु अधुना समाजेऽपि वधुनिर्यातनं सदैव दृश्यते। तदानीन्तने समाजेऽपि चित्रमिदं अतिष्ठत्- वक्रेश्वरोक्तिः तस्य प्रमाणम्। सः स्वस्य दुर्देवस्य कारणरूपेण मन्दोदरी दूषयति । भार्यादोषेण तस्य दुर्भिक्षं न जहाति इति वक्रेश्वराभिमतम्। वस्तुतः आलस्यं हि तस्य दुर्भाग्यस्य कारणम्। यदि वयं पत्नीं सम्मानं प्रयच्छामः तर्हि तत्र लक्ष्मीः विः। जते विपरीते न कदापि इति भावः।

**छन्दः** - श्लोकोऽयं अनुष्टुपछन्दसा गुम्फितः। अस्य छन्दसः लक्षणं यथा-

**'पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः।**

**गुरु षष्ठञ्च पादानां शेषेष्वनियमो मतः।।'**

**अलंकारः** - श्लोकेऽस्मिन् विषमालंकारः दृश्यते, स्त्रीभाग्येन लक्ष्मीलाभस्य विपरीतावस्थावर्णनात्। तत्रोक्तं लक्षणं विश्वनाथेन-

**"यद्वारव्धस्य वैफल्यं अनर्थस्य च सम्भवः।**

**विरूपयोः सङ्घटना या च तद्विषमं मतम्।।"**

**--------**

**भिक्षापि दुर्लभा जाता शिक्षा धर्ममयी गता।**

**सर्वत्र तु तिरष्कारः पुरस्कारोऽर्थिनामहो।।**

**उत्सः** - श्रीजीवप्रणीतस्य दरिद्रदुर्दैवमिति प्रहसनस्य द्वितीयमुखसन्धौ श्लोकोऽयम् उपलभ्यते।

**प्रसङ्गः** - मन्दोदरी यदा सिद्धां ज्ञापयति- दरिद्राणाम् अस्माकं भिक्षावृत्तिं विना नास्त्युपायः तदा वक्रेश्वरेण इदमुक्तम्। अनेन श्लोकेन तस्य समयस्य अवक्षयचित्रं समुद्घाटितम्।

**व्याख्या** - मानवानान् अर्थ-शिक्षा-मानसदैन्यत्वं प्रकटितं प्रहसनेऽस्मिन्। तस्य श्रेष्ठनिदर्शनं खलु श्लोकोऽयम्। वक्रेश्वरः प्रतिगृहं याचित्वाऽपि भिक्षां न प्राप्नोति। अनेन तस्य समाजस्य निरन्त्रता प्रतिपादिता। अतः वक्रेश्वरेण उक्तम्- भिक्षापि दुर्लभा जाता। मानवानां तथा जातेरुन्नत्यैः शिक्षा अपरिहार्या। शिक्षां विना मानवाः पङ्गुवन्तः भवन्ति। केवलाः धर्मशिक्षाः न कर्तव्याः। समग्रशिक्षानां सन्निवेशेन जातिः प्राग्रसरति। किन्तु वर्तमाने समाजे विपरीतं चित्रं दृश्यते। विदूषां सम्मानः नास्ति, अर्थिनः तिरष्कारेण पुरष्कृताः भवन्ति। यस्मिन् समाजे पण्डिताः तिरष्कृतं भवन्ति, अर्थिनः अपि तिरष्कृतं भवन्ति, तस्य समाजस्य अवक्षयः खलु अवश्यम्भावी। वक्रेश्वरस्य वचनमिदं तस्य समाजस्य अवक्षयत्वं दैन्यत्वं च प्रकटयति इति भावः।

**छन्दः** - श्लोकोऽयं अनुष्टुपछन्दसा गुम्फितः। अस्य छन्दसः लक्षणं यथा-

**'पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः।**

KOUSIK PATRA

**गुरु षष्ठञ्च पादानां शेषेष्वनियमो मतः।।'**

**--------**

**अन्धः कुष्ठी दरिद्रो वा प्रतिवेशी वरं भवेत्।**

**समानधनगर्वेण स्पर्धमानो हि दुःसहः।।**

**उत्सः** - श्रीजीवेन विरचिते दरिद्रदुर्दैवमिति प्रहसने द्वितीयमुखसन्धौ समुपलभ्यतेऽयं श्लोकः।

**प्रसङ्गः** - आत्मसर्वस्वस्य परश्रीकातरस्य वक्रेश्वरस्य मानसदैन्यत्वं प्रकाश्यते श्लोकेनानेन। वक्रेश्वरस्य उक्तिरियम्।

**व्याख्या** - दरिद्रस्य दुर्दैवमिति दरिद्रदुर्दैवम्। मानवाः खलु द्विप्रकारेण दरिद्राः भवन्ति। अर्थेन मनसा च। अर्थदैन्यं खलु दूरीकरणयोग्यम् किन्तु मानसदैन्यं कदापि न। ये खलु स्वार्थपराः परश्रीकातराः च तेषां गृहे श्री कदापि न आगच्छति। अतः विवक्षामः मानसदैन्यत्वम् अर्थदैन्यत्वस्य प्रधानहेतुः। समाजे सूक्तिरियं प्रचलिता भवति - ये मानवाः अन्येषां हितं कामयन्ति, भगवान् तेषां गृहे प्रागेव आगच्छति। प्रतिवेशिनां सुखे सुखी, दुःखे च दुःखी भवन्तः जीवनातिवाहितं करणीयम्। यतः शास्त्रेऽपि उक्तम्- **'सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।'**

किन्तु अस्य विपरीतमाचरणं मानवेषु दृश्यते। ते स्वं विहाय सर्वेषामहितं कामयन्ति। एतेषां मानवानां दारिद्र्यं कदापि नोन्मुच्यते इति भावः।

**छन्दः** - श्लोकोऽयं अनुष्टुपछन्दसा गुम्फितः। अस्य छन्दसः लक्षणं यथा-

**'पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः।**

**गुरु षष्ठञ्च पादानां शेषेष्वनियमो मतः।।'**

**--------**

**खलता खलतासमाकुलं नरचित्तं परिहाय खेलतु।**

**प्रतिवेशिसुखाभिलाषिता लसताल्लोकमनःसु सन्ततम्।।**

**उत्सः** - पण्डितप्रवरेण श्रीजीवेन विरचितस्य दरिद्रदुर्दैवमिति प्रहसनस्य भरतवाक्यमिदम्।

**प्रसङ्गः** - समग्रप्रहसने वक्रेश्वरचरित्रेण मानवहृदि विराजमानस्य नञर्थकभावं वर्णयित्वा सिद्धमुखेन स्वीयप्रत्याशां प्रकाशयति कविरत्र।

**व्याख्या -** वक्रेश्वरः खलः धृष्टः परश्रीकातरश्च खल्वेकः विप्रः। भिक्षावृत्तिना जीवनं परिवारश्च तेन परिपाल्यते। किन्तु सः निष्ठुरः स्वार्थपरश्च। स्त्रीपुत्रमुद्दिश्य सः कुवाक्यं प्रयुनक्ति। प्रतिवेशिनां ईर्ष्यति। पाशाक्षेपेण प्रतिवेशिनामपि तण्डुलागमे पीडितो भूत्वा सः पाशकान् अग्नौ निक्षेपितुमुद्यतोऽभवत्। अतः सिद्धः तान् पाशकान् आच्छिद्य गृह्णाति। अनेन वक्रेश्वरः दरिद्रदुर्दैवम् पुनः प्राप्तम्। श्रीजीवः इत्थं समाजस्य ऋणात्मकाः दिशः वर्णयित्वा अस्मान् ध्वन्यात्मकम् उपदिशति। खलता सर्वदा सर्वथा च परित्यज्या। नरचित्तं नीत्वा खेलनं न कर्तव्यम्। प्रतिवेशिनं ईर्ष्या न करणीया। तेषां सुखे यदि वयं सुखी भवामः तर्हि अस्माकमपि सुखानि झटिति आगमिष्यन्ति। अस्मिन् श्लोके श्रीजीवस्य अभिलाषः समुपव्यज्यते।

KOUSIK PATRA

**छन्दः** - श्लोकोऽयं सुन्दरी इति अर्धसमवृत्तेन रचितम्। अस्य छन्दसः लक्षणप्रसङ्गे उक्तं गङ्गादासेन-

**'अयुजोर्यदिसौजगौ युजोः सभराल्गौयदिसुन्दरी तदा'**

**अलङ्कारः** - श्लोकेऽस्मिन् ल-ख-स-रकारादीनाम् आवृत्तिहेतुः वृत्त्यनुप्रासः अलङ्कारः।

---

## Long Question and Answers (दीर्घप्रश्नोत्तराणि)

**प्रश्नः - दरिद्रदुर्दैवमवलम्व्य वक्रेश्वरस्य चरित्रमुपपाद्यताम्।**

**उत्तरम्** - श्रीजीवन्यायतीर्थविरचितस्य दरिद्रदुर्दैवमिति प्रहसहनस्य नेताऽस्ति क्वचित् दरिद्रः धृष्टश्च ब्राह्मणः। भिक्षया सः दिनं यापयति। दरिद्रोऽपि सः स्वभावेन अतीव खलः परश्रीकातरश्च। अतः प्रस्तावनायां सूत्रधारः वदति-निःस्वः खलस्वभावो वक्रेश्वरशर्मा। तस्य चरित्रे दोषाधिक्यं परिलक्ष्यते, गुणं त्वस्फुटमेव।

छिन्नवस्त्र-छिन्नपादुक-छिन्नातपत्रेण सः भिक्षार्थमटति। तस्य द्वौ पुत्रौ स्तः। मन्दोदरी नाम्नी एका भार्याऽपि विद्यते। सा बक्रेश्वरस्य द्वितीया पाणिगृहीता आसीत्। प्रागेव उक्तं, भिक्षावृत्तिना सः निर्वहति स्वजीवनम्। दैहिकशक्तिः विद्यमाने सति आलस्यतां हि तस्य भिक्षाग्रहणस्य कारणम्। अतः मनोवृत्तिरियं निन्दनीया। भिक्षया तस्य जीवनं प्रचलति किन्तु ये भिक्षादाने असमर्थाः भवन्ति तान् शपति बनेश्वरोऽयम्। संकेतोऽयं तस्य कृतघ्नचरित्रस्य दृष्टान्तः।

अस्मिन् प्रहसने स्पष्टवक्तुः बक्रेश्वरशर्मणः अपरमेकं चरित्रं समुद्घाटितम्। मन्दोदर्य्याः भक्षणविषये तस्योक्तिः अस्य प्रमाणम्। तथा भिक्षादान-ग्रहणविषये क्षुद्ररामेण सह वक्रेश्वरस्य उक्ति-प्रत्युक्तयोऽपि तस्य स्पष्टवचनस्य साक्ष्यम्। स्पष्टवचनं प्रशंसायोग्यम्। किन्तु तेन स्त्रीपुत्रयोः उद्दिश्य यानि वाक्यानि प्रयुज्यन्तेतानि नितरां क्लेशदायकानि गर्हितानि च।

परिवारस्याभिभावकः भवति वक्रेश्वरः। सः पिता तथा स्वामी। कलत्रपुत्रयोः भरणपोषणं तस्य कर्तव्यम्। तेषामुदरभरणं प्रथमेव करणीयम्। अतः भिक्षालव्धस्तण्डुलः स्त्रीहस्ते अर्पणीयः। किन्तु बक्रेश्वरः अस्य विपरीतमाचरति । स्वस्य कृते सः परिवारात् गोपाय तण्डुलं वस्त्रमध्ये स्थापयति। स्वार्थपरतायाः प्रकृष्टं निदर्शनमिदम्।

वक्रेश्वरः अतीव परश्रीकातरः आसीत्। सः प्रतिवेशिनां अहितं कामयति। तेनोक्तम् -

**"अन्धः कुष्ठी दरिद्रो वा प्रतिवेशी वरं भवेत्।**

**समानधनगर्वेण स्पर्धमानो हि दुःसहः।।"**

अन्येषामहितप्रार्थना तस्य खलतां प्रकटयति। सः अतीव चतुरोऽपि असीत्। प्रथममुखसन्धौ दृश्यते सः मन्दोदरी कटूक्तिं करोति किन्तु यदा मन्दोदरी वदति तस्य तण्डुलगोपनस्य कथा सर्वेषां सकाशे समुद्घाटयिष्यति तदा सः पत्नी मधुरवचनेन तुष्टिं करोति। सः वदति- '**भोः पतिव्रते! प्रियतमे! हृदयवल्लभे! सुगृहिणी! ...।**' अनेन तस्य चातुर्य्य समुपस्थाप्यते कविना। दरिद्रेऽपि स मदगर्वित आसीत्। क्षुद्ररामं निकषा भिक्षां याचित्वा प्रत्याख्यातो सन् सः तं शपति- मादृशं याचकं प्रत्याख्याय त्वमपि मत्सदृशदृशां लभस्व। मदगर्वेण सः स्वीयप्रशंसा कृत्वा वदति-

**"तृणेषु वंशः खचरेषु हंस. शूरेषु कंसो मशकेषु दंशः।**

**विप्रेषु वक्रेश्वरशर्मनामा संसारचक्रे विदितो न केन ?"**

अतः आलोच्यप्रहसनविश्लेषणेन वक्तुं शक्यते, वक्रेश्वरचरित्रे दोषार्णवः विद्यते। सः आसीत्-स्वार्थपर-श्रमविमुख कृतघ्न-निष्ठुर-खल-परश्रीकातर- कुटिलः। तस्य चरित्रदोषार्णवे यदि गुणरत्नमन्विष्यते तर्हि तत् अतीव दुष्प्राप्यम्। शुद्धप्रहसनस्य नायकस्य यानि वैशिष्ट्यानि आलंकारिकैः निर्दिष्टानि तानि सर्वाणि वक्रेश्वरचरित्रे समुपविष्टानि भवन्ति।

---------

**प्रश्नः - आलोच्यमाने प्रहसने चित्रितं मन्दोदरीचरित्रं चित्रणीयम्।**

**उत्तरम्-** वक्रेश्वरभार्या खलु मन्दोदरी। सा वक्रेश्वरस्य द्वितीया पत्नी। गुणदोषसंयुक्तं भवति तस्याः चरित्रम्। किन्तु तस्याः चरित्रे गुणाधिक्यं समुपलभ्यते। अस्मिन् प्रहसने मन्दोदर्य्याः यानि चारित्रिकवैशिष्ट्यानि प्रतिफलितानि भवन्ति तानि अधुना वर्णयामः।

भिक्षामादाय यदा वक्रेश्वरः कुटीरं प्रत्यागच्छति तदा पित्रानीते द्रव्ये कस्य कीदृशोऽधिकारः स्याद् विषयमिमं नीत्वा लम्बोदरषडाननौ मिथः विवदतः। तदा मन्दोदरी तयोशार्मास्ति अनेन वचनेन - आ हतभाग्यौ! कुक्कुरशावकाविव कथं मिथो युध्यतम्? मूौं विरमतम्। स्वपुत्रौ कुक्कुरशावकपदेन अभिदध्यात् तस्याः दुर्मुखत्वं प्रतीयते।

मन्दोदरी यथार्थवादिनी असीत्। वक्रेश्वरस्य आनीतं भिक्षालव्धं स्वल्पतण्डुलं दृष्ट्वा सा कथयति - एतेन कस्य क्षुधानिवृत्तिर्भविष्यति? वक्रेश्वरेण यदा कथ्यते, ये भिक्षां नाददन् तान् शपति सः, इदं श्रुत्वा सा भणति - शापं ददानो भिक्षुकः केन सक्रियताम्! कलहकाले वक्रेश्वरः यदा तां पितृगृहे गमनाय उपदिशति तदा तया यथार्थमुच्यते- अहो मधुरोपदेशः! तनयौ किं मया पितृगृहाद् आनीतौ? यद् एतयोर्भरणभारम् अहम् अङ्गीकरोमि? पत्न्याः दायित्वपालने विमुखं वक्रेश्वरमुद्दिश्य सा कथयति - कथं कुटीरमात्रावलम्बनो द्वितीयवारं दारपरिग्रहं कृतवान् असि? इमानि वचनानि तया निःशङ्कचित्तेन कथितानि भवन्ति।

वक्रोक्तौ अपि मन्दोदरी राराज्यते। वक्रेश्वरं प्रति तस्याः चमत्कारव्यङ्ग्योक्तिं यथा - त्वं भूरितं दत्त्वा वहिर्गतः वयम् अपि पूरयितोदरं तिष्ठामः। सुरगिरा सा अस्य प्रहसनस्य माधुर्य्य साधयति। सा भोजननिपुणाऽपि आसीत्। सा एकाकिनी चतुः प्रसृतमितमोदनं अश्नातीति वक्रेश्वरेनोच्यते-

**"तिन्तीडीपत्रझोलेन भक्तं चलति पङ्कवत्।**

**यदि स्यात् व्यञ्जनं तत्र न जानेन्नगिरिं गिलेः।।"**

सा स्वातन्त्र्यकामा आसीत्। वक्रेश्वरः यदा स्वस्य दुर्दैवस्य कारणत्वेन तां दूषयति सा अकपटेन वदति - एवञ्चेद् अलक्षणाहं परित्यज माम्। परगृहे पाचिकावृत्तिम् आस्थाय स्वोदरं पूरयिष्यामि। स्वस्यां कमपि दोषं सा नाङ्गीकरोति। यदा वक्रेश्वरः तस्याः भोजनाधिक्यं सूचयति तदा सा कथयति - अर्धाशनेन यस्याः दिनं याति सा पर्वतप्रमाणम् अन्नं गिलतीति कथयति स्वामी।

तया दुर्मखस्य वक्रेश्वरस्य निग्रहोपायाः सम्यग्रूपेण ज्ञायते। वक्रेश्वरः यदा गृहं परित्यज्य गन्तुमुद्यतो भवति तदा पत्युः कच्छवस्त्रेण साकं पुत्रयोः वन्धने उद्यता भवति सा। ततः वक्रेश्वरस्य कच्छवस्त्रप्रान्ते लुक्कायितः तण्डुलः भूमौ पतितः। तस्य इयं कुप्रवृत्तिः सर्वेषां पल्लिवासिनां सविधे प्रचारणस्य भयं प्रदर्थ्य वक्रेश्वरं निगृह्णाति। अत्र तस्याः उपस्थितबुद्धेः परिचयः समुद्घाटितः। परिवारं प्रति तस्याः सम्यगनुरागः आसीत्। दारिद्यं तस्याः पुत्रस्नेहं नापहर्तु शक्नोति। पतिं प्रति तस्याः वैराग्ये सति कर्तव्योऽपि दृश्यते। भिक्षाटनकाले पत्युः क्लेशं दृष्ट्वा तमपि सा उपदिशत्-

KOUSIK PATRA

त्वमपि क्षणमुपविश इति।

तृष्णार्तपुत्रयोः कष्टमनुभूय सा अतीव क्लिश्नाति। सर्वेषु शयनेषु सा खल्वेका जागर्ति। तस्मात् क्षद्रुरामस्यागमनं ज्ञात्वा वक्रेश्वरं जागरितवती।

मन्दोदरी कृतज्ञा अपि भवति। सिद्धाप्रदत्तेन जलेन तृष्णानिवारणाय सा पुत्रौ सिद्धां प्रणम्य उपदिशति। सा अतीव सहजा सरला चासीत्। सा प्रतिवेशिनां कदापि न ईर्ष्याति। प्रतिवेशिनां भाग्योदये सदा वक्रेश्वरः पीडितो भवति तदा वक्रेश्वरमुद्दिश्य सा वदति - भवन्तु सर्वेऽपि लाभवन्तः, का नो हानि। प्रतिवेशिनां धनलाभे दुःखितः पीडितश्च वक्रेश्वरः सदा पाशकानां नाशाय उद्युक्तास्ति तदा मन्दोदरी वक्रेश्वरं पाशकनाशात् निवर्तितुं चेष्टते।

अतः वर्तमानप्रहसनस्य विश्लेषनेन इदं वक्तुं शक्नुमः, मन्दोदरीचरित्रं प्रधानतया गुणसमन्वितमासीत्। यत्किञ्चित् दोषः परिलक्ष्यते तत्तु परिहर्तव्यः। दारिद्र्यं खलु दोषकारणम्। दारिद्र्यस्य विद्यमाने सति सा कर्तव्य-स्नेह-सरलता-कृतज्ञतायुक्ता आसीत्।

--------

**प्रश्नः- दरिद्रदुर्दैवमिति प्रहसने प्रतिफलितानि समाजचित्रानि समुपस्थाप्यताम्।**

प्रहसनस्य कथा कविकल्पिता। अतः प्रहसनलक्षणनिर्णयावसरे विश्वनाथेनोक्तम् - भवेत् प्रहसनं वृत्तं निन्द्यानां कविकल्पितम्। तथापि वक्तुं पारयामः यत् रूपकानि खलु समाजदर्पणानि। दरिद्रदुर्दैवमिति प्रहसनेऽपि बहुनि समाजरूपाणि प्रतिविम्बितानि सन्ति। यथा- मन्दोदरी वक्रेश्वरस्य द्वितीया भार्या भवति। वक्रेश्वरस्य एकमात्रमवलम्वनं तु तस्य कुटीरम्। भिक्षया तस्य जीवनं चलति। वयसाऽपि स प्रौढः। तथापि तेन द्वितीयवारं पाणिगृहीतम्। विषयोऽयं समाजस्यैकः व्यधिविशेषः। अर्थात् तत्कालीनसमाजे द्वितीयपाणिग्रहणं प्रचलितमासीत्।

मन्दोदर्य्याः पितरावपि दुहितुः विवाहमीदृशेन जनेन सह प्रदत्तमिति महतः दुःखस्य कारणम्। वक्रेश्वरः सगर्वेण घोषयति- यदि मन्दोदरी तं न परिणयति तर्हि कोऽपि अन्या भार्यारूपेण आगच्छति। एतेन तस्य समाजस्य पितृणां दुरवस्था सूचिता भवति।

वक्रेश्वरः समन्तात् अटित्वाऽपि यथार्थभिक्षालाभे असमर्थो भवति। अनेन समाजस्य निरन्त्रता प्रतिपादिता। दुर्भिक्षमिति शब्दस्य यथार्थप्रयोगः भवितुमर्हत्यत्र। वक्रेश्वरः दुर्मुखः आसीदिति सत्यम् किन्तु समाजे भिक्षाभावः न भवेत्। यद्यपि आढ्यानां संख्या न्यूना तिष्ठेत् तथापि परिवारैकपालनाय वक्रेश्वरः भिक्षां न प्राप्स्यति इति समाजस्य दैन्यत्वं प्रकटयति।

लम्वोदर-षडाननौ किशोरे वयसि अपि भिक्षार्थं व्रजति। अध्ययनाय विद्यालयं न गच्छतीति चित्रं श्रीजीवकालीन समाजस्य दुर्दशां प्रकाशयति।

क्षुद्ररामचरित्रेण समाजस्य अपरमेकं चित्रं प्रस्फुटितं कविना। क्षुद्ररामः वदति- आः प्रान्तरेऽपि भिक्षुकाणाम् उपद्रवः। तदानीन्तने समाजे भिक्षुकानामाधिक्यमस्तीति व्यज्यते अनया उक्त्वा। समाजस्य अर्थिकदैनत्वमपि अनया प्रकाश्यते।

सिद्धयोः वार्तालापसमये तस्मिन् समये पुरुषाधिकारः तथा स्त्रीणां अनादरः सूच्यते। स्त्री-पुरुषयोः वैष्यम्यं समाजस्य कृते महद् हानिकरमित्यपि कविनात्र वर्ण्यते। तदानन्तीनसमाजस्य विशिष्टचित्रं श्लोकद्वयेन श्रीजीवः प्रहसनेऽस्मिन् चित्रयति। प्रथमश्लोकः भवति-

KOUSIK PATRA

**"भिक्षापि दुर्लभा जाता शिक्षा धर्ममयी गता।**

**सर्वत्र तु तिरष्कारोऽर्थिनाम् अहो।।"**

अनेन श्लोकेन तस्य समयस्य अवक्षयचित्रं समुद्घाटितम्। मानवानां अर्थ- शिक्षा-मानसदैनत्वं प्रकटितं भवति प्रहसनेऽस्मिन्। भरतवाक्ये तत्कालीनसमाजवासिनां मनोभावं प्रकाश्य श्रीजीवः पार्थयति-

**"खलता खलता समाकुलं नरचित्तं परिहाय खेलतु।**

**प्रतिवेशिसुखाभिलषिता लसताल्लोकमनःसु सन्ततम्।।"**

----------

**प्रश्नः - विषयमालोच्य अस्य प्रहसनस्य नामकरणं सार्थकं न वेति विचार्य्यताम्।**

**उत्तरम्** - श्रीजीवप्रणीतस्य दरिद्रदुर्दैवमिति प्रहसनस्य नायकः भवति वक्रेश्वरः। स जात्या ब्राह्मणः भिक्षया सः स्वजीवनं निर्वहति। किन्तु मनसा सः अतीव खलः धृष्टचित्तश्च। परश्रीकातरता तस्य नित्यसखा। भिक्षालब्धस्तण्डुलं सः कच्छवस्त्रेण परिवारात् गोपाय स्थापयति। किन्तु दुर्भाग्यवशतः स्त्रीपुत्रं निकषा तण्डुलं भूमौ पतति।

अस्य प्रहसनस्य अपरमेकं चरित्रं भवति क्षुद्ररामः। धनाढ्ये सति सः अतीव कृपणः। भिक्षाग्रहणार्थं तेन वक्रेश्वर भर्तृसते। क्रमे रङ्गमञ्चे सिद्धौ प्रविशतः । सिद्धदम्पत्याः आशीर्वादेन वक्रेश्वरः पाशकं लभते। तस्याः निक्षेपेण वक्रेश्वरस्य तथा तस्य पतिवेशिनां तण्डुलागमः भवति। किन्तु तण्डुलागमे वक्रेश्वरः पीडितो भवति। अतः स प्रार्थयति- पाशककक्षेपः सर्वथा रोद्धव्यः। सर्वेषां तण्डुलागमो मम कर्मफलेन यदि स्यात् तदा वरं मे दारिद्र्यम्। गर्वेण सः समुद्घोषयति अहमेव प्रतिवेशिनां सुखकारणम्। एतत्तु असहनीयम्। मदगर्वेण तेनोच्यते-

**"अन्धः कुष्ठी दरिद्रो वा प्रतिवेशी वरं भवेत्।**

**समानधनगर्वेण स्पर्धमानो हि दुःसहः।।"**

अन्येषां सुखेन तस्य दुःखमुत्पद्यते। अपरसुखदर्शनात् स्वस्य दुःखम् आदरनीयम्। तस्माद् वक्रेश्वरः मन्दोदरीम् आदिशति- गृहिनी सत्वरं ज्वलय वह्निम्, पाशकास्तत्र नूनं क्षिपामि। अन्यथा न मे शान्तिरस्ति।

मानवां ईदृशं चरित्रं दर्शन श्रीजीवः अतीव व्यथितं भवति किन्तु सः प्रत्याशां न त्यजति। तस्माद् भरतवाक्ये सिद्धमुखेन कवि वदति-

**"खलता खलता समाकुलं नरचित्तं परिहाय खेलतु।**

**प्रतिवेशि-सुखाभिलषिता लसताल्लोकमनः सु सन्ततम्।।"**

दरिद्रस्य दुर्दैवम् इति दरिद्रदुर्दैवम्। षष्ठीतत्पुरुषसमासेन पदमिदं सिद्धं भवति। दुष्टं दैवम् - अस्मिन् विग्रहे प्रादयो गताद्यर्थे प्रथमया - अनेन वार्त्तिकेन प्रादितत्पुरुषसमासेन दुर्दैवम् पदमिति निष्पन्नं भवति। काव्यस्य नामकरणं प्रधानतया नायकस्य, नायिकायाः, नायक-नायिका-उभयोः नामानुसारेण अथवा कथावस्तुनः आधारेण भवति। वर्तमानप्रहसनस्य नामकरणं विषयानुसारेण भवति इति ग्रन्थविश्लेषणेन स्पष्टरूपेण प्रतीयते। अस्मिन् प्रहसने दरिद्रस्य दुर्दैवं समुपवर्णितम्। दारिद्र्यम् हीनमानस्यम्, ईर्ष्या मानवानां दैन्यत्वं प्रकटयति। ये मानवाः खलु स्वार्थपराधणाः तेषां दुर्दैवं कदापि न निवारयेत्। आलोच्यप्रहसनस्य नेता वक्रेश्वरः तस्य चरित्रस्य प्रकृष्टम् उदाहरणम्।

KOUSIK PATRA

कुटीरमात्रं तस्य सहायम् । भिक्षा तस्य वृत्तिः। दैन्यम् अस्य जीवनस्य अङ्गम्। किन्तु स अतीव खलः धृष्टः अहंकारी धूर्तश्च। भाग्येन दुःखनिवारणाय स पाशकमेकं लभते। किन्तु पाशकक्षेपेण प्रतिवेशिनामपि तण्डुलागमो भवति। तेषां हृदि आह्लादं जनयति।

तेन मन्यते अन्येषां सुखात् स्वस्य दुःखम् अधिकम् अभिप्रेतम्। तस्माद् स पाशकान् पावके निक्षेपितुं उद्यतं भवति। तस्मिन् क्षणे सिद्धः आगम्य तान् पाशकान् प्रत्याहरति। तान् अर्पनादनन्तरं आनन्देन वक्रेश्वरः वदित-

प्रतिवेशिसुखं रुद्धं कृतंः मे शीतलं मनः। भवतो निधिरेषोऽपि भवते पुनरर्पितः ।। अनेन वक्रेश्वरः पुनः दारिद्र्यं प्राप्तम्। अतः प्रहसनस्य नाम दरिद्रदुर्दैवम् सार्थकं यथार्थञ्च भवतीति विषयेऽस्मिन् नास्ति संशयः ।।

--------

KOUSIK PATRA

Edit with WPS Office

# Saltora Netaji Centenary College

(Affiliated to Bankura University)

Saltora, 722158, Dist.-Bankura, West Bengal

KOUSIK PATRA

Study Material

Subject: B.A. Sanskrit (Honours)

Semester-V

Course Code: AHSNS502C-12

Course Title:

CourseTopic:

Title off the Study Material:

Prepared By

Kousik Patra

Assistant Professor & H.O.D.

Department of Sanskrit

Saltora Netaji Centenary College

E-mail ID: patrakousikjrf@gmail.com

Mobile No: 7872177720

Edit with WPS Office

**१. प्राचीनभारतीयलिपीनां परिचयः -**

**अथवा**

**टीका कार्या- सिन्धुघाटीलिपिः/ खरोष्ठीलिपिः/ब्राह्मीलिपिः**

**उत्तरम्** लिपिशब्दस्यार्थो भवति यत् लेखनं चित्रणं वा। हिन्दीभाषायाः लिपिः देवनागरी तथा आंग्लभाषायाः लिपिः रोमन अस्ति। अशोककालीनाभिलेखानां भाषा प्राकृत तथा च लिपिः ब्राह्मी आसीत्। गुप्तकालीनाभिलेखानां भाषा संस्कृतं तथा च लिपिः गुप्तकालीना ब्राह्मी आसीत्। सम्राजः अशोकस्य अभिलेखेषु लिपीनां नामानि न प्राप्यन्ते । मौर्यवंशिनां राज्ञां तथा अशोकस्य लेखाद् एवं ईसापूर्वचतुर्थशताब्द्याः आरभ्य ईसायाः तृतीयशताब्दीं यावत् प्राप्तैः साक्षैः ज्ञायते यत्, तस्मिन् काले लिपिद्वयं प्रसिद्धमासीत्। एका देवनागरी लिपिः, या बामतः दक्षिणं यावत् लिखिता भवति सार्वदेशिकी लिपिः, द्वितीया च फारसी लिपिः, या दक्षितः वामपक्षे लिखिता भवति स्म। सा एकदेशिकी लिपिः आसीत्। जैनानां पन्नवणासूत्रे तथा च समवायगसूत्रे अष्टादशलिपीनां नामानि प्राप्यन्ते। यस्मिन् प्रथमं नाम बंभी लिपिः (ब्राह्मीलिपिः) अस्ति। भगवतीसूत्रे बंभी (ब्राह्मी) लिपिं नमस्कृत्य सूत्रस्यारम्भः विद्यते। यथा- नमो बंभीए लिविए। बौद्धानां ललितविस्तरग्रन्थेऽपि चतुःषष्ठिलिपीनां नामानि प्राप्यन्ते। तासु लिपिषु भारतीयाभारतीयासु लिपिषु सर्वाः अपि लिपीः भारतीयाः जानन्ति स्म। अथवा यासां ते कल्पनां कर्तुं शक्नुवन्ति स्म ताः सर्वाः अपि अत्र संकलिताः सन्ति। तत्रापि प्रथमा लिपिः ब्राह्मी लिपिः, तथा द्वितीया च खरोष्ठी लिपिः इति। एवं सिध्यति यत्, भारतीयाभिलेखेषु प्रयुक्तानां लिपीनां मध्ये ब्राह्मी तथा खरोष्ठी विशिष्टा अस्ति। १९२१-१९२२ ईस्वीमध्ये हड़प्पा मोहनजोदड़ो (पाकिस्तानदेशे) इत्यनयोः खननात् एका नवीनालिपिरपि प्रत्यक्षमागता तस्याः नाम भवति सिन्धुलिपिः इति। सा लिपिः सिन्धुघाटी इति नाम्ना प्रसिद्धिं प्राप्तवती। अस्मिन् विषये अनुसन्धानकर्तारः शोधकार्यं कुर्वन्ति।

KOUSIK PATRA

**सिन्धुघाटीलिपिः**

सिन्धुघाटीसभ्यतायाः अन्वेषणात् प्राग् ब्राह्मीलिपिरेव भारतस्य प्राचीनतमा लिपिरिति स्वीकृता आसीत्। परन्तु १९२१-१९२२ ईस्वीमध्ये मोहनजोदड़ोहड़प्पा इत्यनयोः खननानन्तरं एका नवीना सम्भयता प्रकाशं गता। सिन्धुघाटीसभ्यतायाः प्रायः सर्वेऽपि लेखाः लघुभूताः तथा च मुद्राविशिष्टाऽपि आसन्। एते लेखाः एकस्यां पङ्क्तौ अथवा द्वयोः पङ्कत्योः मध्ये उट्टङ्किताः भवन्ति स्म। एतेषां लेखानां भाषा विषये किमपि विशिष्टं ज्ञानं नास्ति। ईसापूर्वतृतीयसहस्राब्धां (३००० पूर्वम्) अस्याः लिपेः अध्ययनमेकं कठिनं कार्यमासीत्।

सिन्धुघाटीलिपेरुत्पत्तिविषये विदुषां त्रयः पक्षाः प्राप्यन्ते। यथा- १. द्रविड़ उत्पत्तिः, २.

Edit with WPS Office

सुमेरी - उत्पत्तिः, ३. स्वदेशी उत्पत्तिः।

परन्तु वास्तविकी स्थितिरेषा यत् आधारसूत्राणामभावे अस्याः लिप्याः उत्पत्तिरथवा उत्पत्तिस्थानस्य सम्बन्धे निश्चयपूर्वकं किमपि कथनं न सम्भवति।

**खरोष्ठीलिपिः**

दक्षिणतः बामभागे लिख्यमाना एषा लिपि अस्ति।

अस्याः अध्ययनस्य श्रेयः यूरोपीयविद्वांसं मैसन, जेम्सप्रिंसेप, लैसेन एवं कनिंघम महोदयं प्रति गच्छति।

खरोष्ठी इत्यस्य इदानीं यथा ज्ञानमस्ति तेन सिध्यति यत्, मुख्यरूपेण पुरालेखेषु प्रयुक्ता उत्तरपश्चिमीभारतस्य लिपिः अस्ति।

विविधैः प्रमाणैः ज्ञायते यत् खरोष्ठीलिपिः ईसापूर्वचतुर्थशताब्दीतः ईसापूर्वतृतीयशताब्दीपर्यन्तं प्रसिद्धा आसीत्।

अस्याः लिप्याः प्रचीनाक्षर रजतनाणके (चाँदी के सिक्के, इरानीसिग्लोई) टंकितं विद्यते। ततः परवर्तिनः वर्णाः सम्भवतः गांधारमूर्तिषु एवं कुषाणाभिलेषु प्राप्ताः भवन्ति।

६६८ ईस्वी इत्यस्य चीनदेशस्य विश्वकोशे फा वान शू लिन् इत्यस्य उल्लेखेन ज्ञायते यत् खरोष्ठीलिप्याः ज्ञानं बौद्धाः चिरकालपर्यन्तं सुरक्षितं कृत्वा स्थापितवन्तः।

खरोष्ठीलिप्याः पूर्वकाले एवं विविधानि नामानि बैक्टिरियन, इण्डो - बैक्टिरियन, आर्यन, बैक्ट्रो, पालि, आसन् यथा उत्तर-पश्चिमीभारतीय, काबुलियन इत्यादीनि।

खरोष्ठी इति नामकरणस्य किं निशितं कारणमिति कथनं सर्वथा असम्भवमिति प्रतिभाति।

मौर्यवंशीराज्ञः आशोकस्य नैकेषु लेखेषु शाहबाजगढ़ी तथा मान्सेराशिलालेखेषु खरोष्ठीलिप्याः प्रयोगः प्राप्यते। अनेन ज्ञायते यत्, एषा लिपिः ईसापूर्वतृतीयशताब्द्यां केवलं भारतवर्षस्य उत्तरपश्चिमसीमान्तप्रदेशेषु तात्पर्यं पञ्जाबे (पाकिस्तानदेशस्थे) तत्कालीने गान्धारप्रदेशे प्रचलित आसीत् ।

खरोष्ठीलिप्याः शिलालेखाः ब्राह्मीलिप्यपेक्षया अतिन्मूनाः सन्ति। वस्तुतः खरोष्ठीलिपिः अल्पायुविशिष्टा एवं अल्पक्षेत्रविशिष्टा आसीत्। एषा लिपिः मूलरूपैव समाप्तिं गता। सम्भवतः आह्मीलिप्या सह प्रयुक्ता एषा लिपिः जटिला दुरुहा चासीत्। एतस्याः सामान्यरूपेण प्रयोगकरणं कठिनमासीत्।

KOUSIK PATRA

Edit with WPS Office

खरोष्ठीलिप्याः नाम भारतीयललितविस्तरादिषु पुस्तकेषु विदेशीग्रन्थेषु च उल्लिखितमस्ति। खरोष्ठीत्यस्य नाम सप्तमशताब्द्यां चीनीग्रन्थेषु प्रयुक्तमासीत् ।

विदुषां मते खरोष्ठीलिपिः स्वकाले अतीवलोकप्रिया आसीत्। विशेषरूपेण लिपिकाः व्यापारिणश्च अस्याः लिपेः प्रयोगं कुर्वन्ति स्म। अस्याः लिपेः अक्षराणि आविकर्षणपूर्णानि भवन्ति स्म। खरोष्ठीलिप्यां दीर्घस्वराः न भवन्ति स्म। यस्य वर्णस्य प्रतिदिनं प्रयोगे उपयोगो न भवति स्म। अस्यां लिप्याम् अल्पप्राणपूर्णं व्यञ्जनं द्वित्वस्य स्थाने एकस्य व्यञ्जनस्य प्रयोगः भवति स्म। (यथा-वक्क इत्यस्य स्थाने क मात्रस्य) अल्पप्राणमहाप्राणयोः संयोगे पश्चात्वर्तिनः व्यञ्जनस्य प्रयोगः भवति स्म। (क्ख स्थाने ख मात्रस्य) ईसापूर्वतृतीयशताब्द्यां मौर्यवंशीराज्ञः अशोकस्य शाहबाजगाढ़ तथा मान्सेरास्थानस्य प्रयोगे एवं लेखाः प्राप्यन्ते।

खरोष्ठीलिप्याः उद्भवविषये विदुषां मतभेदोऽस्ति। केचन् विद्वांसः अस्याः उत्पत्तिस्तु अमराईलिपितः परिकल्पयन्ति। अन्ये भारतदेशे एव अस्याः उत्पत्तिरिति।

यदि एषा लिपिः विदेशात् आगता स्यात् तदा वैदेशिकाः ग्रन्थाः अपि स्युः, परन्तु तथा नास्ति। खरोष्ठीलिप्यां प्रयुक्ताः ये अनुस्वारसंयुक्ताक्षरादयः तेषां प्रयोगेण स्पष्टं भवति यत्, एषा लिपिः भारतीया लिपिरिति। चीनीविश्वकोषेऽपि खरोष्ठीलिप्याः गणना भारतीयलिपिषु एव कृताऽस्ति, तथा च दक्षिणतः वामदिशि लेखनं भवति। अस्याः लिपेः जन्मदाता खरोष्टनामकः कश्चन् व्यक्तिरिति परिकल्पनाऽस्ति। यो हि शब्दः सर्वतोभावेन भारतीय एव। उपरोक्तैः तर्कैः सिध्यति यत्, खरोष्ठीलिपिः भारते एव उदिता विकासं प्राप्ता अस्तं गता इति।

KOUSIK PATRA

**ब्राह्मीलिपिः**

पुरातनभारतीयाभिलेखेषु सर्वाधिकप्रयुक्तलिपिः ब्राह्मी लिपिः इति। ब्राह्मीलिप्याः प्रचीनतमं रूपं उत्तरप्रदेशस्थबस्ती (वसिष्ठपुरम्) जनपदस्य पिपरावा इत्याख्यस्य स्तूपात् तथा च अजमेरजनपदतः बड़ली (बलीं) ग्रामात् शिलालेखस्य प्राप्तिर्जाता।

एतेषां शिलालेखानां विद्वांसः पञ्चशताब्दी ईसापूर्व इति कालं परिकल्पयन्ति।

बौद्धजैनसाहित्येषु लिपीनां या सूची तत्र प्रथमं नाम ब्राह्मी लिपिः इति। पण्णावणासूत्रे समवायाङ्गसूत्रे च अष्टादशलिपीनां एवं ललितविस्तरग्रन्थे चतुःषष्ठिलिपीनां च वर्णनं प्राप्यते।

अल्बेरुनीयात्री लिखति यत्, ब्रह्मा साक्षात् एकां लिपिं रचितवान् यस्य नाम ब्राह्मी इति।

पुरातत्त्वविदः ब्राह्मीलिपिरित्यस्योद्भवप्रसङ्गे नाना मतानि वर्णयन्ति। एतेषां मतानां

Edit with WPS Office

मुख्यरूपेण द्विधाविभाजनं सम्भवति यथा- १. विदेशी उद्भवसिद्धान्तः, २. स्वदेशी उद्भवसिद्धान्तः। तत्र प्रथमस्य एवं विभागाः भवितुं शक्नुवन्ति। यथा- विदेशी-उद्भवसिद्धान्तेषु यूनानी (ग्रीक) उद्भवः, सेमेटिक-उद्भवः, उत्तरी-सेमेटिक-उद्भवः, दक्षिणी-सेमेटिक-उद्भवः, फिनीशियन-उद्भवसिद्धान्ताः प्रस्तुताः सन्ति।

नानातर्कैः सिद्धमिदं यत्, ब्राह्मीलिपिः भारतीया अस्ति एवं तस्योद्भवस्थानमपि भारत एव। या भाषा अन्यया कयाऽपि भाषया सह साम्यं न स्थापयति।

१. सा वामतः दक्षिणं प्रति लिखिता भवति ।

२. ब्राह्मीलिप्याः अक्षराणि उच्चारणाधारेण लिखितानि भवन्ति। तथा ब्राह्मीलिपिः स्वतन्त्रालिपिरस्ति।

३. ब्राह्मीलिप्यां दीर्घह्रस्वयोर्द्वयोरपि प्रयोगः प्राप्यते।

४. अनुस्वारानुनासिकविसर्गादीनां समेषामपि प्रयोगः अस्यां लिप्यां प्राप्यते।

५. अक्षराणां ध्वनिसम्बन्धिविभाजनं उच्चारणाधारेण भवति।

एतेषां गुणानां कारणात् एषा एका विशिष्टा लिपिरस्ति। यस्याः उच्चारणं व्याकरणञ्चोभयमपि विशिष्टं स्थानं स्थापयति। अतः विदुषां मते ब्राह्मीलिपिः विशुद्धा भारतीया लिपिरिति। सम्भवतः वैदिकसाहित्यसंरक्षणार्थमेव आर्याः अस्याः लिप्याः विकासं कृतवन्तः। ब्राह्मीलिप्याः भारते द्वे शैल्यौ विकसिते स्तः। एका दक्षिणीब्राह्मी यस्यां तमिलद्रविड़ादीनां विकासः, द्वितीयपक्षे उत्तरीब्राह्मी यस्यां आधुनिकभारतीयार्यभाषायाः लिपीनां विकासोऽभूत्।

-------

**२ प्राचीनभारतीयैतिह्यसंस्कृत्योश्च सृजने/संरक्षणे भारतीयाभिलेखानां वैशिष्ट्यम्/अवदानम्**

**अथवा**

**प्राचीनभारतीयैतिह्यनिर्माणे संस्कृतेश्च पुनर्निर्माणे/सृजने/संरक्षणे भारतीयाभिलेखशास्त्रस्य महत्त्वम्।**

**उत्तरम्** भारतीयमैतिह्यं नानाविधम्- वैदिकमैतिह्यं, मध्यकालिकमैतिह्यम्, आधुनिकैतिह्यञ्च। इतोऽपि नाना धर्मकर्माचारपद्धत्या बहवः संस्काराः सन्ति। येन

KOUSIK PATRA

Edit with WPS Office

केनापि रूपेण भारतीयैतिह्यपरम्परा चलत्येव। तस्मिन्नेवक्रमे तां परम्परां स्मर्तुम् अभिलेखविधिरपि कार्यं करोति। तत्र प्राचीनभारतीयैतिह्यस्य संस्कृतेश्च प्रमुखस्रोतरूपेषु अभिलेखस्मारकमुद्रादीनामपि महत्त्वपूर्णं वरीवर्ति। अभिलेखातः प्राप्तानामैतिह्यज्ञानानां विभिन्नेषु विभागेषु विभक्तं कृत्वा दर्शयितुं शक्नुवन्ति । यथा -

**राज्ञां वंशवर्णनम्**

अभिलेखाः मौर्य-शुंग-आंध्र-सातवाहन-कुषाण-क्षत्रप-गुप्त-वाकाटक-चालुक्य-राष्ट्रकूट -परमार-प्रतिहार-चोल-पांड्य-पालसेनादीनां वंशानां प्राचीनतमैतिस्यस्य संस्कृतेश्च महत्वपूर्णं संकेतं सूचयन्ति। रूद्रदाम्नः गिरनाराभिलेखे (१५० ईस्वी) मध्ये रूद्रदाम्ना सह तस्य पितामहस्य चष्टनस्य तथा पितुः जयदाम्नः नामोल्लेखः उत्कीर्णितोऽस्ति। समुद्रगुप्तस्य प्रयागप्रशस्तिः यद्यपि तिथिविहीना अस्ति तथापि तत्र समुद्रगुप्तस्य प्रपितामहस्य श्रीगुप्तस्य, पितामहस्य घटोत्कचस्य एवं पितुः चन्द्रगुप्तस्य सहैव तस्य मातामहस्य लिच्छवि तथा मातुः कुमारदेव्याः नाम्नः उल्लेखः मिलति। स्कन्दगुप्तस्य अन्तः स्तम्भाभिलेखे वंशसंस्थापकादारभ्य स्कन्दगुप्तपर्यन्तं सर्वेषां राज्ञां नामानि सहैव चन्द्रगुप्तप्रथमादारभ्य तेषां पत्नीनामपि नामानि प्राप्यन्ते। श्रीहर्षस्य बासखेड़ाताम्रपत्रे (६२७ ईस्वी) मध्ये नरवर्धनादारभ्य तेषां समेषां पूर्वजानां तेषां पत्नीनाञ्च नामानि उत्कीर्णितानि सन्ति। यानि नामानि हि ऐतिह्यनिर्माणे साहाय्यं कुर्वन्ति।

**राज्ञां विजयवर्णनम्**

रूद्रदाम्नः गिरनाराभिलेखे (१५० ईस्वी) स्पष्टरूपेण उल्लिखितमस्ति यत्, रूद्रदामा यौधेयानामुत्सादनं कृतवान्। सहैव दक्षिणाधिपतिं शातकर्णिमहोदयं वारद्वयं विजित्य मुक्तं कृतवान्। समुद्रगुप्तस्य प्रयागप्रशस्तिमध्ये समुद्रगुप्तस्य दिग्विजयस्य वर्णनं विस्तारेण कृतमस्ति। विदुषां मते चन्द्रस्य मेहरौलीलौहस्तम्भाभिलेखः विजयस्तम्भरूपेण स्वीकृतमस्ति। दिग्विजयिनः राज्ञः चन्द्रस्य सीमाविषये लिखितमस्ति यत्, पूर्वस्यां दिशि बंगं यावत्, दक्षिणादिशि दक्षिणजलनिधि पर्यन्तम्, उत्तरस्यां बाह्लिकपर्यन्तं, पश्चिमदिशि सिन्धुमुखपर्यन्तमासीत्। एवमेव बीसलदेवस्य देहलीटोपराभिलेखे (११६३ ईस्वी) शाकम्भरी इत्यस्य चाहमानवंशीयराज्ञः विजयवर्णनं कृतमस्ति। बीसलदेवः हिमालयविन्ध्यौ अन्तरा स्वकीयस्य विजयश्रीः इत्यस्य चिरस्थायित्वं निर्मातुं टोपरास्थिते अशोकप्रस्तराभिलेखे उत्कीर्णं कारितवान्।

**शासनप्रबन्धनम्**

अशोकः स्वकीयं शासनसूत्रं स्वहस्ते एव नियन्त्रितं कृतवान्। राजा अशोकः जनकल्याणार्थं वृक्षारोपणं, तडागं, कूपनिर्माणं, औषधिव्यवस्थां च कारितवान्। मनुष्यपशुनिमित्तं चिकित्साव्यवस्थां च ततान। अशोकस्य राज्ये महामात्रः, धर्ममहामात्रः,

KOUSIK PATRA

Edit with WPS Office

राजुकः, प्रादेशिकः इत्याख्यानामधिकारिणां च नियोगः भवति स्म। गुप्तसाम्राज्यं नानाप्रान्तेषु विभक्तमासीत्। प्रान्तीयाः शासनकाः राष्ट्रिकः, भौगिकः, भोगपतिः, गोप्तादयः नाम्ना प्रसिद्धा आसन्। समुद्रगुप्तस्य प्रयागप्रशस्तिमध्ये केषाञ्चिदधिकारिणां पदानामुल्लेख अपि प्राप्यते। यथा- आयुक्तः, पुरुषः, महादण्डनायकः, कुमार-आमत्यः, सन्धिविग्रहक इत्यादयः। उत्पादनस्य षष्ठांशस्य ग्रहणं कररूपेण भवति स्म। करग्रहीता यः अधिकारी भवति स्म तस्य कृते षष्ठाधिकृत इति पदवी आसीत्। रूद्रदाम्नः गिरनाराभिलेखे उल्लिखितमस्ति यत्, सुदर्शनतडागस्य उपरि बाँधनिर्माणं प्रजाभ्यः करसहयोगोपहारादिकं न नीत्वा एव स्वराजकोषात् त्रिगुणितं दाढ्यविशिष्टं विस्तारपूर्णञ्च कारितवान्।

**राज्ञां व्यक्तित्वचित्रणम्-**

उत्कलप्रदेशीयः चेदिवंशीयकलिङ्गराजा खारवेलस्य वीरचरित्रस्य वर्णनं हस्तिगुहाया अभिलेखेषु प्राप्यते। राजाखारवेलः समस्तासु विद्यासु निपुणः, राजोचितगुणविशिष्टश्चासीत्। प्रयागप्रशस्तिषु एवं एरणाभिलेखेषु च समुद्रगुप्तस्य उत्कृष्टव्यक्तित्वस्य चित्रणं प्राप्यते।

मेहरौलीलोहस्तम्भाभिलेखे चन्द्रस्य ऐहोलाभिलेखे द्वितीयस्य पुलकेशिनः (६३४ ईस्वी), गिरनाराभिलेखे रूद्रदाम्नः (१५० ईस्वी) तथा देहलीटोपरास्तम्भाभिलेखे (११६३ ईस्वी) मध्ये शाकम्भरीचौहाननरेशबीसलदेवस्य उदात्तव्यक्तित्त्वं चित्रितमस्ति।

**पाश्चात्यानां राज्ञामुल्लेखः-**

सम्राट् अशोकः स्वराज्यस्य सीमासम्बन्धिनः ये राजानः पाश्चात्यभूताः तैः सह सहजं सम्बन्धं स्थापयति स्म। ते राजानः यथा- एण्टीओकसनामकाः यूनानीराजानः, तथैव अन्येऽपि सामन्तभूताः शासकाः तेषां ज्ञानं द्वितीयशिलालेखात् जायते। त्रयोदशशिलालेखादपि ज्ञायते यत्, अशोकः स्वप्रशासनमध्ये एतदर्थमेव विदेशविभागस्य स्थापनां कृतवान्।

**तिथिक्रमकालक्रमयोश्च निर्धारणम्-**

ऐतिह्यनिर्माणे अभिलेखेषु उल्लिखिताः तिथयः संवत्सररूपेण उपयोगिन अभवन्। महाकविकालिदासभारव्योश्च कालनिर्धारणप्रसङ्गे द्वितीयस्य पुलकेशिनः ऐहोलाभिलेखे (६३४ ईस्वी) लिखिता या तिथिः सा प्रमाणिकीति प्रतिभाति। कृत्संवत्सरः, मालवसंवत्सरः, विक्रमसंवत्सरः, शकसंवत्सरः, (वलभीसंवत्सरः) गुप्तसंवत्सरः, हर्षसंवत्सरः इत्यादीनामुल्लेखः ऐतिह्यनिर्माणे सहायकाः भवन्ति।

KOUSIK PATRA

Edit with WPS Office

अभिलेखेषु प्रयुक्ता ब्राह्मीलिपी तस्याः एव देवनागरीलिपेः विकासः परिकल्पितोऽस्ति। अभिलेखेषु प्रयुक्ताः याः संस्कृतपालीत्यादयः भाषाः तात्कालिकभाषावैचित्र्यसम्पादने विकासक्रमस्य च बोधने पर्याप्तरूपेण योगदानं कुर्वन्ति। लेखनकलायाः प्राचीनत्वस्य प्रामाणिकतथ्यानां प्रकटीकरणे अभिलेखाः प्रमुखां भूमिकां निर्वहन्ति। प्राचीनभारतीयसंस्कृतेः यथार्थं रूपम् अभिलेखेषु एव दृग्गोचरी भवति। तात्कालिकानां सामाजिकधार्मिकार्थिकसाहित्यिकानां स्थितेः चित्रणं अभिलेखतः एव उपलभ्यते।

**सामाजिकं चित्रणम्–**

सम्राजः अशोकस्य अभिलेखेषु सामूहिकपरिवारप्रणाली दृग्गोचरी भवति। वर्णाश्रमधर्मस्य प्रसङ्गे ब्राह्मणस्य सम्बन्धः दानेन, क्षत्रियाणां शासनेन, वैश्यानां व्यापारकृषिपशुपालनादिना, शूद्राणां च सेवया वर्णनं कृतमस्ति। तत्र वर्णनक्रमे कायस्थादीनां जातीनामपि वर्णनं कृतमस्ति। अशोकः स्वकीये नवमशिलाभिलेखे दासेन सेवकेन च साकं सम्यक् व्यवहारस्य उपदेशं दत्तवान्। राज्ञः विवाहप्रसङ्गे नानाविवाहवर्णनमपि मिलति। मनोरञ्जनसाधनेषु मृगया, संगीतम्, द्यूतक्रीडा इत्यादीनि आसन्। कुषाणशकादीनां शासकानाम् अभिलेखेभ्यः ज्ञायते यत्, ते हिन्दुधर्मसंस्कृतिभाषादिभ्यः प्रभावितो भूत्वा हिन्दुनामानि रीतिं पद्धतिं च स्वीकृतवन्तः। ते भारतीयशासकैः सह वैवाहिकं सम्बन्धमपि स्थापितवन्तः। पट्टवायश्रेण्याः मन्दसौरप्रस्तराभिलेखानुसारेण स्त्रियः यदा वहिर्गच्छन्ति स्म तस्मिन् काले ताः रेशमीवस्त्रं, स्वर्णहारं, पुष्पमालां च धरन्ति स्म। कलाकर्तारः स्वबंधुभिः सह दशपुरेषु आगच्छन्ति स्म। अयं क्रमः तेषां कुटुम्बप्रणालीं बोधयति।

KOUSIK PATRA

**आर्थिकी अवस्था-**

अभिलेखेषु वर्णितानां भूमिदानं, ग्रामदानं, कूपनिर्माणम्, सरोवरनिर्माणं, ताम्रपट्टादिप्रयोगकरणं तात्कालिकीमुच्चार्थिकव्यवस्थां ज्ञापयति। आर्थिकस्थितेः सुदृढ़कारणादेव रूद्रदामा प्रजाभ्यः करग्रहणं उपहारग्रहणं च न कृतवान्। स्वराजकोषादेव उत्कृष्टं बन्धनिर्माणं कारितवान्। नालंदाताम्रपत्रे भोजनस्य उच्चं स्तरं दर्शितमस्ति। रूद्रदामा (१५० ईस्वी) तथा स्कन्दगुप्तः (प्राय: ४५५-४६७ ईस्वी) इत्यनयोः तिथिविहीनाः गिरनाराभिलेखाः बोधयन्ति यत्, मौर्यचन्द्रगुप्तद्वारा निर्मितस्य अशोकद्वारा प्रणालिकयादिभिः संवर्धितस्य सुदर्शनसरोवरस्य रूद्रदामास्कन्धगुप्तौ पुनः संस्कारं कारितवन्तौ। व्यापारक्षेत्रे निगमानां श्रेणीनाञ्च उल्लेखः प्राप्यते। पट्टवायश्रेण्याः मन्दसौराभिलेखाः (५२९, मालवसंवत् ४७२ ईस्वी) मध्ये सूर्यमन्दिरस्य निर्माणं पुनरुद्धारः, रेशमीवस्त्राणाविज्ञापनम् तस्य वस्त्रस्य देशे विदेशी प्रसिद्धत्वम् उत्कृष्टाम् आर्थिकस्थितिं बोधयन्ति।

Edit with WPS Office

**धार्मिकी अवस्था-**

अभिलेखेषु नाना धर्माणां सम्प्रदायानाञ्च उल्लेखः प्राप्यते। अशोकस्य अभिलेखेषु ब्राह्मणश्रमणाजीवकानां धार्मिकसम्प्रदायानां प्रचलनमासीत्। अशोकः राष्ट्रधर्मेण सह वैयक्तिकजीवनेऽपि बौद्धधर्मं स्वीकृतवान्। चेदिवंशीयकलिङ्गसम्राटः खेरवालहस्ति-अभिलेखात् ज्ञायते यत्, लेखानाम् आरम्भः अर्हतजैनसिद्धानां नमस्कारेण भवति स्म। मेहरौलीलौहस्तम्भाभिलेखे राजाचन्द्रेण विष्णुध्वजस्य स्थापना कारिता।

अभिलेखानां प्रारम्भः मङ्गलकारिभ्यः शब्देभ्यो भवति स्म। यथा- सिद्धम्, ओम्, स्वस्तिः, श्रीः, ॐ, स्वस्ति इत्यादिभ्यः। सूर्यशिवशक्तिगणेशादीनां देवानाम् आराधनाया अनेके लेखाः प्राप्यन्ते। लेखानां निर्विघ्नसमाप्तिकामनया मङ्गलकामना भवति स्म। तदतिरिक्तं यज्ञदानमन्दिरनिर्माणमन्दिरजीर्णोद्धारप्रतिमास्थापनादेवपूजनोत्सवव्रततीर्थयात्रादीनां वर्णनं कृतमस्ति।

**भौगोलिकी स्थितिः-**

अभिलेखेषु विभिन्नानां नगराणां पर्वतानां नदीनाञ्च स्थितेः वर्णनं कृतमस्ति। राज्ञां यात्रामार्गाः, राज्यविस्तारः, सीमानाञ्च विस्तारादीनाम् ऊल्लेखप्रसङ्गे प्रतिपादितं वर्णनं ऐतिह्यनिर्माणे पाषाणवत् कार्यं करोति। यथा- अशोकस्य साम्राज्यविस्तारः पूर्वस्मिन् बङ्गादत् आरभ्य उत्तरस्यां हिन्दुकुशपर्यन्तं ततोऽपि हिमालयात् आरभ्य दक्षिणदिशि मैसूरस्य दक्षिणीभागचित्तलदुर्गपर्यन्तं विस्तृतमासीत्। रूद्रदाम्नः गिरनाराभिलेखे निम्प्रप्रदेशाः वर्णितास्सन्ति। यथा- पूर्वापराकरावन्त्यनूप-नीवृदानर्त्त-सुराष्ट्र-श्वभ्र-मरु-कच्छ-सिन्धु-सौवीर-कुकुरापरांत-निषादादीनां ... तत्र ऊर्जयत्पर्वतस्य सुवर्णसिकतायाः एवं पलाशिनीनदीनाञ्च ऊल्लेखः प्राप्यते। देहलीटोपरास्तम्भाभिलेखे विन्ध्यहिमालययोः मध्यभागं वीसलदेवः अधिकृतं कृतवान्।

**साहित्यिकं महत्त्वम्-**

अभिलेखेषु विभिन्नसाहित्यिकवर्णनं ऐतिह्यनिर्माणे कार्यं करोति। संस्कृतगद्यस्य उत्कृष्टोदाहरणस्वरूपे रूद्रदाम्नः (१५० ईस्वी) गिरनाराभिलेखे अलङ्कारस्य, रीतेः तथा गद्यसौन्दर्य विधायकानां समेषां गुणानां प्रयोगः प्रयुक्तोऽस्ति। समुद्रगुप्तस्य एरणस्तम्भाभिलेखे वसन्ततिलकच्छन्दसि तथा चन्द्रस्य महरौलीलौहस्तम्भाभिलेखे शार्दूलविक्रीडितछन्दसि श्लोकः निबद्धोऽस्ति। मन्दसौरस्य पट्टवायश्रेणि-अभिलेखः चतुश्चत्वारिंशत् श्लोकानां एकं सुन्दरं लघुकाव्यमस्ति। अभिलेखेभ्यः हरिषेणः, वत्सभट्टिः, रविकीर्तिः, इत्यादीनां कवीनां नामानि प्रकाशे आगच्छन्ति।

**उपसंहारः**

KOUSIK PATRA

Edit with WPS Office

यदि अभिलेखस्मारकमुद्रादीनां पुरातत्ववेत्तारः अन्वेषणं न कृतवन्तः स्युः तदा भारतराष्ट्रं स्वातीतस्य गौरवं न प्राप्नुयात्। उपरोक्तानि समस्तानि अपि तथ्यानि प्राचीनभारतस्य ऐतिह्यसंस्कृत्योश्च निर्माणे सहायकानि अभवन्। इति दिक्।

-----------

**३. भारतीयाभिलेखशास्त्राध्ययनस्य इतिहासः/परम्परा**

**अथवा**

**भारते अभिलेखशास्त्रीयाध्ययनैतिह्यम्**

**उत्तरम्** अभिलेखशास्त्रीयाध्ययनस्य स्वर्णयुगस्य प्रारम्भः १८३८ ईस्वीतः जेम्सप्रिंसेपमहोदयस्य ब्राह्मीलिपेः अध्ययनात् अभवत्। अभिलेखशास्त्रीयम् अध्ययनं त्रिषु चरणेषु विभक्तमस्ति। यथा-

१. प्रस्तरताम्रपट्टे उत्कीर्णानाम् भिलेखानां सर्वेक्षणम्, प्रलेखनम्, प्रतिचित्रणञ्च।

२. मुद्राणां सर्वेक्षणम् प्रलेखनञ्च।

३. लेखानां स्पष्टीकरणम् (अध्ययनम् प्रकाशनञ्च)।

भारतीयपुरातत्वसर्वेक्षणविभागस्य स्थापनायाः (१८६१ ईस्वी) अनन्तरं अनुवादकार्यं लिप्यन्तरीकरणञ्च आभ्यां सह अभिलेखानां प्रकाशनकार्यस्य च प्रारम्भोऽभवत्। भारतीयपुरातत्त्वसर्वेक्षणविभागः भारतसर्वकारस्य सांस्कृतिकविभागस्य एकः सर्वकारी विभाग अस्ति। यो विभागः पुरातत्त्वाध्ययनस्य तथा सांस्कृतिकस्मारकानाम् अनुरक्षणार्थं दायित्वं निर्वहति। १८७१-१८८५ इति मध्ये अलेक्जेण्डरकनिंघममहोदयः अस्य विभागस्य प्रथममहानिर्देशक आसीत्। भारतीयाभिलेखशास्त्रीयाध्ययनस्य संवर्धकाः चार्ल्सविल्किन्स-महोदयः, पण्डितराधाकान्तशर्मा, बैंबीगटनमहोदयः, जेम्सटाँडमहोदयः , कनिंघममहोदयः, फ्लीटमहोदयः, ब्यूटरमहोदयः, गौरीशंकरहीराचन्दओझा महोदयः, हुल्शमहोदयः, डी ० सी ० सरकारः, डाँ ० अहमदसहनदानी इत्यादयः विद्वांसः सन्ति। १८३२ ईस्वीमध्ये **जनरल ऑफ द एशियाटिकसोसाईटी ऑफ बंगाल** पत्रिकायाः प्रकाशनात् अभिलेखशास्त्रस्य अध्ययनस्य प्रचारो प्रसारश्च अभवत्। तदनन्तरं शिलालेखः, दानपत्रं तथा नाणकानि आकर्षणकेन्द्राणि अभवन्। १८६१ ईस्वीमध्ये ईस्टइण्डियाकम्पनीपक्षतः जनरलकनिंघममहोदयस्य अध्यक्षतायां **आर्क्योलोजिलसर्वे** नामिकायाः संस्थायाः स्थापना अभवत्। यस्यां शोधकार्यस्य पर्याप्तमात्रायाम् उन्नतिः

Edit with WPS Office

अभवत्। १८७२ ईस्वीवर्षे डॉ.बर्ग्रेस महोदयः 'इण्डियन एंटीक्वेरी' नामिकायाः पत्रिकायाः प्रारम्भम् अकरोत्। यस्यां पत्रिकायां प्राचीनशोधपत्रैः सह शिलालेखताम्रपत्रनाणकादिविषयाः लेखाः प्रकाशङ्गताः। १८७७ ईस्वीमध्ये महानिर्देशकः कनिंघममहोदयः तत्कालपर्यन्तं प्राप्तानां मौर्यवंशीराजा-अशोकमहोदयानां शिलालेखानाम् एकम् अनुपमं ग्रन्थं व्यलेखि। यस्य नाम आसीत् **Corpus Inscriptionuem Indicarum (CII) Part-1**

१९२५ ईस्वीमध्ये ई ० हुल्समहोदयः उपरोक्तस्यैव पुस्तकस्य द्वितीयं भागं प्रकाशितवान्। अस्याः शृङ्खलायाः सप्तभागाः प्रकाशिताः जाताः। तेषु गुप्तवंश-वाकाटक-कलचुरी-चेदि-शिलाहार-चन्देल-परमारादीनां वंशानां अभिलेखचर्चाः प्रकाशिताः सन्ति। एतेषां सिद्धिकरणे स्टेनकोनो-एल्० एच्० ल्यूडर्समहोदयः, डी० आर्० भण्डारकरमहोदयः, वि० वि० मिराशीमहोदयः, बी० च० छाबड़ामहोदयः, जी० एस० गैमहोदयः, एच० बी० त्रिवेदीत्यादयः प्रतिष्ठिताः विद्वांसः आसन्। १८८८ ईस्वीमध्ये जे० एफ्० फ्लीटमहोदयः गुप्तवंशानां तत्समकालीनानां राज्ञां शिलालेखानां दानपत्राणां सग्रहात्मकं एकं ग्रन्थं सिद्धं कृतवान्। तस्य नाम **Corpus Inscriptionuem Indicarum (CII) Part-3** आसीत्।

आर्क्योलोजिकलसर्वे पक्षतः १८९२ ईस्वीमध्ये **एपिग्राफिया इण्डिका** नामकपत्रिकायाः प्रकाशनारम्भोऽभवत्। यस्यां केवलं शिलालेखाः दानपत्राणि च प्रकाशितानि जातानि। १९०२ ईस्वीमध्ये जॉनमार्शलमहोदयस्य अभिलेखवेत्ता पदे नियोगोऽभवत्। सः महोदयः मोहनजोदड़ो-तक्षशिला-साँची-राजगिरि-सारनाथादीनां स्थलानां खननकार्यं कारितवान्। सेवार्थं धनादिकं न नीत्वा अवैतनिकः अभिलेखवेत्ताविशेषज्ञरूपेण नियुक्तः रासमहोदयः फारसी-अरबीभाषायाः अभिलेखानाम् **एपिग्राफिया इण्डिका** पत्रिकायां प्रकाशनं कुर्वन्नासीत्। १८८७ ईस्वीमध्ये प्रथमाम् **An Report of Indian Epigraphy** पत्रिकां डॉ. हुल्शमहोदयः प्रकाशितवान्। प्रतिवर्षम् अस्मिन् प्रकाशने अभिलेखविषयकान् विषयान् प्रकाशयति स्म्। एवं प्रकारेण प्रायः शतं प्रकाशनानि प्रकाशितानि जातानि। १८८७ ईस्वीतः-१९९० ईस्वीपर्यन्तं यानि प्रकाशनानि आसन् तानि अतीवोपयोगीनि जातानि। १९९६ ईस्वी इत्यस्य वार्षिकप्रत्यावेदनस्य पुनर्मुद्रणं २००५ ईस्वीवर्षे अभवत्। भारतीयाः विद्वांसः भाऊदाजीमहोदयाः रूद्रदाम्नः गिरनाराभिलेखस्य प्रतिलिपेः आंग्लपाठं अनुवादञ्च सर्वप्रथमं प्रकाशितवन्तः। अस्य अभिलेखस्य प्रथमं पाठं जेम्सप्रिंसेपमहोदयाः सिद्धं कृतवन्तः। तस्य पाठस्य भाऊदाजीमहोदयाः संशोधितं पाठं प्रस्तु कृतवन्तः। तस्मिन्नेव वर्षे राजेन्द्रलालमित्रमहाभागाः बङ्गदेशस्थसेनराज्ञां लेखान्, उत्तरगुप्तकालीनान् अफसदलेखान् च प्रकाशितं कृतवन्तः। भाऊदाजीमहोदयाः धारवाड़मैसूराभ्यां प्राप्तानाम् अभिलेखानां चित्रात्मिकां प्रतिलिपिं सिद्धं कृतवन्तः। भारतीयविद्वत्सु डॉ०

KOUSIKPATRA

Edit with WPS Office

अल्तेकरमहाभागाः प्रशंसनीयाः सन्ति, ये नाणकेभ्यः भारतीयैतिह्यस्य नाना कालविभागान् प्रकाशितवन्तः। प्राचीनशोधकार्यविषयमधिकृत्य नाना संस्थाः सर्वकाराश्च प्राचीनं शिलालेखं, दानपत्रं, नाणकानि, मुद्राः, प्राचीनाः मूर्तयः, शिल्पस्य श्रेष्ठोदाहरणानि, इत्यादीनां बहुमूल्यविशिष्टानां वस्तूनां संग्रहकार्यमारम्भं कृतवन्तः। एवं भूतानां वस्तूनां संग्रहकार्यम् एसियाटिकसोसाईटी, मुम्बईमध्ये, भारतीयसंग्रहालयकोलकातानगरे, मद्रासे (चेन्नई) मध्ये, नागपुरे, अजमेरनगरे, लाहौरनगरे, पेशावरमध्ये लक्ष्मणपुरे (लखनऊ) मध्ये अभवत्। भारतीयराज्येषु प्राचीनशोधसम्बन्धीकार्यालयस्य स्थापना जाता। यथा भावनगरप्राचीनशोधसंग्रहालयः, एपिग्राफियाकर्नाटिका, एंटिक्वीटिज आँफ् चम्बाटेस्ट, इत्यादिषु ग्रन्थेषु प्राचीनशिलालेखानां, दानपात्राणां, नाणकादीनां वस्तूनां प्रकाशनकार्यमारम्भं जातम्। विभिन्नाभिलेखविशेषज्ञाः अभिलेखविषयिकां सूचीमपि प्रकाशितं कृतवन्तः। यथा-

1. A List of Inscriptions of North Indian in Brahmi and its derivative scripts from about 200 AD by D.R. Bhandarakar.

2. A List of Inscriptions of North and South India about 400 AD by Kilhorn.

3. A List Of Brahmi Inscriptions from the earliest times to about 400 AD with exceptions of those of Ashok by Lyudars.

4. Select Inscriptions by D.C. Sarakar.

भौगोलिकशब्दकोषा अपि प्रकाशिताः जाताः यथा-

1. Bombay Gazetter

2. Imperial Gezetteer of India

3. Gujrat Gezette

4. Maharashtra Gazette

अभिलेखशास्त्रसम्बन्धिनः अध्ययनविषयकाश्च नाना ग्रन्थाः प्राणीता अभवन्। यथा-

१. १९१८ ईस्वीमध्ये गौरीशंकरहीराचन्द ओझामहोदयाः भारतीयप्राचीनलिपिमाला इत्याख्यस्य ग्रन्थस्य रचनां कृतवन्तः।

२. जर्मनभारतीविद् जार्जब्यूलरमहोदयाः **Indische Palaeographie** नामकस्य

KOUSIK PATRA

Edit with WPS Office

ग्रन्थस्य १९०४ ईस्वीमध्ये जर्मनभाषायां लिखितवन्तः। १९६६ ईस्वीमध्ये भारतीयपुरालिपिशास्त्रमिति नाम्ना श्रीमङ्गलनाथसिंहः हिन्दीभाषायामनूदितवन्तः।

३. १९६५ ईस्वीमध्ये डी० सी० सरकारमहोदयाः इण्डियन एपिग्राफी नामकस्य ग्रन्थस्य रचनां कृतवन्तः।

४. १९६३ ईस्वीमध्ये अहमद-हसन-दानीमहोदयस्य इण्डियन एपिग्राफी नामकः ग्रन्थः अतीवोपयोगी सिद्ध अभवत्।

---------

**४. प्राचीनभारतीयकालक्रमस्य सामान्यो परिचयः।**

साहित्यस्य तथान्यस्य च लेखादिकस्य रचनायाः विषये गम्भीरविश्लेषणात्मकाध्ययनार्थं ग्रन्थविशेषस्य कालक्रमस्य ग्रन्थकर्तुश्च ज्ञानं परम् आवश्यकमिति। साहित्ये परिलक्षितानां तात्कालिकसामाजिकराजनैतिकार्थिकादीनां परिस्थितीनाम् ऐतिहादृष्ट्या ज्ञानार्थं कालक्रमस्य महत्त्वपूर्णं स्थानं वरीवर्ति। परन्तु प्राचीनभारतस्य समृद्धसाहित्यस्य परम्परायाः कालक्रमस्य निर्धारणे किमपि स्थिरं प्रमाणं न मिलति अतः सर्वदैव अनुसन्धानस्य विषयः।

अतः प्राचीनभारतस्य कालक्रमस्य निर्धारणार्थं वैज्ञानिकं प्रामाणिकञ्च सिद्धान्तप्रमाणस्य वश्यकता भवति। संस्कृतसाहित्यस्य रचनानां कवीनाञ्च कालनिर्धारणकाले बहव्यः समस्याः समुपस्थिताः भवन्ति। यथा नाना स्थलेषु एकस्यैव नाम्नः अनेकस्य कवेः यदा उल्लेखो भवति तदा अभिप्रेतस्य कवेः कालनिर्धारणं सर्वथा न सम्भवति। प्राचीनकाले आश्रयदातारः ये राजानः ते कविभ्यो विशिष्टोपाधिना विभूषयन्ति स्म। यथा तञ्जौरराज्ये अभिनवजयदेवः, अभिनवपतञ्जलिरित्यादिना उपाधिना कवीनाम् अभिनन्दनं भवति स्म। एवमेवाभिनवबाणः, अभिनवकालिदासः अस्यापि परम्परा प्राप्ता भवति। कालान्तरे अभिनवेत्यस्य पूर्वपदस्य लोपे सति कविभिः नामभिः साम्यताकारणात् मूलकवेर्कालनिर्धारणं बहुकष्टकरमिति। साहित्यमात्रमेव नहि अपूर्णाभिलेखकारणादपि कालक्रमनिर्धारणे बाधा उत्पन्ना भवति। एवं प्रकारेण अभिलेखेषु बहवः संवत्सराः प्राप्यन्ते यथा- कृतसंवत्सरः, विक्रमसंवत्सरः, शकसंवत्सरः, गुप्तसंवत्सरः, वलभीसंवत्सरः इत्यदयः। संवसन्ति ऋतवोऽत्र इति संवत्सरः। सम् वस् सरन् प्रत्यये सति सिद्ध्यति अयं शब्दः। एतेषां संवत्सराणाम् आरम्भः कदा अभवत् कोऽवा कृतवान् इत्यादयः विषयाः अनुसन्धानयोग्याः।

[ कालक्रमनिर्धारणप्रसंगे प्राचीनसाहित्यविषये प्रोक्तमस्ति यत्, एते ग्रन्थाः ऐतिह्यदृष्ट्या

KOUSIK PATRA

Edit with WPS Office

न रचिता अपितु तत्र कथा प्रसंगाश्च स्वीकृताः सन्ति। यत्र विभिन्नकालानां तथ्यानाञ्च सम्मिश्रणं प्राप्यते। एतदर्थमेव प्राचीनाः ग्रन्थाः ऐतिह्यकालक्रमनिर्धारणे पूर्णतः प्रामाणिकाः न भवन्ति। विद्वांसः प्राचीनभारतस्य कालक्रमनिर्धारणार्थं साहित्यिकं ग्रन्थं, पुरातात्त्विकानि स्रोतांसि, पाश्चात्यदेशिकैः प्रदत्तानि भारतविषयकाणि विवरणानि, ज्योतिषशास्त्रञ्च अधिकृत्य यतन्ते। यथा-

**साहित्यिकानि स्रोतांसि-**

संस्कृतसाहित्यस्य एकमात्रं ग्रन्थः कल्हणविरचितः राजतरंगिणी (११२७-११४९ ईस्वी) काश्मीरस्य अत्यन्तप्राचीनकालात् आरभ्य द्वादशशताब्दीं यावत् प्रामाणिकं विवरणं प्रस्तौति। वैयाकरणपाणिनेः कालनिर्धारणार्थं श्रीवासुदेवशरण-अग्रवालमहोदयः स्वकीये **India as known to Panini** पुस्तके अष्टाध्याय्याः भौगोलिकसांस्कृतिकसामाजिकधार्मिकतथ्यादीनां विवरणाधारेण पञ्चमी शताब्दी इति निर्धारयन्ति।

**विदेशीविवरणम्-**

विदेशीलेखकाः, वैदेशिकाः यात्रिणः यदा भ्रमणार्थं भारतमागवन्तः तदा तस्मिन् काले भारतविषयकं ज्ञानं कालक्रमनिर्धारणे पर्याप्तं प्रमाणिकं सिद्धं भवति। यूनानी, रोमनचीनतिब्बतमुगलयात्रिणः स्वकीयमनुभवं यथार्थरूपेण प्रकाशितवन्तः। एतेषु यात्रिषु चीनयात्री फाँहियान (३९९-४१४ ईस्वीं यावत्) उवांग च्वांग (६२९-६४५ ए० डी०) इत्सिंग (६७३-६९५ ईस्वी०) इत्यादिभिः यात्रिभिः दत्तं यद्विवरणं तत्सर्वं भारतीयकालक्रमनिर्धारणे प्रमाणं भवति। संस्कृतविद्वान् मुगललेखकः एलबेरूनी (१०१७-१०३० ईस्वी) '**ताखी के हिन्द**' इत्याख्ये पुस्तकेऽपि कालनिर्धारणविषयकं विवरणं प्राप्यते। एलबेरूनी लिखति यत्, सः दशमशताब्द्यां शिवपुराणं एवं पूर्णरूपं प्राप्तवानासीत्।

**ज्योतिषशास्त्रम्-**

पाश्चात्यविद्वांसः वेबरमहोदयाः जैकोबीमहोदयाश्च वेदादीनां कालनिर्धारणार्थं ज्योतिषशास्त्रमधिकृत्य स्वकीयं विचारं दत्तवन्तः। भारतीयविद्वत्सु लोकमान्यः बालगंगाधरतिलकः ज्योतिषगणनाधारेण वेदस्य रचनाकालं ४०००-२५०० ईसापूर्वं निर्धारितं कृतवान्।

**पुरातात्विकानि स्त्रोतांसि-**

कालक्रमनिर्धारणे साहित्यिकानि स्त्रोतांसि यदा पूर्णतया विषयं स्पष्टं कर्तुम् असमर्थानि

KOUSIK PATRA

Edit with WPS Office

भवन्ति तदा सौभाग्यवशात् अभिलेखाः, नाड़कानि, मुद्राः, स्मारकाश्च उचितं मार्गदर्शनं कुर्वन्ति। यथा मौर्यसम्राट् अशोकः स्वकीये द्वितीये त्रयोदशे च शिलालेखे स्वसमकालीनानां राज्ञाम् उल्लेखं कारितवान्। तेषां शासनकालविषयकाः तिथयः अन्यप्रमाणैः सिद्धाः भवन्ति।

१. यवनराजा अन्तियोकसद्वितीयः प्राय: २६१-२४८ ईसापूर्वम्।

२. अंतकिनः (एण्टीगोनसः) प्रायः २७७-२३९ ईसापूर्वम्।

३. टोलीमीद्वितीयः (मिस्री) प्राय: २८५-२४७ ईसापूर्वम्।

अशोकस्य अभिलेखेषु उल्लिखितानां समकालीनानां राज्ञां समयज्ञानकारणात् अशोकस्य कालम् ऐतिहासिकाः प्रायः २७०-२३२ ईसापूर्वं निर्धारयन्ति। चतुर्थपञ्चमशताब्दी ईसापूर्वं पिप्रावा अस्थिकलशाभिलेखः (प्रायः ४८७ ईसापूर्वम्) तथा बदली अजमेराभिलेखः (प्रायः ४४३ ईसापूर्वम्) कालनिर्धारणे: सहायको भवति।

राजाखारवेलस्य हस्तिगुहाभिलेखस्य अध्ययनानन्तरं स्पष्टं जातं यत्, खारवेलः कलिंगराज्ये प्रायः १८५-१७२ ईसापूर्वं शासनं चकार। अपि च खारवेलशासनकालीनानां घटनानां प्रस्तुतिकरणमपि यथासंख्यं कृतमस्ति। अस्मिन्नेवा खारवेलस्य नाम 'गन्धर्ववेदबुधः' प्रोक्तमस्ति। गन्धर्ववेदस्य सिद्धान्ताः नाट्यवेदे परिलक्षिताः भवन्ति। अनेन विद्वांसः परिकल्पयन्ति यत्, द्वितीयशताब्दी ईसापूर्वं नाट्यशास्त्रं विद्यमानम् आसीत्। संस्कृतसाहित्ये कवीनां कालनिर्धारणेऽपि अभिलेखानां महत्वपूर्णं स्थानं राजते। पुलकेशिन् (द्वितीयः) (प्रायः ५५६ शकसंवत् ६३४ ईस्वी) इत्यस्य ऐहोलाभिलेखे महाकविकालिदासस्य तथा भारवेश्च नामोल्लेखः प्राप्येत। यथा-

**'सः विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः।'**

अभिलेखकालानुयायिनः विद्वांसः भारवेः कालं षष्ठशताब्दीं स्वीकुर्वन्ति। अनेन अभिलेखेनैव कालिदासस्य अपि अवरसीमा ज्ञाता भवति। पट्टवायश्रेण्याः मन्दसौराभिलेखात् महाकविवत्सभट्टिरित्यस्य काव्यशैली कालिदासविरचिते ऋतुसंहारे मेघदूते च परिलक्षिता भवति।

अस्य अभिलेखस्य कालः मालवासंवतः ५२९ (४७२ ईस्वी) अस्ति। अनेनाधारेण महाकविकालिदासस्य कालं विद्वांसः चतुर्थशताब्द्याः पूर्वार्धं स्वीकुर्वन्तः। गुप्तसंवत् २१४ इत्यस्य शर्वनाथस्य खोहताम्रपट्टाभिलेखे महाभारतस्य अपरं नाम शतसाहस्रीसंहिता लिखितमस्ति। अनेन ज्ञायते यत्, गुप्तसंवत् २१४ (५३३-५३४ ईस्वी) पर्यन्तं महाभारतस्य रचना सिद्धा जाता। यदा कदा वैदिकानाम् अभिलेखा अपि कालनिर्धारणे

KOUSIK PATRA

Edit with WPS Office

सहायकाः भवन्ति यथा बोगाजकाई (एशिया माइनर) अभिलेखस्यान्वेषकः पुरातत्त्ववेत्ता हूगो विटीलरमहोदयः (Hugo wintiller) १९०७ ईस्वीमध्ये वैदिककालनिर्धारणे आस्य अभिलेखस्य उल्लेखं कृतवान्।

अभिलेखवत् नाणकानि अपि कालनिर्धारणे मार्गदर्शनं कुर्वन्ति यथा स्वर्णरजतताम्रनिर्मितानि नाड़कानि। तेषु उत्कीर्णितं चिह्नं, तिथिः, प्रतीकं, सर्वमपि ऐतिह्यस्य कालविशेषं प्रकटयति। यथा समुद्रगुप्तसम्पादितेन नाणकेन समृद्धिविषयकं ज्ञानं जायते।

डॉ० वासुदेवशरण-अग्रवालमहोदयः पाणिन्यष्टाध्यायीग्रन्थे प्राप्तानां मुद्राविषयकोद्धरणानाम् आधारेण पाणिनिं कौटिल्यात् प्राक्तनं स्वीकरोति। तेषां मतानुसारेण अष्टाध्याय्यां येषां नाणकानां वर्णनं प्राप्यते तेषामर्थशास्त्रे उल्लेखः नास्ति।

मेहरौलीलौहस्तम्भाभिलेखे उत्कीर्णस्य चन्द्रनामकराज्ञः निर्धारणं विद्वांसः लिप्याधारेण कृतवन्तः। चन्द्रनामकेषु पञ्चराजसु चन्द्रगुप्तद्वितीयेन सह चन्द्रस्य साम्यं सम्पादितमस्ति। उल्लेखस्य लिपिः गुप्तकालीना ब्राह्मी तथा भाषा संस्कृतमस्ति। ऐतिह्यविषयाणां कालक्रमनिर्धारणाय संवतः प्रयोगोऽपि महत्वं स्थापयति। विद्वांसः प्रामाणिकगणनानाम् आधारेण निश्चितं कृतवन्तः यत्, विक्रमसंवतः गणना ५७ ईसापूर्वमिति। शकसंवतः गणना ७८ ईस्वी, गुप्तसंवतः गणना ३१९ ईस्वी तथा हर्षसंवतः गणना ६०६ ईस्वीतः प्रारब्धा इति।

KOUSIK PATRA

-------------

**५. अभिलेखेषु तिथ्यङ्कनपद्धतिः आलोचनीया**

सर्वेऽपि अभिलेखाः राजभिरुट्टङ्किताः। तेषां राज्ञां नामानि कालाः, देशाः, परिस्थितय इति सर्वेषां वर्णनं यथातथ्यं प्राप्यते। तत्र तिथिलेखनस्य काचन् पद्धतिः प्रयुक्ता अस्ति। तिथ्याङ्कनस्य कृते आग्लभाषायां '**क्रोनोग्राम**' इति शब्दः प्रयुक्तोऽस्ति। अयं शब्दः ग्रीकभाषायाः शब्द अस्ति।

अभिलेखेषु प्राप्ताः याः तिथयः तस्याः पद्धतिद्वयं प्रसिद्धम्। यथा- १. शासनवर्षम् राज्यवर्षम् वा, २. नियमितं संवतः प्रयोगः चेति।

**१. शासनवर्षं राज्यवर्षं वा-**

प्राचीनभारतीयाभिलेखेषु गणनाया आरम्भः राज्ञः शासनवर्षाद् भवति। एतेषु अभिलेखेषु

Edit with WPS Office

कस्यापि संवतः प्रयोगः न दृष्टिपथम् आगच्छति। अशोकस्य अभिलेखेषु शासनवर्षस्य एवम् उल्लेखः प्राप्यते। यथा-

* द्वादसवासाभिसितेन मया (तृतीयः शिलाभिलेखः) द्वादशवर्षाभिषिक्तेन मया।

* दसवसाभिसितो संतो (अष्टमशिलाभिलेखः) दशवर्षाभिसिक्तः सन्।

* खारवेलस्य हस्तिगुहाभिलेखे (प्रायः प्रथमशताब्दी ईसापूर्वस्यान्ते) प्रथमशासनवर्षस्य उल्लेखः प्राप्यते। यथा 'अभिसितमतो पघमे वसे' राज्याभिषिकस्य सम्राटः प्रथमशासनवर्षे।

शासनवर्षेण राज्यवर्षेण वा अङ्किताभिलेखे प्रचलितायाः कालगणनाया अभावात् कालनिर्धारणम् अनुसन्धाविषयो भवति। अनेन स्पष्टं भवति यत्, प्रारम्भिककाले अभिलेखेषु तिथिलेखनस्य प्रथा न आसीत्। अनेन इदमपि सिध्यति यत्, तस्मिन् काले भारतराष्ट्रे कस्यापि जनप्रियसंवतः अस्तित्वमेव नासीत्।

**२. संवत्द्वारा तिथ्यङ्कनम् -**

अभिलेखेषु शनैः शनैः संवत् तिथिः दिवसः, ऋतुः, पक्षादीनाम् उल्लेखस्य प्रचलनं जातम्। सर्वप्रथमं उत्तरपश्चिमीभारतस्य वैदेशिकानां शासकानां नाड़केषु अभिलेखेषु च नियमितरूपेण संवतः प्रयोगः दृष्टिपथम् अवतरति। ऐतिह्यविशेषज्ञाः मतमिदं अभिलेखीयतथ्यम् आधारीकृत्य प्रकटितवन्तः। प्राचीनः शकपार्थीसंवत्सरः, कनिष्कसंवत्सरः कालान्तरे यथाक्रमं विक्रमसंवत्सरः, शकसंवत्सरः इत्यभिधेयान्तरं प्राप्तवान्।

शकपार्थीकालगणना (विक्रमसंवत्सरः) इत्यस्य उल्लेखः शोडासकालीनमथुराभिलेखे (७२ वर्षे) तथा शककालीनखरोष्ठीलिप्यां लिखितोऽयं लेखः तक्षशिलायाः ताम्रपट्टाभिलेखे (७८ वर्षे) प्राप्तो भवति। सम्भवतः एषा कालगणना पार्थीशासकस्य 'राजाधिराज' इति उपाधिप्राप्त्यनन्तरं जाता। अस्यै कालगणनायै शकपार्थीराज्ञाम् उत्तराधिकारिणः एकस्य नवीनसंवत्सरस्य नाम ददुः। विदुषां मते अयमेव विक्रमसंवत्सर इति। विक्रमसंवत्सरस्यारम्भः ५७ ईसापूर्वं बभूव। विक्रमसंवतः प्राचीनं नाम कृतसंवत् आसीत्। अस्यैव संवतः नाम मालवसंवत् नाम्ना, तथा च अनन्तरं विक्रमसंवत् इति व्यवहारोऽभवत्। इतिहासकाराः कृत-मालव-विक्रमादीनां समेषां एकदृष्टयैव गणनां कृतवन्तः। अभिलेखेषु त्रयाणामपि संवताम् उल्लेखः प्राप्यते। राजपुत्राणां मध्यभारतीयानाम् अभिलेखे कृतसंवतः प्रयोगः प्राप्यते।

कालान्तरे शकशासकाः सिन्धु-सुराष्ट्र-अवत्यादीनां भूभागेषु अधिकारं कृतवन्तः।

KOUSIK PATRA

Edit with WPS Office

कृतसंवतः गणनायां मालवसंवत: नाम अपि संयुक्तं जातम्। पट्टवायश्रेण्याः मन्दसौराभिलेखे 'मानवसंवत् ५२९' इति अङ्कितमस्ति। मालवसंवतः उल्लेख: मन्दसौरतः प्राप्तो भवति। सः लेखः यशोधर्मन: (विष्णुवर्द्धन:) इत्यस्य कालीनोऽस्ति। मालवगणजातेः स्थितिवशात् कालज्ञानाय लिखतमस्ति ५८९ वर्षेषु व्यतीतेषु मालवसंवत् एव (विक्रमसंवत्) ५८९ (५३२ ईस्वी) इति। नवमशताब्द्याः अनन्तरं ये अभिलेखाः तेषां कृतसंवतः मालवसंवतः नामः स्थाने विक्रमसंवत्सरस्यैव प्रयोगः लोकलोचितो भवति। वीसलदेवस्य देहलीटोपरास्तम्भाभिलेखे विक्रमसंवत्सरस्य, मासस्य, पक्षस्य, तिथेश्च उल्लेखः प्राप्यते।

ऐतिह्यविषयाणां कालक्रमनिर्धारणाय संवतः प्रयोगोऽपि महत्वं स्थापयति। विद्वांसः प्रामाणिकगणनानाम् आधारेण निश्चितं कृतवन्तः यत्, विक्रमसंवतः गणना ५७ ईसापूर्वमिति। शकसंवतः गणना ७८ ईस्वी, गुप्तसंवतः गणना ३१९ ईस्वी तथा हर्षसंवतः गणना ६०६ ईस्वीतः प्रारब्धा इति।

----------

टीका कार्या -**शकसंवत्सरः**

शकपार्थीगणनायाः स्थापना (५७ ईसापूर्वं) अनन्तरं पाश्चात्यनिवासिनः शासकाः कुषाणवंशिनः राजानः स्वशासनकालस्य वर्षैः गणनाभिः सह एकस्याः कालगणनायाः प्रारम्भं कृतवन्तः। सा कालगणनाऽपि एकस्य संवतः स्वरूपं प्राप्तवती। सा एव कालगणना **शकसंवत्** नाम्ना प्रसिद्धिं गतवती। शकसंवत्युक्तः एकः प्राचीन अभिलेख: वाराणसीसारनाथस्थबौद्धप्रतिमाभिलेख अस्ति। यो हि कनिष्ककालीन अस्ति। शकसंवतः प्रारम्भः विदुषां मते ७८ ईस्वी स्वीकृतोऽस्ति।

ईस्वीसन् इत्यस्य यदा ७८ इत्यनेन साकं योगो भवति तदा गुप्तसंवत्सरस्य परिज्ञानं भवति। यथा २०२१ + ७८ ईसापूर्वं संयोगे सति = २०९९ भवति।

रूद्रदान: गिरनाराभिलेखेऽपि शकसंवत्सरस्य गणना कृताऽस्ति। यथा- **महाक्षत्रपस्य गुरुभिरभ्यस्तनाम्रो रूद्रदाम्रो वर्षे द्वि-सप्ततितमे ७०, २ मार्गशीर्षबहुलप्रतिपदि** (७२ वर्षे मार्गशीर्षमासे कृष्णपक्षे प्रतिपदायां तिथौ)। अस्मिन्नभिलेखे शकसंवत् इत्यस्य ७२ (१५० ईस्वी) उत्कीर्णमस्ति। १९५५तमे ईस्वीवर्षे भारतसर्वकारः ईस्वीसंवत्सरेण सह शकसंवत्सरस्यापि प्रयोगं प्रारम्भं कृतवान्।

--------

KOUSIK PATRA

Edit with WPS Office

टीका कार्या-**<u>गुप्तसवत्सरः</u>**

गुप्तसम्राट् चन्द्रगुप्तप्रथमः गुप्तसंवत्सरमारम्भं चकार। गुप्तकालीनेऽभिलेखे गुप्तसंवत्सरस्य गुप्तकालस्य नाम्नः व्यवहारः प्राप्यते। गुप्तवंशानन्तरं काठियावाड़स्थाने बलभीराज्ञ उदयोऽभवत्। गुप्तसंवत्सरस्यैव नाम बलभीसंवत् अपि अस्ति। गुप्तसंवत्सरस्य कालगणना ३१९ ईस्वीतः आरब्धा।

ईस्वीसन् इत्यस्य यदा ३१९ इत्यनेन साकं योगो भवति तदा गुप्तसंवत्सरस्य परिज्ञानं भवति। यथा २०२१ + ३१९ ईसापूर्वं संयोगे सति = २३४० भवति।

चन्द्रगुप्तद्वितीयकालीनः साँचीस्तूपमध्ये प्राचीनाभिलेखे गुप्तसंवत्सरः ९३ उत्कीर्णोऽस्ति। बुद्धकालीनसारनाथबुद्धप्रतिमाभिलेखे गुप्तसंवत् १५७ (४७६ ईस्वी) उत्कीर्णमस्ति।

गुप्तवंशिनां राज्ञां संवत् १५७ वर्षाणि व्यतीते सति यदा पृथिव्यां बुधगुप्तः शासनम् अकरोत् तदा वैशाखमासस्य कृष्णपक्षस्य सप्तमीतिथिः। गुप्तोत्तरकालीनः महाराजः संक्षोभः इत्यस्य खोहताम्रपट्टाभिलेखे गुप्तसंवत् २०९ (५२८ ईस्वी) इत्यस्य उल्लेखः प्राप्यते। गुप्तबलभी नाम्ना अस्य संवतः उल्लेखः द्रोणसिंहस्य गुप्तसंवत् १८३ (५०२ ईस्वी) तथा धरसेनद्वितीयस्य ताम्रपट्टे गुप्तसंवत् २५२ (५७१ ईस्वी) लिखितमस्ति।

---------

टीका कार्या-**<u>विक्रमसंवत्सरः</u>**

ईसाचतुर्थशताब्द्यां गुप्तसम्राट्-चन्द्रगुप्तद्वितीयः यस्योपाधिः विक्रमादित्य आसीत्। सः मालवकाठियाबाड़ास्थाने स्थितानां शकक्षत्रपशासकानां पराजयं कृतवान्। ततः परं तं भागं स्वसाम्राज्ये नियोजितवानिति। अस्मात् प्रागेव शकान् पराजयित्वा संवत्गणनायाः प्रारम्भो जात इति। पुनः तान् शकजनान् एव विक्रमादित्यः परास्तं कृतवान्। सम्भवतः अस्य विजयस्यैव स्मारकाणि चित्राणि प्राचीनकृतमालवसंवत्सरयोः नाम्नः परिवर्तनं कृत्वा **विक्रमसंवत्सरः** जात इति।

सर्वप्राचीनस्य संवत्सरस्य विक्रमसंवत्सरस्य प्रारम्भः ५७ ईसापूर्वं स्वीकृतोऽस्ति। ईस्वीसन् इत्यस्य यदा ५७ इत्यनेन साकं योगो भवति तदा विक्रमसंवतः परिज्ञानं भवति। यथा २०२१ + ५७ ईसापूर्वं संयोगे सति = २०७८ भवति।

विक्रमसंवतः प्राचीनं नाम कृतसंवत् आसीत्। अस्यैव संवतः नाम मालवसंवत् नाम्ना, तथा च अनन्तरं विक्रमसंवत् इति व्यवहारोऽभवत्। इतिहासकाराः कृत-मालव-विक्रमादीनां समेषां एकदृष्टयैव गणनां कृतवन्तः। अभिलेखेषु त्रयाणामपि संवताम्

KOUSIK PATRA

Edit with WPS Office

उल्लेख: प्राप्यते। राजपुत्राणां मध्यभारतीयानाम् अभिलेखे कृतसंवतः प्रयोगः प्राप्यते।

कालान्तरे शकशासकाः सिन्धु-सुराष्ट्र-अवत्यादीनां भूभागेषु अधिकारं कृतवन्तः। कृतसंवतः गणनायां मालवसंवत: नाम अपि संयुक्तं जातम्। पट्टवायश्रेण्याः मन्दसौराभिलेखे 'मानवसंवत् ५२९' इति अङ्कितमस्ति। मालवसंवतः उल्लेख: मन्दसौरतः प्राप्तो भवति। सः लेखः यशोधर्मन: (विष्णुवर्द्धनः) इत्यस्य कालीनोऽस्ति। मालवगणजातेः स्थितिवशात् कालज्ञानाय लिखतमस्ति ५८९ वर्षेषु व्यतीतेषु मालवसंवत् एव (विक्रमसंवत्) ५८९ (५३२ ईस्वी) इति। नवमशताब्द्याः अनन्तरं ये अभिलेखाः तेषां कृतसंवतः मालवसंवतः नामः स्थाने विक्रमसंवत्सरस्यैव प्रयोगः लोकलोचितो भवति। वीसलदेवस्य देहलीटोपरास्तम्भाभिलेखे विक्रमसंवत्सरस्य, मासस्य, पक्षस्य, तिथेश्च उल्लेखः प्राप्यते।

----------

KOUSIK PATRA

**निर्वाचितानाम् अभिलेखानाम् अध्ययनम्**

१. अशोकस्य प्रथमगिरनाराभिलेखः।

२. अशोकस्य सारनाथाभिलेखः।

३. रूद्रदाम्नः गिरनाराभिलेखः।

४. समुद्रगुप्तस्य  अभिलेखः।

५. चन्द्रगुप्तस्य अभिलेखः।

६. बीसलदेवस्य देहलीटोपरास्तम्भाभिलेखः।

Edit with WPS Office

## १. अशोकस्य प्रथमगिरनाराभिलेखस्य तात्पर्यम्/महत्वम्

**उत्तरम्-**

**प्राप्तिस्थानम्-** गुर्जरप्रदेशस्य जूनागढनगरात् प्रायः द्विकिलोमीटरपूर्वं गिरनारनामकः पर्वतः विद्यते। तत्रैव एकस्यां शिलायां पूर्वोत्तरभागे अशोकस्य चतुर्दशाभिलेखाः उत्कीर्णाः सन्ति। अस्य अभिलेखस्य पृथग् करणार्थं मध्ये रेखाङ्किता अस्ति। तेषु अन्यतमः अभिलेखोऽस्ति अशोकस्य प्रथमगिरनाराभिलेखः।

**अध्ययनकर्ता-** अशोकस्य प्रथमगिरनाराभिलेखस्यापि अध्ययनकर्ता जेम्स प्रिंसपमहोदयः अस्ति।

**गठनविन्यासः-** द्वादशपङ्कितिविशिष्टोऽयमभिलेखः।

**इयं धर्मलिपिः देवानां प्रियेण । २. प्रियदर्शिना राज्ञा लेखिता ।भाषा लिपिः च-** अयमभिलेखः प्राकृतभाषायां ब्राह्मीलिप्यां च टङ्कितासीत्।

**समयकालः-** विदुषां मते अशोकस्य कालः प्राय: २७२ तः २३२ ईसापूर्वमासीत्।

**अभिलेखस्य प्रतिपाद्यविषयः-** मगधस्य राजा मौर्यवंशी अशोकचन्द्रगुप्तस्य पौत्रः बिन्दुसारस्य पुत्रः आसीत्। कलिङ्गयुद्धस्य विजयानन्तरं मानवधर्मस्य वास्तविकं रूपं भारतीयजनानां समक्षं तथा च भारतात् बहिः जनानां समक्षं च प्रदर्शितवान्।

कलिङ्गयुद्धस्य भीषणहत्याकाण्डेन सम्राट्-अशोकस्य चित्तं विकृतं जातम्। तस्य परिणामस्वरूपं स हिंसायाः परिपूर्णतया परित्यागं कृत्वा धर्ममार्गं स्वीकृतवान्। तस्मात् कारणात् अशोकः अधिकांशाभिलेखेषु धर्मसम्बन्धी व्याख्यां प्रदर्शितवान्।

अशोकस्य प्रथमगिरनाराभिलेखे प्राप्यते यत्, **इयं धम्मलिपी देवानां प्रियेन प्रियदशिना राञा लेखापिता (इयं धर्मलिपिः देवानां प्रियेण प्रियदर्शिना राज्ञा लेखिता)**। 'धम्म'इति पदं संस्कृतस्य धर्मशब्दस्य प्राकृतं रूपमिति। धम्मलिप्याः धर्मलिप्याः वा एतादृशं तात्पर्यं भवति यत्, प्रजानां नैतिकदृष्ट्या धार्मिकदृष्ट्या वा उद्बोधनं करणम्। एषा धम्मलिपिः प्रजानां कर्त्तव्याकर्तव्ययोः बोधकरणार्थं प्रयुक्त भवति स्म। यथा प्रथमशिलालेखे पशुहिंसा निषेधः, धार्मिकसम्प्रदायानां परस्परं सहनं, परलोककल्याणं, धर्मदानं, धर्ममित्रता, धर्मसम्बन्धः, श्रेष्ठता विषये च वरं चिन्तनमासीत्।

देवानां प्रियः शब्दार्थस्तु देवतानां प्रियः इत्यर्थः। अयं शब्दः मौर्यसम्राटशोकस्य सम्मानसूचिका उपाधिरिति। अस्य प्रियदर्शी अपि सम्मानसूचकं नाम विद्यते। मास्की-गुर्जरास्थानेषु ये अभिलेखाः सन्ति तेषु अशोकस्य एषा उपाधिः प्राप्यते। यथा-

KOUSIK PATRA

Edit with WPS Office

**देवानांपियस्य पियदसिनो असोकराजस (देवानां प्रियस्य प्रियदर्शिनः अशोकराजस्य)** (गुर्जरा लघुशिला अभिलेख:)। **देवानां प्रियस असोकस (देवानां प्रियस्य अशोकस्य)** (मास्कीशिलाभिलेखे)।

समाजेन तात्पर्यं जनाः निष्प्रयोजनं एकत्रिताः भवन्ति स्म। यः समाजः जनसमुदायानां प्रजानां वा हितार्थं संगठितं भवति स्म, सैव समाज: अशोकमते श्रेष्ठ इति। अन्यथा अनैतिकस्य अधार्मिकस्य समाजस्य आयोजनस्य निषेधं कृतवान्। अशोकमते एवं भूतः समाज: संगठनो वा दोषयुक्तः भवति स्म।

पुरा देवानां प्रियस्य प्रियदर्शनः राज्ञः महानसे अनुदिवसं च बहूनि प्राणशतसत्राणि आलभ्यन्ते सूपार्थाय। तत् अद्य यदा इयं धर्मलिपिः लिखिता, त्रयः एव प्राणाः आलभ्यन्ते सूपार्थाय। यथा- द्वौ मयूरौ, एकः मृगः, सोऽपि मृगः न ध्रुवः। एते अपि त्रयः प्राणाः पश्चात् न आलप्स्यन्ते। अभिलेखे प्रयुकस्य मृगपदस्य तात्पर्यं चतुष्पदात्मकजीवः इति भवति। तस्य प्रयोगः मृगार्थमेव इति न। एवमेव मयूरेण तात्पर्यं सर्वैरपि खगैः भवति। न केवलं मयूरमात्रम्।

**गुरुत्वम्/महत्वम्**

अशोकस्य प्रथमगिरिनाराभिलेखे यज्ञकर्मणि पशुबलेः निषेधः कृतोऽस्ति। वैदिकबलिपरम्परायाः अयमभिलेखः साक्षात् विरोधं दर्शयति। अनैतिकहिंसायुक्तसमाजस्य प्रतिबन्धकोऽयमभिलेखः। अशोकस्य स्वपाकशालायां तथा च प्रजानां पाकशालायां मांसादीनां पाचनं निषिद्धमसीत्। भविष्यत्काले भोजनार्थं जीवहत्या निषिद्धा आसीत्। अतः अशोकस्य प्रथमगिरिनारस्याभिलेखः तस्य अहिंसानीतेः परिचायकोऽस्ति इति शम्।

-----------

**'इयं धम्मलिपी देवानां प्रियेन प्रियदशिना राञा लेखापिता' - व्याख्यायताम्।**

**उत्तरम्-**

**उत्सः -** आलोच्यसन्दर्भोऽयम् अशोकस्य प्रथमगिरिनाराभिलेखे समुपलभ्यते।

**व्याख्या-** उद्धृतांशस्य संस्कृतरूपं यथा- **इयं धर्मलिपिः देवानां प्रियेण प्रियदर्शिना राज्ञा लेखिता**। 'धम्म'इति पदं संस्कृतस्य धर्मशब्दस्य प्राकृतं रूपमिति। धम्मलिप्याः धर्मलिप्याः वा एतादृशं तात्पर्यं भवति यत्, प्रजानां नैतिकदृष्ट्या धार्मिकदृष्ट्या वा उद्बोधनं करणम्। एषा धम्मलिपिः प्रजानां कर्त्तव्याकर्तव्ययोः बोधकरणार्थं प्रयुक्त भवति स्म। यथा प्रथमशिलालेखे पशुहिंसा निषेधः, धार्मिकसम्प्रदायानां परस्परं सहनं, परलोककल्याणं,

KOUSIK PATRA

Edit with WPS Office

धर्मदानं, धर्ममित्रता, धर्मसम्बन्धः, श्रेष्ठता विषये च वरं चिन्तनमासीत्।

देवानां प्रियः शब्दार्थस्तु देवतानां प्रियः इत्यर्थः। अयं शब्दः मौर्यसम्राटशोकस्य सम्मानसूचिका उपाधिरिति। अस्य प्रियदर्शी अपि सम्मानसूचकं नाम विद्यते। मास्की-गुर्जरास्थानेषु ये अभिलेखाः सन्ति तेषु अशोकस्य एषा उपाधिः प्राप्यते। यथा- देवानांपियस्य पियदसिनो असोकराजस (देवानां प्रियस्य प्रियदर्शिनः अशोकराजस्य) (गुर्जरा लघुशिला अभिलेखः)। देवानां प्रियस असोकस (देवानां प्रियस्य अशोकस्य) (मास्कीशिलाभिलेखे)।

-----------

**'न च समाजो कतव्यो बहुकं हि दोसं समाजम्हि पसति देवानंप्रियो प्रियदसि राजा।'-** व्याख्यायताम्।

उत्तरम्-

उत्सः - आलोच्यसन्दर्भोऽयम् अशोकस्य प्रथमगिरिनाराभिलेखे समुपलभ्यते।

व्याख्या- उद्धृतांशस्य संस्कृतरूपं यथा-**न च समाजः कर्तव्यः। बाहुकं हि दोषं समाजे पश्यति देवानां प्रियः प्रियदर्शी राजा।** समाजेन तात्पर्यं जनाः निष्प्रयोजनं एकत्रिताः भवन्ति स्म। यः समाजः जनसमुदायानां प्रजानां वा हितार्थं संगठितं भवति स्म, सैव समाजः देवानां प्रियस्य प्रियदर्शिनः राज्ञः अशोकस्य मते श्रेष्ठ इति। अन्यथा अनैतिकस्य अधार्मिकस्य समाजस्य आयोजनस्य निषेधं कृतवान् देवानां प्रियः प्रियदर्शी राजा अशोकः। देवानां प्रियस्य प्रियदर्शिनः राज्ञः अशोकस्य मते एवं भूतः समाजः संगठनो वा दोषयुक्तः भवति स्म।

-----------

**'अस्ति पि तु एकचा समाजा साधुमता देवानं प्रियस प्रियदसिनो राञो'-** व्याख्यायताम्।

उत्तरम्-

उत्सः - आलोच्यसन्दर्भोऽयम् अशोकस्य प्रथमगिरिनाराभिलेखे समुपलभ्यते।

व्याख्या- उद्धृतांशस्य संस्कृतरूपं यथा- **सन्ति अपि तु एके समाजाः साधुमताः देवानां प्रियस्य प्रियदर्शिनः राज्ञः।** समाजेन तात्पर्यं जनाः निष्प्रयोजनं एकत्रिताः भवन्ति स्म। यः समाजः जनसमुदायानां प्रजानां वा हितार्थं संगठितं भवति स्म, सैव समाजः देवानां प्रियस्य प्रियदर्शिनः राज्ञः अशोकस्य मते श्रेष्ठ इति। अन्यथा अनैतिकस्य अधार्मिकस्य

Edit with WPS Office

समाजस्य आयोजनस्य निषेधं कृतवान् देवानां प्रियः प्रियदर्शी राजा अशोकः। देवानां प्रियस्य प्रियदर्शिनः राज्ञः अशोकस्य मते एवं भूतः समाजः संगठनो वा दोषयुक्तः भवति स्म।

-----------

**'देवानं प्रियस प्रियदसिनो राजो अनुदिवसं बहूनि प्राणसतसहस्राणि आरभिसु सूपाथाय'-** व्याख्यायताम्।

उत्तरम्-

उत्सः - आलोच्यसन्दर्भोऽयम् अशोकस्य प्रथमगिरिनाराभिलेखे समुपलभ्यते।

व्याख्या- उद्धृतांशस्य संस्कृतरूपं यथा-(पुरा) **देवानां प्रियस्य प्रियदर्शनः राज्ञः महानसे अनुदिवसं च बहूनि प्राणशतसत्राणि आलभ्यन्ते सूपार्थाय**। तत् अद्य यदा इयं धर्मलिपिः लिखिता, त्रयः एव प्राणाः आलभ्यन्ते सूपार्थाय। यथा- द्वौ मयूरौ, एकः मृगः, सोऽपि मृगः न ध्रुवः। एते अपि त्रयः प्राणाः पश्चात् न आलप्स्यन्ते। अभिलेखे प्रयुकस्य मृगपदस्य तात्पर्यं चतुष्पदात्मकजीवः इति भवति। तस्य प्रयोगः मृगार्थमेव इति न। एवमेव मयूरेण तात्पर्यं सर्वैरपि खगैः भवति। न केवलं मयूरमात्रम्।

अशोकस्य स्वपाकशालायां तथा च प्रजानां पाकशालायां मांसादीनां पाचनं निषिद्धमसीत्। भविष्यत्काले भोजनार्थं जीवहत्या निषिद्धा आसीत्। अतः अशोकस्य प्रथमगिरिनारस्याभिलेखः तस्य अहिंसानीतेः परिचायकोऽस्ति इति शम्।

-----------

**'स अज यदा अयं धमलिपी लिखिता ती व प्राणा आरभरे सूपाथाय द्वो मोरा एको मगो सो पि'-** व्याख्यायताम्।

उत्तरम्-

उत्सः - आलोच्यसन्दर्भोऽयम् अशोकस्य प्रथमगिरिनाराभिलेखे समुपलभ्यते।

व्याख्या- उद्धृतांशस्य संस्कृतरूपं यथा-**तत् अद्य यदा इयं धर्मलिपिः लिखिता, त्रयः एव प्राणाः आलभ्यन्ते सूपार्थाय। यथा- द्वौ मयूरौ, एकः मृगः, सोऽपि मृगः न ध्रुवः।** पुरा देवानां प्रियस्य प्रियदर्शनः राज्ञः महानसे अनुदिवसं च बहूनि प्राणशतसत्राणि आलभ्यन्ते सूपार्थाय। तत् अद्य यदा इयं धर्मलिपिः लिखिता, त्रयः एव प्राणाः आलभ्यन्ते सूपार्थाय। यथा- द्वौ मयूरौ, एकः मृगः, सोऽपि मृगः न ध्रुवः। एते अपि त्रयः प्राणाः पश्चात् न आलप्स्यन्ते। अभिलेखे प्रयुकस्य मृगपदस्य तात्पर्यं चतुष्पदात्मकजीवः इति भवति।

KOUSIK PATRA

Edit with WPS Office

तस्य प्रयोगः मृगार्थमेव इति न। एवमेव मयूरेण तात्पर्यं सर्वैरपि खगैः भवति। न केवलं मयूरमात्रम्।

अशोकस्य स्वपाकशालायां तथा च प्रजानां पाकशालायां मांसादीनां पाचनं निषिद्धमसीत्। भविष्यत्काले भोजनार्थं जीवहत्या निषिद्धा आसीत्। अतः अशोकस्य प्रथमगिरिनारस्याभिलेखः तस्य अहिंसानीतेः परिचायकोऽस्ति इति शम्।

-----------

**२. अशोकस्य सारनाथस्तम्भाभिलेखस्य विषयवस्तु/गुरुत्वम्/महत्वम्**

**उत्तरम्-** भारतीयाभिलेखेषु अशोकस्य सारनाथस्तम्भाभिलेखः प्राधान्धेन मूर्ध्नि स्वीक्रियते।

**प्राप्तिस्थानम्-** भारतवर्षस्य उत्तरप्रदेशस्थ वाराणसीजनपदस्य दशकिलोमीटरं पूर्वोत्तरदिशि अवस्थितः 'सारनाथः' इति स्थानं बौद्धानां प्रमुखतीर्थस्थलरूपेण प्रसिद्धमस्ति। अस्य नगरस्य प्राचीनं नाम आसीत् 'ऋषिपतनः' 'इषिपतनः'। अशोककालीनप्रस्तरस्तम्भस्य उपरि शिरः सारनाथसंग्रहालये स्थितमस्ति। स्तम्भेऽस्मिन् त्रयः अभिलेखाः उत्कीर्णाः सन्ति। तेषु अन्यतमः अस्ति एकादशपङ्क्तिविशिष्टः अशोकस्य सारनाथस्तम्भाभिलेखः।

**आविष्काकरः -** १९०४ खृष्टाब्दे फ्रेडरिक-अस्कार-इमानुयेल्-ओयेटल्महोदयः इमम् अभिलेखम् आविष्कृतवान्।

**कालः-** विदुषां मते अस्य लेखस्य कालः २५० ईसापूर्वमिति निर्धारितमस्ति।

**लिपिः भाषा च**- अशोकस्य सारनाथस्तम्भाभिलेखे ब्राह्मीलिपिः प्राकृतभाषा च अस्ति।

**विषयवस्तु-** सारनाथाभिलेखे सम्राट् अशोकः आत्मानं 'देवानां प्रियः' इति रूपेण आख्यापितवान्। चरणत्रये पाटलिपुत्रनगरस्य नाम प्राप्यते। सङ्घभेदस्य प्रचेष्टा न करणीया इति अनुशासनम् अस्मिन् अभिलेखे प्राप्यते। यस्मिन् लिखितमस्ति यत् यो हि भिक्षुः या च भिक्षुणी संघ भक्ष्यति सः सा वा अवदातानि दूष्यानि सन्निधाप्य अन्यावासे आवासयितव्यः। एवं इदं शासनं भिक्षुसंघे च भिक्षुणीसंघे च विज्ञापयितव्यम्। ईदृशी च एका लिपिः युष्माकम् अन्तिके भूयात् इति संसरणे (आवासेयद्वा पथि) निक्षिप्ता। ईदृशी एका च लिपिः उपासकानाम् अन्तिके निक्षिप्ता। ते अपि च उपासकाः (उपवासदिनेषु) अनुपवसथं शासनन्तिकं यायुः। एतत् एव शासनम् आत्मनः विश्वासयितुम्। अनुपवसथं च ध्रुवायाः एकैकः महामात्रः उपवसथाय याति। एतत् एव शासनं आत्मानं विश्वासयितुम् आज्ञातुं ज्ञातुं बोद्धुं च। यावत्कं स्थानं व्याप्य च युष्माकम् आहारः (प्रदेशः) सर्वत्र

KOUSIK PATRA

Edit with WPS Office

विवासयत् यूयं (राजपुरुषान्) एतेन अनुशासनानुसारेण। एवमेव सर्वेषु कोट्टविषयेषु (दुर्गरक्षितप्रदेशेषु) एतेन अनुशासनानुसारेण विवासयेत।

**गुरुत्वम्- प्रथमतः** अनेन अभिलेखेन साधारणजनान् प्रति अनुशासनस्य प्रेरणे अशोकस्य गुरुत्वम् अनुमीयते। **द्वितीयतः** उपासकानाम् आचरणविधिः अत्र सुरक्षितः। **तृतीयतः** नगरेभ्यः वहिः अस्य प्रचारे महामात्यानाम् आचरणविधिः अत्र वर्णितः। **चतुर्थतः** सङ्घभेदस्य दण्डविधिरपि कीर्तितः।

-----------

**'ए चुं खो भिखू रा भिखुनि वा संघ भाखति से ओदातानि दुसानि सनंघापयि या आनावाससि आवासयिये'** - व्याख्यायताम्।

**उत्तरम्-**

**उत्सः -** आलोच्यसन्दर्भोऽयम् अशोकस्य सारनाथस्तम्भाभिलेखे समुपलभ्यते।

**व्याख्या-** उद्धृतांशस्य संस्कृतरूपं यथा- यः च खलु भिक्षु वा भिक्षुणी वा संघ भक्ष्यति सः अवदातानि दूष्यानि सन्निधाप्य अनावासे (अन्यावासे) आवास्यः (आवासयितव्यः)। अशोकस्य सारनाथस्तम्भाभिलेखे

अनुशासनं प्राप्यते यत्, सङ्घभेदस्य प्रचेष्टा न करणीया इति। यो हि भिक्षुः या च भिक्षुणी वा संघे मतभेदम् उत्पादयिष्यति, निन्दां करिष्यति, तान् श्वेतवस्त्रं धारयित्वा निष्कासनं भविष्यति। एवं इदं शासनं भिक्षुसंघे च भिक्षुणीसंघे च विज्ञापयितव्यम्। अनेन अभिलेखेन साधारणजनान् प्रति अनुशासनस्य प्रेरणे अशोकस्य गुरुत्वम् अनुमीयते।

-----------

**रूद्रदामन्महोदयस्य गिरनाराभिलेखस्य गुरुत्वम्/महत्वम्**

**अथवा**

**रूद्रदामन्महोदयस्य गिरनाराभिलेखस्य प्रतिपाद्यविषयः।**

**उत्तरम् -** भारतीयाभिलेखेषु साहित्यिकदृष्ट्या समृद्धम् उत्कृष्टम् अभिलेखम् अस्ति रूद्रदामन्महोदयस्य गिरनाराभिलेखः।

**प्राप्तिस्थानम्-** 'अहमदाबाद' इत्यस्य गुर्जरप्रदेशस्य जूनागढनगरात् प्रायः द्विकिलोमीटरपूर्वं गिरनारनामकः पर्वतो विद्यते तस्य एकस्यां शिलायां त्रयाणां शासकानां शिलालेखाः लिखिताः सन्ति। अस्मिन्नेव शिलालेखे रूद्रदामन्महोदयस्य गिरनाराभिलेखः

KOUSIK PATRA

Edit with WPS Office

उल्लिखोऽस्ति।

**अध्ययनकार्यम्-** गिरनाराभिलेखस्य प्रथमसाधक: जेम्सप्रिंसेपमहोदयः अस्ति। भारतीयः विद्वान् भाऊदाजीमहोदयः रूद्रदाम्नः गिरनाराभिलेखस्य प्रतिलिपेः आंग्लपाठम् अनुवादञ्च सर्वप्रथमं प्रकाशितवान्।

**कालः -**

**भाषा लिपि: च-** अस्य अभिलेखस्य भाषा संस्कृतं परन्तु लिपिः ब्राह्मी अस्ति।

**अभिलेखस्य गठनविन्यासः-** रूद्रदामन्महोदयस्य गिरनाराभिलेखः उच्चावचपङ्कितिषु उद्धृतोऽस्ति। तत्र विंशति पङ्क्तयः सन्ति। अभिलेखेऽस्मिन् षट् वाक्यानि सन्ति।

**प्रतिपाद्यविषयः-** सुदर्शनतडागस्य निर्माणं, पुनर्निर्माणं, पुनर्निर्माणे च रूद्रदाम्नः कृतित्वम् इति रूद्रदामन्महोदयस्य गिरनाराभिलेखस्य प्रतिपाद्यविषयः।

सर्वप्रथमं सुदर्शनतडागस्य निर्माणं चन्द्रगुप्तमौर्यस्य प्रान्तीयशासकः पुष्यगुप्तः कारितवान्। तस्य कालः प्रायः ३२१-२९८ ईसापूर्वमिति। सम्राट्-अशोकस्य प्रतिनिधिशासकः यवनराजतुषास्पः प्रायः २७२-२३२ ईसापूर्वम् इमं सरोवरं प्रणालिकादिभिः सम्पन्नं कारितवान्।

रूद्रदाम्नः शासनकाले शकसंवतः ७२ तमे वर्षे (१५० ईस्वीयेवर्षे) मार्गशीर्षमासस्य कृष्णप्रतिपदायां तिथौ अतिवृष्टिकारणात् उर्जयत्पर्वतात् निःसृता एका नदी सुवर्णसिकता, पलाशिनी इत्यादिषु नदीषु भयङ्कराप्लावकारणात् सुदर्शनतडागस्य सेतोः मध्ये गभीरा रेखा उत्पन्ना। चत्वारि हस्तशतानि वीशदुत्तराणि आयतेन एतावन्ति एव विस्तीर्णेन पञ्चसप्तति हस्तानवगाढेन भेदेन निस्सृतसर्वतोयं मरुधन्वकल्पम् अतिभृशं दुदर्शनम् आसीत्।

अतः सुदर्शनतडागस्य समीपस्थाञ्चलस्य प्रजावर्गः जलसङ्कटग्रस्तोऽभवत्। तदा रुद्रदामा सुदर्शनतडागस्य जीर्णोद्धाराय मतिसचिवैः सह परामर्शं कृतवान्। किन्तु ते सुदर्शनतडागस्य जीर्णोद्धारं न कारितवन्तः। अन्ते रूद्रदामा वर्षसहस्राय गोब्राह्मणि धर्मकीर्तिवृद्ध्यर्थं च पौरजानपदं जनं कर-विष्टि-प्रणयक्रियाभिः अपीडयित्वा स्वस्मात् कोशात् महता धनौघेन आनर्त्तसुराष्ट्रयोः प्रान्तीयशासकेन अमात्येन सुविशाखेन अनतिमहता च कालेन त्रिगुणदृढतरविस्तारपूर्वकं पुनर्निर्माणं कृत्वा सर्वतटे सुदर्शनतरं कृतवान् इति।

**उपसंहारः** सारांशतः वयं वक्तुं शक्नुमः यत्, रूददाम्नः गिरनाराभिलेखः ऐतिहासिकदृष्ट्या, राजनैतिकदृष्ट्या, धार्मिकदृष्ट्या, भौगोलिकदृष्ट्या, साहित्यिकदृष्ट्या च

KOUSIK PATRA

Edit with WPS Office

स्वयकीयं विशिष्टस्थानं स्थापयति।

----------

**सुदर्शनतडागस्य पुनर्निर्माणे पुनःसंस्करणे सुविखस्य/रूद्रदाम्नः कृतित्वम्**

**अथवा**

**सुदर्शनतडागस्य निर्माणं पुनर्निर्माणञ्च आलोच्यताम्**

KOUSIK PATRA

**उत्तरम्-** सुदर्शनतडागस्य निर्माणं, पुनर्निर्माणं, पुनर्निर्माणे च रूद्रदाम्नः कृतित्वम् इति रूद्रदामन्महोदयस्य गिरनाराभिलेखस्य प्रतिपाद्यविषयः।

सर्वप्रथमं सुदर्शनतडागस्य निर्माणं चन्द्रगुप्तमौर्यस्य प्रान्तीयशासकः पुष्यगुप्तः कारितवान्। तस्य कालः प्रायः ३२१-२९८ ईसापूर्वमिति। सम्राट्-अशोकस्य प्रतिनिधिशासकः यवनराजतुषास्पः प्रायः २७२-२३२ ईसापूर्वम् इमं सरोवरं प्रणालिकादिभिः सम्पन्नं कारितवान्।

रूद्रदाम्नः शासनकाले शकसंवतः ७२ तमे वर्षे (१५० ईस्वीयेवर्षे) मार्गशीर्षमासस्य कृष्णप्रतिपदायां तिथौ अतिवृष्टिकारणात् उर्जयत्पर्वतात् निःसृता एका नदी सुवर्णसिकता, पलाशिनी इत्यादिषु नदीषु भयङ्कराप्लावकारणात् सुदर्शनतडागस्य सेतोः मध्ये गभीरा रेखा उत्पन्ना। चत्वारि हस्तशतानि वीशदुत्तराणि आयतेन एतावन्ति एव विस्तीर्णेन पञ्चसप्तति हस्तानवगाढेन भेदेन निस्सृतसर्वतोयं मरुधन्वकल्पम् अतिभृशं दुदर्शनम् आसीत्।

अतः सुदर्शनतडागस्य समीपस्थाञ्चलस्य प्रजावर्गः जलसङ्कटग्रस्तोऽभवत्। तदा रुद्रदामा सुदर्शनतडागस्य जीर्णोद्धाराय मतिसचिवैः सह परामर्शं कृतवान्। किन्तु ते सुदर्शनतडागस्य जीर्णोद्धारं न कारितवन्तः। अन्ते रूद्रदामा वर्षसहस्राय गोब्राह्मणि

धर्मकीर्तिवृद्ध्यर्थं च पौरजानपदं जनं कर-विष्टि-प्रणयक्रियाभिः अपीडयित्वा स्वस्मात् घकोशात् महता धनौघेन आनर्त्तसुराष्ट्रयोः प्रान्तीयशासकेन अमात्येन सुविशाखेन अनतिमहता च कालेन त्रिगुणदृढतरविस्तारपूर्वकं पुनर्निर्माणं कृत्वा सर्वतटे सुदर्शनतरं कृतवान् इति।

----------

**रूद्रदामन्महोदयस्य गिरनाराभिलेखस्य ऐतिहासिकगुरुत्वम् साहित्यिकमहत्त्वञ्च आलोच्यताम्।**

Edit with WPS Office

**उत्तरम्-**

**ऐतिहासिकगुरुत्वम्-** सुदर्शनतडागस्य निर्माणस्य पुनर्निर्माणस्य वृत्तान्तम् इति रूद्रदामन्महोदयस्य गिरनाराभिलेखस्य ऐतिहासिकगुरुत्वस्य परिचायकम्।

सर्वप्रथमं सुदर्शनतडागस्य निर्माणं चन्द्रगुप्तमौर्यस्य प्रान्तीयशासकः पुष्यगुप्तः कारितवान्। तस्य कालः प्राय: ३२१-२९८ ईसापूर्वमिति। सम्राट्-अशोकस्य प्रतिनिधिशासक: यवनराजतुषास्पः प्रायः २७२-२३२ ईसापूर्वम् इमं सरोवरं प्रणालिकादिभिः सम्पन्नं कारितवान्।

रूद्रदाम्नः शासनकाले शकसंवतः ७२ तमे वर्षे (१५० ईस्वीयेवर्षे) मार्गशीर्षमासस्य कृष्णप्रतिपदायां तिथौ अतिवृष्टिकारणात् उर्जयत्पर्वतात् निःसृता एका नदी सुवर्णसिकता, पलाशिनी इत्यादिषु नदीषु भयङ्कराप्लावकारणात् सुदर्शनतडागस्य सेतोः मध्ये गभीरा रेखा उत्पन्ना। चत्वारि हस्तशतानि वीशदुत्तराणि आयतेन एतावन्ति एव विस्तीर्णेन पञ्चसप्तति हस्तानवगाढेन भेदेन निस्सृतसर्वतोयं मरुधन्वकल्पम् अतिभृशं दुदर्शनम् आसीत्।

अतः सुदर्शनतडागस्य समीपस्थाञ्चलस्य प्रजावर्गः जलसङ्कटग्रस्तोऽभवत्। तदा रुद्रदामा सुदर्शनतडागस्य जीर्णोद्धाराय मतिसचिवैः सह परामर्शं कृतवान्। किन्तु ते सुदर्शनतडागस्य जीर्णोद्धारं न कारितवन्तः। अन्ते रूद्रदामा वर्षसहस्राय गोब्राह्मणि

धर्मकीर्तिवृद्ध्यर्थं च पौरजानपदं जनं कर-विष्टि-प्रणयक्रियाभिः अपीडयित्वा स्वस्मात् घकोशात् महता धनौघेन आनर्त्तसुराष्ट्रयोः प्रान्तीयशासकेन अमात्येन सुविशाखेन अनतिमहता च कालेन त्रिगुणदृढतरविस्तारपूर्वकं पुनर्निर्माणं कृत्वा सर्वतटे सुदर्शनतरं कृतवान् इति।

**तात्कालिकी वास्तुकला-** तस्मिन् काले या वास्तुकला आसीत् सा अत्युत्कृष्टा आसीत्। तत्र प्रमाणं सुदर्शनसरोवर एव। अयं सरोवरः मृत्तिकापाषाणखण्डैः समानाकारेण उच्चैः, (ऊँचा) वैशाल्यम् (चौड़ा), दीर्घ: (लम्बा) अतिकुशलपद्धत्या निर्मित आसीत्। तेषां पाषाणखण्डानां योगानां दर्शनं न भवति स्म। पाषाणखण्डानां या सरोवरपङ्कितः सा पर्वतवत् सुदृढा आसीत्। जलनिकासनार्थं कुल्याः प्रयुक्ताः आसन्। सुरक्षादृष्ट्याऽपि अयं तडागः अतीवमहत्वपूर्णः आसीत्।

**साहित्यिकं महत्त्वम्-** भारते विक्रमारम्भात् चतुःशताब्दी पर्यन्तं पाश्चात्याक्रमणकारणात् भारतराष्ट्रस्य अन्तरंगावस्था राजनैतिकं वातावरणम् नितान्तं अशान्तभूतं क्षुब्धञ्च आसीत्। गुप्तकाले ललितकलायाः अभ्युदयसम्पन्नकारणात् संस्कृतकाव्यानां पुनर्जागरणकालं मत्वा मैक्समूलरः (मोक्षमूलरः) आदिमं शताब्दीकालं

KOUSIK PATRA

Edit with WPS Office

संस्कृतकाव्यानाम् अभावकालं स्वीकरोति। परन्तु शकक्षत्रपरूद्रदाम्नः गिरनाराभिलेखः (७८ शकसंवतः, १५० ईस्वी, २०७ विक्रमसंवतः) पूर्वोक्तं वचनं सर्वथा खण्डनं करोति। यतो हि रूद्रदामा एव सर्वप्रथमं स्वकीयं लेखं विशुद्धसंस्कृतभाषया निबद्धमकरोत्।

अलंकृतगद्यकाव्यस्य शैल्याम् उपनिबद्धोऽयं लेखः तत्कालीनकाव्यरचनायाः सुन्दरम् उदाहरणमिति। कथितमस्ति यत्, **"गद्यं कवीनां निकषं वदन्ति"**। अनेन स्पष्टं भवति यत्, गिरनारशिलाभिलेखस्य रचनाकारः कश्चन् विशिष्टकविरासीत्। कविरेव रूद्रदाम नाना विशेषणैः अलङ्कतवान्। यथा- **स्फुटलघुमधुरचित्रकान्तशब्दसमयोदारालंकृतगद्यपद्य** (**काव्यविधानप्रवीणे**) न। अनेन स्पष्टं भवति यत्, रूद्रदामा वैदर्भीरीत्याः, तथा च नाना गुणैरलंकृतः गद्यपद्यरचनाप्रवीणश्च कविरासीत्। इतोऽपि रूद्रदामा व्याकरणस्य अर्थशास्त्रस्य, संगीतन्यायादीनां विद्यानां पारणधारणप्रयोगादीनां प्रख्यात आसीत्। गद्यरचनायाः परम्परानुसारेण दीर्घवाक्यविन्यासः, समासयुक्तपदावल्याः प्रयोगः प्रयुक्तोऽस्ति। वस्तुतः उत्कृष्टकोटिगद्यप्रवन्धेषु प्रायः तिङन्तक्रियाणां प्रयोगः प्रायः न्यूनरूपेणैव भवति। सम्पूर्णेऽपि अभिलेखे **वर्त्तते, आसीत्** इत्यनयोः तिङन्तयोः, **कारितम्, अनुष्ठितम्** इत्यनयोः कृदन्तयोः प्रयोगः प्राप्यते। **आ गर्भात् प्रभृति--------- सुदर्शनतरं कारितमिति**। त्रिंशत् पङ्क्तिषु उल्लिखतोऽयं लेखः तेषु इदं वाक्यमतीव विस्तृतमिति। **"ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्"** काव्यादर्शस्य इति वचनप्रामाण्यात् ओजगुणयुक्तः समासबहुलाशैली गद्यविद्यायाः प्राण इति। दण्डिनः अस्य सिद्धान्तस्य पालनं सर्वप्रथमं रूद्रदाम्नः अभिलेखे सर्वप्रथमं प्राप्यते। वैदर्भीगौरीरीत्योश्च प्रयोगः वर्ण्यविषयमधिकृत्य कृतोऽस्ति। उर्जयत् पर्वतात् निःसृतानां नदीनां प्लावनम्, भयङ्करझञ्झावातः, पर्वतशिखराणि, वृक्षाः, अट्टालिकादीनां विध्वंसस्य ओजगुणयुक्तं सजीवं वर्णनं कृतमस्ति। **"गिरिशिखरतरुतटाट्टालकोपतल्पद्वारशरणोच्छ्रायविंध्वंसिना"** शब्दालङ्कारार्थालङ्कारयोः स्वाभाविकं वर्णनं प्राप्यते। यथा- **अर्थकामविषयाणां** विषयाणामित्यत्र यमकालङ्कारः, **गिरिनगरात्** (ग् र) तथा **सृष्टवृष्टिना** (ष् ट्) छेकानुप्रासस्य सुन्दरमुदाहरणमिति। **युगनिधनसदृशपरमघोरवेगेन, मरुधन्वकल्पं तडागम्, पर्वतपादस्पर्धि तडागम्** उपमालङ्कारस्योदाहरणम्। १ ईस्वीवर्षे प्रायः स्थानीया भाषा प्राकृत आसीदिति आशासे तथापि सहैव संस्कृतभाषायाः अपि बाहुल्ये प्रचारः आसीत्। सम्भवतः इदमेव कारणं यत्, सुदर्शनसरोवस्य निर्माणार्थं प्रजाभ्यो सरलभाषया प्रवाहमयीसंस्कृतभाषया च सूचना दत्ता आसीत्। पुनरपि नाना स्थलेषु स्थानीयप्राकृतभाषाया अपि प्रभावः दृष्टिगोचरी भवति। विदुषां मते रामायणमहाभारतयोरपि या संस्कृतभाषा तया भाषयाऽपि अभिलेखाः प्रभाविता आसन्। **वीशदुत्तराणि** इति शब्दे प्राकृतशब्दांशः **वीशद्** इत्यस्य प्रयोगः **तीशद्** आदिशब्दानां साम्यमधिकृत्य कृतोऽस्ति। रामायणमहाभारतोयरपि मध्ये **विंशत्** इत्यादिसंस्कृतशब्दानां बाहुल्येन प्रयोगः प्राप्यते। परन्तु तस्य संस्कृतभाषया साधुरूपं

KOUSIK PATRA

Edit with WPS Office

**विंशति** इति अस्ति। **अवजीत्यावजीत्य** इति शब्दे इकारस्य स्थाने ईकारप्रयोगे स्थानीया प्राकृतभाषा कारणं भवति। **पत्या** स्थाने व्याकरणे **पतिना** (**'पतिः समास एव'** पा.सू. १.४.८) इति प्रयोगः समासस्थलातिरिक्ते निषिद्धः तथापि रामायणमहाभारतादिस्थले

बहुधा प्रयोगः प्राप्यते। **एकार्णभूतायाभिनवपृथिव्यां भूतायां** व्याकरणप्रक्रियानुसारेण **एकार्णवीभूतायां** सम्भाव्यते तथापि अत्र **कृतायामिति** पदमधिकं विद्यते यतो हि तत्र **भूतायां** इति प्रथममेव प्रयुक्तं विद्यते।

अनेन प्रकारेण नाना प्रमाणेन निष्कर्षः अयमागच्छति यत्, द्वितीयशताब्द्याः मध्यकालीनसाहित्यिकरचनायां रामायणमहाभारतयोः भाषायाः बहुधा प्रभावः मिलति। सहैव लोकप्रचलितायां भाषायां संस्कृतमपि प्रस्तुतवान्। तात्कालिककाव्यशास्त्रसिद्धान्तेन परिचितः प्रस्तुताभिलेखः वैदर्भीरीत्या शैल्या च ओतप्रोतः प्रतीयते।

----------

**रूद्रदामन्महोदयस्य गिरनाराभिलेख रूद्रदाम्नः परिचयः/ चरित्रम् आलोच्यताम्**

रुद्रदाम्नः गिरनारशिलालेखात् रुद्रदाम्नः परिचयः स्पष्टीकृतः भवति।

**जन्मपरिचयः-** सुगृहीतनाम्नः स्वामि-चष्टनस्य पौत्रः, राज्ञः क्षत्रपस्य मुगृहीत-नाम्नः स्वामीजयदाम्नः पुत्रः आसीत् राजा रुद्रदामा। महाक्षत्रपः सः गुरुभिः रुद्रदामा इति नाम्ना अभिधीयते।

**रूद्रदाम्नः व्यक्तित्वम् -** भारतीयसंस्कृतेः धर्मस्य च पूर्णरूपेणानुसरणकर्त्ता, पालनकर्त्ता च रूद्रदामा कुशलप्रशासकः, प्रजानां रञ्जकश्चासीत्। धर्मशास्त्रेषु तडागकूपादीनां निर्माणं, तेषां जीर्णोद्धारः, गौब्राह्मणादीनां मानवसामन्यजातीनां च कल्याणार्थं कर्मणि रूच्युत्पादनार्थं, धर्मं प्रति महानास्थादिविषयाणां च महानागारः दृश्यते।

सः गोब्राह्मणान् सेवां कृतवान्। सः सर्वदैव उपयुक्तपात्रेषु दानसम्मानप्रदर्शनम् अकरोत्। सः कमपि अकारणम् अपमानं न अकरोत्। सः प्रजाकल्याणाय नित्यम् अर्थव्ययं कृतवान्। न्यायसम्मतोपायेन संग्रहीतकर-पुण्यकर-साधारणकरादिभिः तस्य राजकोषः धनरत्नैः परिपूर्णः आसीत्।

गिरनारशिलाभिलेखस्य रचनाकारः कविरेव रूद्रदाम नाना विशेषणैः अलङ्कतवान्। यथा- **स्फुटलघुमधुरचित्रकान्तशब्दसमयोदारालंकृतगद्यपद्य (काव्यविधानप्रवीणे)** न। अनेन स्पष्टं भवति यत्, रूद्रदामा वैदर्भीरीत्याः, तथा च नाना गुणैरलंकृतः गद्यपद्यरचनाप्रवीणश्च कविरासीत्। इतोऽपि रूद्रदामा व्याकरणस्य अर्थशास्त्रस्य,

Edit with WPS Office

संगीतन्यायादीनां विद्यानां पारणधारणप्रयोगादीनां प्रख्यात आसीत्। प्रोक्तञ्च- **"यथार्थहस्तोच्छ्रयार्जितोर्जितधर्मानुरागेण शब्दार्थगान्धर्वन्यायाद्यानां विद्यानां महतीनां पारणधारणविज्ञानप्रयोगावाप्ताविपुलकीर्त्तिना...."** इति।

गुणवत् तस्य रूपः, गमनभङ्गिः, कण्ठस्वरः प्रभृतिः अत्यन्तं सुन्दरमासीत्। अतः बहूनां राजकन्यानां स्वयम्वरसभायां सः तासां वरमाल्यं प्राप्तवान्।

रुद्रदामा आ गर्भात् प्रभृतिः अविहतसमुदितराजलक्ष्मीधारणागुणात् सर्ववर्णैरभिगम्य रक्षणार्थं पतित्वे वृतः आसीत्। सः आप्राणोच्छवासात् पुरुषवधनिवृत्तिकृतः सत्यप्रतिज्ञः आसीत्। सः अन्यत्र संग्रामेष्वभिमुखागत-सदृश-शत्रु-प्रहरण-वितरणत्वाविगुणरिपुतंकारुणः आसीत्। सः स्वयमभिगतजनपदप्रणिपतितायुःशरणदः आसीत्। सः दस्यु-व्याल-मृग-रोगादिभिः अनुपसृष्टपूर्वनगरनिगमजनपदानां स्ववीर्यार्जितानामनुरक्तं कृतवान्।

**राजनैतिकं महत्वम्-** अर्थशास्त्रसम्मतं राजनैतिकं सिद्धान्तमधिकृत्य रूद्रदामा शासनव्यवस्थां सुचारुपद्धया संचालितवान्। तस्य राज्यं नाना प्रान्तेषु विभक्तमसीत्। आनर्त्तसुराष्ट्रयोः राज्यपालपदे सुविशाखः नियुक्त आसीत्। राज्यपालस्य नियुक्तिः तस्य कार्यकुशलतामधिकृत्य भवति स्म।

कार्यकारीपार्षदेषु मतिसचिवानां कर्मसचिवानाञ्च व्यवस्था आसीत् ।

प्राजाभ्यः करग्रहणं, राजमार्गकरग्रहणञ्च भवति स्म। परन्तु सुदर्शनसरोवरस्योद्धारप्रसंगे रूद्रदामा प्राजाभ्यों पीड़ां न ददौ। प्रोक्तञ्च- **"अपीडयित्वा करविष्टिप्रणक्रियाभिः पौरजानपदं जनम्।**

**युद्धम्, विजयः, राज्यविस्तारश्च-** रूद्रदामा शत्रून् पराजितवान्। बहून् प्रान्तान् विजित्य स्वराज्ये समाहितं कृतवान्। राज्यभ्रष्टेभ्यो राजभ्यः पुनः तस्य पदं ददौ। क्षत्रियजातिषु विद्यमानमहंकारं वीरादिशब्दञ्च निर्मूलं कृतवान्। दक्षिणापथः शासकं सप्तकर्णीमहोदमपि वारद्वयं पराजितं चकार परन्तु पारिवारिकं सम्बन्धमधिकृत्य जीवितमेव त्यक्तवान्। रूद्रदामा स्ववलवीर्यपराक्रमेण विजित्य अनेकानि राज्यानि स्वकीये राज्ये तिरोहितं कृतवान्। ते देशाः यथा- पूर्वपश्चिमदेशाः- अवन्तिः, अनूपदेशः, आनर्त्तः, सुराष्ट्रम्, श्वभ्रः, मरुः, कच्छः, सिन्धः, सौवीरः, कुकुरः, अपरान्तः, निषादः इत्यादयः। विशालरूद्रदामा राज्यभ्रष्टेभ्यो राजभ्यः पुनः तेषां राज्यं ददौ ।

------

**पलाशिनीप्रभृतीनां नदीनां अति सेतुमयमाणानुरूप प्रतिकारमपि गिरि-शिखर-तरू-**

Edit with WPS Office

**तट्टालकोपतल्प-द्वार शरणोच्छ्र्य विध्वंसिना युगनिधनसदृशेण-**व्याख्यायताम्।

**अथवा**

**परम - घोर- वेगेन वायुना प्रमथित सलिल विक्षिप्त जर्जरी कृताव ( दीर्ण ) ... क्षिप्ताश्म - वृक्ष - गुल्म - लता प्रतान आनदी तलादित्युद्धाटि तमासीत्-**व्याख्यायताम्।

**उत्तरम्-**

**उत्सः-** आलोच्यसन्दर्भोऽयं रुद्रदाम्नः गिरनारशिलालेखे समुपलभ्यते।

**व्याख्या-** राज्ञः महाक्षत्रपस्य सुगृहीनाम्नः स्वामिचष्टनपौत्रस्य राज्ञः क्षत्रपस्य जयदाम्नः पुत्रस्य राज्ञः महाक्षत्रपस्य गुरुभिः अभ्यस्तनाम्नः रूद्रदाम्नः शासनकाले द्विसप्ततितमे वर्षे (१५० ईस्वीये वर्षे) मार्गशीर्षबहुलप्रतिपदायां सृष्टवृष्टिना पर्जन्येन एकार्णवभूतायाम् इव पृथिव्यां कृतायां गिरेः ऊर्जयतः सुवर्ण-सिकता-पलाशिनीप्रभृतीनां नदीनाम् अतिमात्रोद्वृत्तैः वेगैः सुदर्शनतडागस्य सेतुं क्रियमाण-अनुरूपप्रतिकारम् अपि गिरिशिखर-तरु-तट-अट्टालक-उपतल्प-शरणोच्छ्र्य-विध्वंसिना युगनिधनसदृशेण परमघोरवेगेन वायुना प्रमथितसलिलविक्षिप्तजर्जरीकृतावयवं क्षिप्त-अश्म-वृक्ष-गुल्मलताप्रतानं आ नदीतलात् इति उद्धाटितम् आसीत्।

-----------

**चत्वारि हस्तशतानि वीशदुत्तराण्यायतेन एतावन्त्येव विस्तीर्णेन पंचसप्ततिहस्तानवगाढेन भेदेन निस्सृतसर्वतोयं मरुधन्वकल्पमतिभृशं दुर्दर्शनमासीत्-** व्याख्यायताम्

**उत्तरम्-**

**उत्सः-** आलोच्यसन्दर्भोऽयं रुद्रदाम्नः गिरनारशिलालेखे समुपलभ्यते।

**व्याख्या-** राज्ञः महाक्षत्रपस्य सुगृहीनाम्नः स्वामिचष्टनपौत्रस्य राज्ञः क्षत्रपस्य जयदाम्नः पुत्रस्य राज्ञः महाक्षत्रपस्य गुरुभिः अभ्यस्तनाम्नः रूद्रदाम्नः शासनकाले शकसंवतः ७२ तमे वर्षे (१५० ईस्वीये वर्षे) मार्गशीर्षमासस्य कृष्णप्रतिपदायां तिथौ अतिवृष्टिकारणात् उर्जयत्पर्वतात् निःसृतासु सुवर्णसिकतापलाशिनीप्रभृतिषु नदीषु भयङ्कराप्लावकारणात् सुदर्शनतडागस्य सेतोः मध्ये गभीरा रेखा उत्पन्ना। चत्वारि हस्तशतानि वीशदुत्तराणि आयतेन एतावन्ति एव विस्तीर्णेन पञ्चसप्तति हस्तानवगाढेन भेदेन निस्सृतसर्वतोयं मरुधन्वकल्पम् अतिभृशं दुदर्शनम् आसीत्।

------------

KOUSIK PATRA

Edit with WPS Office

**पूर्व्वापराकरवन्त्यनूपनीवृदानर्त्त - सुराष्ट्र - श्वभ्र - मरु - कच्छ - सिन्धु - सौवीर - कुकुरापरान्त निषदादीनां समग्राणां-** व्याख्यायताम्

**उत्तरम्-**

**उत्सः-** आलोच्यसन्दर्भोऽयं रुद्रदाम्नः गिरनारशिलालेखे समुपलभ्यते।

**प्रसङ्गः-** रूद्रदाम्नः राज्यविस्तारस्य वर्णना प्रसङ्गे अभिलेखे प्राप्यतेऽयं सन्दर्भः।

**व्याख्या-** रूद्रदामा स्ववलवीर्यपराक्रमेण विजित्य अनेकानि राज्यानि स्वकीये राज्ये तिरोहितं कृतवान्। ते देशाः यथा-पूर्वी आकारः (उज्जयिन्याः चत्वारिंशत् मील उत्तरपूर्वम् एकं नगरम्, यस्य आधुनिकं नाम आगरा), पश्चिमी अवन्तिः (उज्जयिन्याः द्वितीयं नाम), अनूपदेशः (नर्मदानद्याः कच्छप्रदेशः), आनर्त्तः (आधुनिकगुर्जरप्रदेशस्य उत्तरीभागः), सुराष्ट्रम् (आधुनिककाठियावाड़), श्वभ्रः (आधुनिकसाबरमतीनद्याः तटवर्तीदेशः), मरुः (मारवाड़देशः), कच्छः (आधुनिकः कछप्रदेशः), सिन्धुः (सिन्धुप्रदेशस्य आधुनिकपाकिस्तानस्य उच्चैः प्रदेशः), सौवीरः (सिन्धुप्रदेशस्य आधुनिकपाकिस्तानस्य अधः भागः), कुकुरः (वर्तमानोत्तरकाथियावाडे आनर्तप्रदेशस्य समीपस्थः प्रदेशः), अपरान्तः (पश्चिमीसागरस्य अरबसागरस्य तटे स्थितः कोंकणप्रदेशो), निषादः (भीलादिजातीनां जनाः) इत्यादयः।

------------

**पह्लवेन कुलैपपुत्रेणामात्येन सुविशाखेन यथावदर्थधर्मव्यवहारदर्शनै रनुरागमर्भिवर्द्धयता शक्तेन दान्तेनाचपलेनाविस्मितेनार्येणाहार्येण**-व्याख्यायताम्।

**उत्तरम्-**

**उत्सः-** आलोच्यसन्दर्भोऽयं रुद्रदाम्नः गिरनारशिलालेखे समुपलभ्यते।

**प्रसङ्गः-** रूद्रदाम्नः अमात्येन सुविशाखेन सुदर्शनतडागस्य पुनर्निर्माणस्य वृत्तान्तम् वर्णितम् अस्मिन् सन्दर्भे।

**व्याख्या-** रूद्रदाम्नः शासनकाले शकसंवतः ७२ तमे वर्षे (१५० ईस्वीयेवर्षे) मार्गशीर्षमासस्य कृष्णप्रतिपदायां तिथौ अतिवृष्टिकारणात् उर्जयत्पर्वतात् निःसृता एका नदी सुवर्णसिकता, पलाशिनी इत्यादिषु नदीषु भयङ्कराप्लावकारणात् सुदर्शनतडागस्य

सेतोः मध्ये गभीरा रेखा उत्पन्ना। चत्वारि हस्तशतानि वीशदुत्तराणि आयतेन एतावन्ति एव विस्तीर्णेन पञ्चसप्तति हस्तानवगाढेन भेदेन निस्सृतसर्वतोयं मरुधन्वकल्पम्

Edit with WPS Office

अतिभृशं दुदर्शनम् आसीत्।

अतः सुदर्शनतडागस्य समीपस्थाञ्चलस्य प्रजावर्गः जलसङ्कटग्रस्तोऽभवत्। तदा रुद्रदामा सुदर्शनतडागस्य जीर्णोद्धाराय मतिसचिवैः सह परामर्शं कृतवान्। किन्तु ते सुदर्शनतडागस्य जीर्णोद्धारं न कारितवन्तः। अन्ते प्रजानां हितकामनया, सम्पूर्णानर्त्तसुराष्ट्रयोः च पालनार्थं पह्लवजातीयाः कुलैपस्य पुत्रः प्रान्तीयशासकः सुविशाखः अस्य सरोवस्य त्रिगुणितदृढशक्त्या विस्तारपूर्वकं पुनर्निर्माणं कारितवान्।

------------

KOUSIK PATRA

**समुद्रगुप्तस्य एरणाभिलेखदिशा समुद्रगुप्तस्य कृतित्वम् आलोच्यताम्**

**उत्तरम् -**

मध्यप्रदेशस्य सागरजनपदे एरण (एरिकिण) इति ग्रामस्य सुप्रसिद्धवराहमन्दिस्य निकटे एकस्मिन् वर्गाकृतिस्तम्भखण्डे उत्कीर्णे, कोलकातानगरस्य भारतीयपुरात्त्वसंग्रहालये (Indian Museum, Kolkata) सुरक्षिते समुद्रगुप्तस्य एरणाभिलेखे समुद्रगुप्तस्य कृतित्वं वर्णितमस्ति।

**समुद्रगुप्तस्य कृतित्वम्-**

धनदान्तकतुष्टिकोपतुल्यः पराक्रमनयेन समुद्रगुप्तः भूपो बभूव। तं प्राप्य सकलः पार्थिवगणः पर्यस्तराज्यविभवद् ध्रुतमास्थितः अभूत्। अतः अभिलेखे प्राप्यते यथा-

**भूपो बभूव धनदान्तक-तुष्टि-कोपतुल्यः पराक्रमनयेन समुद्रगुप्तः।**

**यं प्राप्य पार्थिगणस्सकलः पृथिव्याम् पर्यस्तराज्यविभवद् ध्रुतमास्थितोऽभूत्।।**

भक्तिनयविक्रमतोषितेन परमतुष्टिपुरस्कृतेन तातेन समुद्रगुप्तः अभिषेचनाद्यैः राजशब्दविभवैः सम्मानितः। ध्रुवः (ध्रुवम्) अयं सः समुद्रगुप्तः नृपैः अप्रतिवार्यवीर्यः अस्ति। अतः अभिलेखे प्राप्यते यथा-

**तातेन भक्तिनयविक्रमतोषितेन, यो राजशब्दविभवैः अभिषेचनाद्यैः।**

**सम्मानितः परमतुष्टिपुरस्कृतेन, सोऽयं ध्रुवो नृपैरप्रतिवार्यवीर्यः।।**

अस्य समुद्रगुप्तस्य श्री पौरुषपराक्रमदत्तशुल्का, हस्त्यश्वधनधान्यसमृद्धियुक्ता, नित्यङ् गृहेषु मुदिता, बहुपुत्रपौत्रसंक्रामिणी कुलवधुव्रतिनी निविष्टा। अतः अभिलेखे प्राप्यते

Edit with WPS Office

यथा-

**श्रीरस्य पौरुषपराक्रमदत्तशुल्का, हस्त्यश्वधनधान्यसमृद्धियुक्ता।**

**नित्यगृहेषु मुदिता बहुपुत्रपौत्रसङ्क्रामिणी कुलवधुव्रतिनी निविष्टा।।**

समरकर्मपराक्रमेद्धं समुद्रगुप्तस्य उर्जितं शुभ्रं यशः सुविपुलं परिवम्भ्रमीति। समुद्रगुप्तस्य रणोर्जितानि कर्माणि स्वप्नान्तरेष्वपि विचिन्त्य रिपवः परित्रसन्ति। अतः अभिलेखे प्राप्यते यथा-

**यस्योर्जितं समरकर्मपराक्रमेद्धं, शुभ्रं यशः सुविपुलम्परिबम्भ्रमीति।**

**कर्माणि सस्य रिपवश्च रणोर्जितानि स्वप्नान्तरेष्वपि विचिन्त्य परित्रसन्ति।।**

**भारतस्य 'नेपोलियन'** इत्याख्यः समुद्रगुप्तः असाधारणयोद्धा, समरविजेता, अजातशत्रुश्चासीत्। समुद्रगुप्तस्य शासनकालः ऐतिह्ये **स्वर्णयुग**नाम्ना प्रसिद्धोऽस्ति। **धनदान्तकतुष्टिकोपतुल्यः** समुद्रगुप्तस्य विशेषणमासीत्। समुद्रगुप्तः सम्पूर्णमपि भारतराष्ट्रमेकतासूत्रे सूत्रितवान्। दिग्विजयीराजाशासकः समुद्रगुप्तः महान् **चक्रवर्ती** आसीत्। सः चत्वारिंशत् वर्षाणि शासनं चकार।

---------

KOUSIK PATRA

**चन्द्रस्य मेहरौलीलौहस्तम्भाभिलेखस्य गुरुत्वम्/महत्वम्**

**उत्तरम्-**

**प्राप्तिस्थानम्-** चन्द्रस्यमेहरौलीलौहस्तम्भाभिलेखः देहलीस्थमेहरौलीग्रामस्थकुतुबमीनारेत्यस्य निकटे लौहस्तम्भे उत्कीर्णोऽस्ति।

**लिपिः भाषा च-** गुप्तकालीनः ब्राह्मीलिप्यां तथा संस्कृतभाषायां निबद्धोऽयं लेखः।

**गठनविन्यासः-** त्रिषु श्लोकेषु निबद्धः, षड्पङ्कितिविशिष्टोऽयं लेखः।

**प्रतिपाद्यविषयः-** अस्मिल्लेखे चन्द्रराजत्रः कीर्तिः उट्टङ्किताऽस्ति। विष्णुपदनामके पर्वते भगवतः विष्णोः मन्दिरस्य समक्षं ध्वजरूपेण विद्यमाने उत्कीर्णविशिष्टे स्तम्भे राजाचन्द्रस्य प्रतापविजयोः वर्णनं कृतमस्ति। स्तम्भः प्रायः सप्तमीटरपरिमितं उच्चविशिष्टमस्ति।

चन्द्रराज्ञः सम्पूर्णस्य नाम्न उल्लेखो न प्राप्यते तथा च तेषां ये अभिलेखाः तेषामुपरि

Edit with WPS Office

तिथीनामपि उल्लेखो नास्ति। तस्मात् इतिहासकाराः तस्य निर्णयकरणेऽसमर्थाः अभवन्। एतदर्थमेव ते पञ्चानां चन्द्रशासकानां प्रयोगः सहैव भवति।

**चन्द्रगुप्तमौर्यः** (प्रायः ३२१-२९७ ईस्वीपूर्वम्) किमयं राजाचन्द्रः? महरौलीस्तम्भाभिलेखः संस्कृतभाषया ब्राह्मीलिप्यां लिखितोऽस्ति। परन्तु मौर्यकाले प्राकृतभाषायाः ब्राह्मीलिप्याश्च प्रचलनमासीत्। अतः अयं चन्द्रः चन्द्रगुप्तमौर्यः न भवितुमर्हति।

केचन् विद्वांसः यद्यपि कुषाणवंशीकनिष्कं चन्द्रोपनाम वदन्ति परन्तु तदर्थं प्रदत्ताः सर्वेऽपि आधाराः तर्काश्च सर्वथा अनुचिताः।

सुसुनियापर्वतस्थिथलेखे चन्द्रवर्मनामकः पुष्करणाख्यस्य राजा चन्द्र आसीत् इति वदन्ति परन्तु तैः सह साम्यं नास्ति।

**चन्द्रगुप्तप्रथमः (प्रायः ३१९-३५५ ईस्वी)** किमयं राजाचन्द्रः? तदा विद्वांसः उत्तरयन्ति यत्, चन्द्रगुप्तप्रथमः सिन्धोः सप्तमुखं पारं कृत्वा बाह्लीकदेशस्य विजेता न आसीत्। तस्मात् नायं सः।

यद्यपि अन्ये डाँ० दिनेशचन्द्रसरकारादयः विद्वांसः नानाप्रमाणैः प्रमाणयितुं प्रयत्नं कृतवन्तः यत्, मेहरौलीलौहस्तम्भस्याभिलेखस्य चन्द्रः गुप्तवंशीयः चन्द्रगुप्तद्वितीय एव। तेषां कथनम् इदम् अपि यत्, चन्द्रगुप्तद्वितीयस्य चन्द्रेति रूपेण ताम्रनाणकेषु टंकणं प्राप्यते। उदयगिरिगुहालेखे चन्द्रगुप्तद्वितीयद्वारा एकस्य दिग्विजयस्यापि सूचना प्राप्यते। चन्द्रगुप्तद्वितीयः विष्णुभक्तोऽपि आसीत्।

**"खिन्नस्येव विसृज्य गां नरपतेः गामाश्रितस्यैतराम्"** इति वचनाधारेण विद्वान्सः वदन्ति यत्, महरौलीलौहस्तम्भाभिलेखः चन्द्रस्य मृत्युरनन्तरमुत्कीर्णोऽभवत्। केचन साधयन्ति यत्, चन्द्रगुप्तद्वितीयस्य शासनकाले एव तस्य लेखस्य लेखनमभवत्। अत्र **'नरपतिः'** शब्दः चन्द्रगुप्तस्य कृते नास्ति, अपितु तस्य पितुः समुद्रगुप्तस्य कृते व्यवहृतोऽस्ति।

**साहित्यिकगुरुत्वम्-**

- महरौलीलौहस्तम्भाभिलेखस्य साहित्यिकदृष्ट्याऽपि विशिष्टं स्थानं स्थापयति। शार्दूलविक्रीडितछन्दसि लिखिता एते त्रयः श्लोकाः एकस्य लघुकाव्यस्य प्रदर्शकाः भवन्ति।
- वीररसप्रधाने प्रथमद्वितीययोः पद्ययोरर्थगाम्भीर्यं दृग्गोचरी भवति।
- भाषा सरला प्रवाहमयी चास्ति।
- वैदर्भीशैल्याः सुन्दरप्रयोगोऽस्ति।

Edit with WPS Office

- **'वीर्यानिलैः'** अत्र रूपकालंकारः, **'खिन्नस्यैव विसृज्य गां'** अत्र उत्प्रेक्षालंकारः, **'समग्रचन्द्रसदृशीं वक्त्रश्रियं विभ्रता'** अत्र उपमालंकारः, अत्र एतेषामुपरोक्तानां सुन्दरस्वाभाविकश्च प्रयोगः प्राप्यते।

------------

**चन्द्रस्य मेहरौलीलौहस्तम्भाभिलेखदिशा चन्द्रराजस्य कृतित्वम् आलोच्यताम्**

**उत्तरम् -**

विष्णुपदनामके पर्वते भगवतः विष्णोः मन्दिरस्य समक्षं ध्वजरूपेण विद्यमाने उत्कीर्णविशिष्टे चन्द्रस्य मेहरौलीलौहस्तम्भाभिलेख राजाचन्द्रस्य प्रतापविजयोः वर्णनं कृतमस्ति। स्तम्भः प्रायः सप्तमीटरपरिमितं उच्चविशिष्टमस्ति।

चन्द्रराज्ञः सम्पूर्णस्य नाम्न उल्लेखो न प्राप्यते तथा च तेषां ये अभिलेखाः तेषामुपरि तिथीनामपि उल्लेखो नास्ति। तस्मात् इतिहासकाराः तस्य निर्णयकरणेऽसमर्थाः अभवन्। एतदर्थमेव ते पञ्चानां चन्द्रशासकानां प्रयोगः सहैव भवति।

चन्द्रगुप्तमौर्यः (प्रायः ३२१-२९७ ईस्वीपूर्वम्) किमयं राजाचन्द्रः? महरौलीस्तम्भाभिलेखः संस्कृतभाषया ब्राह्मीलिप्यां लिखितोऽस्ति। परन्तु मौर्यकाले प्राकृतभाषायाः ब्राह्मीलिप्याश्च प्रचलनमासीत्। अतः अयं चन्द्रः चन्द्रगुप्तमौर्यः न भवितुमर्हति।

केचन् विद्वांसः यद्यपि कुषाणवंशीकनिष्कं चन्द्रोपनाम वदन्ति परन्तु तदर्थं प्रदत्ताः सर्वेऽपि आधाराः तर्काश्च सर्वथा अनुचिताः।

सुसुनियापर्वतस्थिथलेखे चन्द्रवर्मनामकः पुष्करणाख्यस्य राजा चन्द्र आसीत् इति वदन्ति परन्तु तैः सह साम्यं नास्ति।

चन्द्रगुप्तप्रथमः (प्रायः ३१९-३५५ ईस्वी) किमयं राजाचन्द्रः? तदा विद्वांसः उत्तरयन्ति यत्, चन्द्रगुप्तप्रथमः सिन्धोः सप्तमुखं पारं कृत्वा बाह्लीकदेशस्य विजेता न आसीत्। तस्मात् नायं सः।

यद्यपि अन्ये डाँ० दिनेशचन्द्रसरकारादयः विद्वांसः नानाप्रमाणैः प्रमाणयितुं प्रयत्नं कृतवन्तः यत्, मेहरौलीलौहस्तम्भस्याभिलेखस्य चन्द्रः गुप्तवंशीयः चन्द्रगुप्तद्वितीय एव। तेषां कथनम् इदम् अपि यत्, चन्द्रगुप्तद्वितीयस्य चन्द्रेति रूपेण ताम्रनाणकेषु टंकणं प्राप्यते। उदयगिरिगुहालेखे चन्द्रगुप्तद्वितीयद्वारा एकस्य दिग्विजयस्यापि सूचना प्राप्यते। चन्द्रगुप्तद्वितीयः विष्णुभक्तोऽपि आसीत्।

**चन्द्रराजस्य कृतित्वम्**

KOUSIK PATRA

Edit with WPS Office

बङ्गेषु समेत्य आगतान् आहववर्तिनः शत्रून् समरे उरसा प्रतीपम् उद्वर्तयतः चन्द्रराजस्य भुजे खड्गेन कीर्तिः अभिलिखिता। चन्द्रराजेन सिन्धोः सप्तमुखानि तीर्त्त्वा बाह्लिकाः जिताः। चन्द्रराजस्य वीर्यानिलैः दक्षिणः जलनिधिः अद्यापि अधिवास्यते। अतः अभिलेखे प्राप्यते यथा-

**यस्योद्वर्तयतः प्रतीपमुरसा शत्रून्त्समेत्यागतान्।**

**वनेष्वाहववर्तिनोऽभिलिखिता खड्गेन कीर्तिर्भुजे।**

**तीर्त्त्वा सप्तमुखानि येन समरे सिन्धोर्ज्जिता बाह्लिका।**

**यस्याद्याप्यधिवास्यते जलनिधिर्व्वीर्य्यानिलैर्दक्षिणः॥१ ॥**

खिन्नस्य इव गां विसृज्य इतरां गाम् आश्रित्य मूर्त्या कर्मजितावनिं गतवतः, कीर्त्या क्षितौ स्थितस्य, प्रणाशितरिपोः चन्द्रराजस्य नरपतेः यत्नस्य शेषः महान् प्रतापः महावने शान्तस्य हुतभुजः प्रतापः इव अद्यापि क्षितिं न उत्सृजति। अतः अभिलेखे प्राप्यते यथा-

**खिन्नस्येव विसृज्य गां नरपतेर्गामाश्रितस्येतरां।**

**मूर्त्या कर्म्मजितावनिं गतवतः कीर्त्या स्थितस्य क्षितौ।**

**शान्तस्येव महावने हुतभुजो यस्य प्रतापो महान्।**

**नाद्याप्युत्सृजति प्रणाशितरिपोर्य्यनस्य शेषः क्षितिम्।। २।।**

सुचिरं क्षितौ स्वभुजार्जितम् एकाधिराज्यं प्राप्तेन, समग्रचन्द्रसहशीं वक्त्रश्रियं बिभ्रता, चन्द्राहेन धावेन, तेन भूमिपतिना विष्णौ मतिं प्रणिधाय विष्णुपदे गिरौ प्रांशुः अयं भगवतः विष्णोः ध्वजः स्थापितः। अतः अभिलेखे प्राप्यते यथा-

**प्राप्तेन स्वभुजार्ज्जितं च सुचिरं चैकाधिराज्य क्षितौ।**

**चन्द्राह्वेन समग्रचन्द्रसदृशीं वक्त्रश्रियं बिभ्रता।**

**तेनायं प्रणिधाय भूमिपतिना धावेन विष्णौ मतिं।**

**प्रान्शुर्विष्णुपदे गिरौ भगवतो विष्णोर्ध्वजः स्थापितः।।३।।**

-------------

KOUSIK PATRA

Edit with WPS Office

**बीसलदेवस्य देहलीटोपरास्तम्भाभिलेखस्य गुरुत्वम्/ महत्वम्**

**उत्तरम्-**

**प्राप्तिस्थानम्-**

देहलीनगरस्य चाहमानवंशी (चौहानवंशी) राजाविग्रहराजा (वीसलदेवः, बीसलदेवः) मौर्यवंशस्य राज्ञ अशोकस्य स्तम्भे उत्कीर्णस्य धर्मोपदेशस्याधः स्वोपदेशस्योत्कीर्णनं कारितवान्। मूलतः अयं पाषाणखण्डः हरियाणाराज्यस्य यमुनानगरस्य किञ्चिद्दूरं पश्चिमदिशि टोपराग्रामे स्थितः आसीत्। विक्रमस्य पञ्चदशशताब्द्यां फिरोजशाहतुगलकः इमं पाषाणखण्डं ततः उत्पाटनं कृत्वा यमुनामार्गेण देहलीमाम् आनीतवान्। अयं स्तम्भः देहलीनगरस्य कोटलाफिरोजशाह इत्यत्र स्थितोऽस्ति।

KOUSIK PATRA

**स्थितिकालः** अस्याभिलेखस्य स्थितिः विक्रमसंवत् १२२० वैशाखशुक्लपूर्णिमा आसीत्(११६३ ईस्वीमध्ये)।

**भाषा लिपिश्च-** अस्य भाषा संस्कृतं लिपिश्च देवनागरी अस्ति।

**अभिलेखस्याध्ययनकर्ता-** राधाकांन्तशर्मा अस्याभिलेखस्याध्ययनं कृतवानिति।

**प्रतिपाद्यविषयः-** अस्मिन् लेखे शाकंभरीचौहाननरेश वीसलदेवस्य वीरचरित्राणां वर्णनमस्ति।

ऐतिहासिकदृष्ट्या अयमभिलेखः अतीवमहत्वपूर्णाभिलेखः अस्ति। अनेन एकस्य महत्त्वपूर्णशासकस्य जातेः ऐतिह्यं ज्ञायते। अन्तिमहिन्दुसम्राटः हर्षवर्धनस्यानन्तरं उत्तरभारतीयशासकेषु राजपूतवंशीयाभिलेखेन चौहानवंशीराज्ञः सम्बन्धस्य स्थापना भवति।

राजाविग्रहराजः चतुर्थचौहानवंशस्य प्रसिद्धः राजा आसीत्। अयं यवनैः सह संघर्षं कृत्वा यमुनासतजुलनद्योः प्रदेशं तेभ्यः बलात् ग्रहणं कृतवान्। वस्तुतः महमूदगजनवी निरन्तरं आक्रमणं कृत्वा सर्वान् लघुगुरुभूतान् राज्ञः नष्टं भ्रष्टं कृतवानासीत्। तस्य मृत्युरनन्तरं १०३० ईस्वीमध्ये तुर्कजनाः क्षेत्रेऽस्मिन् नानास्थानेषु निवासं प्राप्तवन्तः। अतः राजाबीसलदेवः इमान् सर्वानपि यवनान् ततः निःसार्य आर्यावर्त्तस्य स्थापनां कृतवान्।

स्वविजयकीर्ति अमृतमयं कर्तुं सम्राट् अशोकस्य शिलास्तम्भस्योपरि इमं लेखमुत्कीर्ण

Edit with WPS Office

कारितवान्। प्रयाणकाले स्व उत्तराधिकारिभ्योऽयमादेशं दत्तवान् यत् उत्तरोत्तरं म्लेच्छानां हननं निःसारणं यथा स्यात् तत् कर्त्तव्यम्। द्वादशशताब्द्यां मध्ये चौहानजनानां प्रधानं स्थानं सांभर आसीत्। विग्रहराजः स्वयं कृते **शाकंभरीभूपतिः**, अथवा **शाकम्भरीन्द्र**शब्दस्य प्रयोगं कृतवान्। विग्रहराजः वीरः, धीरः, सफलः सैन्यचालकः आसीत्। स्वयं प्रतिभाशालीकविः, ललितकलायाः उपासकः, साहित्यकाराणां संरक्षक आसीत्।

महाकविसोमदेवः वीसलदेवस्य चरितं चरित्रयितुं **ललितविग्रहराज**नामकं ग्रन्थं रचितवान्। कथितमस्ति यत्, विग्रहराजः स्वयमेव **हरकेलिनाटकस्य** रचनां कृतवान्। यस्य उत्कीर्णनं पाषाणखण्डेषु कृतमस्ति।

**साहित्यकगुरुत्वम्-**

- चतुर्णां पद्यानामस्य भाषा सरला सुबोधा चास्ति।
- प्रथमद्वितीयचतुर्थञ्च पद्यं शार्दूलविक्रीडितच्छन्दसि विद्यते। तृतीयं च पद्यं स्रग्धराच्छन्दसि वर्त्तते।
- वैदर्भीरीत्याः प्रयोगोऽपि अस्ति।
- **प्रत्यर्थिदन्तान्तरे**, **म्लेच्छविच्छेदनाभिः** अत्र वृत्यनुप्रासस्य स्वाभविकप्रयोगः दृग्गोचरी भवति। द्वितीये पद्ये श्लेषालंकारस्य प्रयोगः प्राप्यते।

सम्भवतः अभिलेखमाध्यमेन सामान्यप्रजाभ्यः सूचनोद्देश्यार्थं वैदर्भीरीतिः सरलसुगमसंस्कृतभाषा च प्रयुक्ता अस्ति ।

-------------

KOUSIK PATRA

# SALTORA NETAJI CENTENARY COLLEGE

*(Affiliated to Bankura University)*

Saltora, 722158, Dist.- Bankura, West Bengal

## Model Questions and Answers

Semester-V

Subject: B.A. SANSKRIT (Programme)

Course Code: APSNS501DSE-1A

Course Title: Kavya & Philosophy

Course Topic: Philosophy - Vivekachuramani

KOUSIK PATRA

Prepared by

Kousik Patra

Assistant Professor

Department of Sanskrit

Saltora Netaji Centenary College

E-mail ID : patrakousikjrf@gmail.com

Mobile No : 7872177720

# विवेकचूडामणिः

## Short Questions (2 marks)

१. विवेकचूड़ामणि: केन विरचित:?

'বিবেকচূড়ামণিঃ' কার দ্বারা বিরচিত?

उत्तर: - विवेकचूड़ामणि: श्रीशङ्कराचार्येण विरचित:।

'বিবেকচূড়ামণিঃ' শ্রীশঙ্করাচার্য দ্বারা বিরচিত।

२. शङ्कराचार्यस्य गुरु: क: आसीत्?

শঙ্করাচার্যের গুরু কে ছিলেন?

उत्तर: – श्रीशङ्कराचार्यस्य गुरु: आसीत् श्रीगोविन्दपादाचार्य:।

শঙ্করাচার্যের গুরু ছিলেন শ্রীগোবিন্দপাদাচার্য।

३. शङ्कराचार्यस्य परमगुरु: क: आसीत्?

শঙ্করাচার্যের পরমগুরু কে ছিলেন?

उत्तर: – शङ्कराचार्यस्य परमगुरु: आसीत् गौड़पादाचार्य:।

শঙ্করাচার্যের পরমগুরু ছিলেন গৌড়পাদাচার্য।

४. शङ्कराचार्य: कस्य मतस्य प्रवर्तक: आसीत्?

শঙ্করাচার্য কোন মতের প্রবর্তক ছিলেন?

उत्तर: – शङ्कराचार्य: अद्वैतमतस्य प्रवर्तक: आसीत्।

শঙ্করাচার্য অদ্বৈত মতের প্রবর্তক ছিলেন।

६. मङ्गलाचरणश्लोके शङ्कराचार्य: कं नमस्करोति?

মঙ্গলাচরণশ্লোকে শঙ্করাচার্য কাকে নমস্কার করেছেন?

उत्तर: – मङ्गलाचरणश्लोके शङ्कराचार्य: स्वगुरुं गोविन्दाचार्यं परमात्मानं वा नमस्करोति।

KOUSIK PATRA

মঙ্গলাচরণশ্লোকে শঙ্করাচার্য নিজের গুরু গোবিন্দাচার্যকে বা পরমাত্মাকে নমস্কার করেছেন।

৭. সর্বজন্তুষু কীদৃশং জন্ম অত্যন্তং দুর্লভং ভবতি?

সকল জন্মের মধ্যে কীরূপ জন্ম অত্যন্ত দুর্লভ?

উত্তর: -জন্তুষু নরজন্ম অত্যন্তং দুর্লভং ভবতি।

সকল জন্মের মধ্যে মনুষ্যজন্ম অত্যন্ত দুর্লভ।

৮. কেন বিনা মুক্তির্ন ভবতি?

কী ছাড়া মুক্তি সম্ভব নয়?

উত্তরঃ – শতজন্মকোটিসুকৃতৈঃ পুণ্যৈর্বিনা মুক্তির্ন ভবতি।

শতকোটি জন্মের অর্জিত পুণ্য ছাড়া মুক্তি সম্ভব নয়।

৯. দেবানুগ্রহহেতুকং ত্রয়ং দুর্লভং কিং কিম্?

দেবানুগ্রহহেতুক কোন্ তিনটি অত্যন্ত দুর্লভ।

উত্তরঃ – দেবানুগ্রহহেতুকং ত্রয়ং দুর্লভং ভবতি মনুষ্যত্বং, মুমুক্ষুত্বং কিঞ্চ মহাপুরুষসংশ্রয়ঃ ইতি।

দেবানুগ্রহহেতুক মনুষ্যত্ব, মুমুক্ষুত্ব এবং মহাপুরুষসংশ্রয় - এই তিনটি অত্যন্ত দুর্লভ।

১০. কশ্চ আত্মহা ভবতি?

আত্মহা কে?

উত্তরঃ- যঃ কথঞ্চিত্ দুর্লভং নরজন্ম, তত্রাপি পুংস্ত্বং শ্রুতিপারদর্শনং চ লব্ধা আত্মমুক্তৌ ন যতেত স আত্মহা ভবতি।

কোনভাবে দুর্লভ মনুষ্যজন্ম এবং সেই মনুষ্যজন্মে পুরুষত্ব এবং শ্রুতিপারদর্শীতা লাভ করেও যিনি নিজের মুক্তিলাভের জন্য যত্ন করেন না, তিনি অবশ্যই আত্মঘাতী ব্যক্তি।

১১. ব্রহ্মশতান্তরেঽপি কেন বিনা মুক্তির্ন ভবতি?

ব্রহ্মশতান্তরেও কী ছাড়া মুক্তি সম্ভব নয়?

KOUSIK PATRA

উত্তরঃ- आत्मैकबोधेन विना ब्रह्मशतान्तरेऽपि मुक्तिर्न भवति।

ব্রহ্মশতান্তরেও (শতকল্পেও) আত্মৈকবোধ ছাড়া মুক্তি সম্ভব নয়।

১২. कथम् आत्मना आत्मानम् उद्धरेत्?

কীভাবে আত্মার দ্বারা (নিজের দ্বারা) আত্মাকে উদ্ধার করা যায়?

উত্তরঃ- संसारवारिधौ मग्नं आत्मानं योगरूढत्वमासाद्य सम्यग्दर्शननिष्ठया आत्मना उद्धरेत्।

সম্যক্ দর্শননিষ্ঠার দ্বারা যোগারূঢ় হয়ে দুঃখময় সংসারসাগরে নিমজ্জিত আত্মাকে আত্মার দ্বারা (নিজের দ্বারা) উদ্ধার করা যায়।

১৩. कर्मणः प्रयोजनं किम्?

কর্মের প্রয়োজন কী?

উত্তরঃ – कर्मणः प्रयोजनं भवति चित्तशुद्धिः। न तु वस्तूपलब्धये कर्म भवति।

চিত্তের শুদ্ধির জন্যই কর্মের প্রয়োজন, বস্তুর উপলব্ধির জন্য নয়।

১৪. कथं वस्तुनिश्चयो भवति?

কীভাবে বস্তুনিশ্চয় হয়?

উত্তরঃ – कल्याणप्रदोक्तितः विचारेण वस्तुनिश्चयो भवति, न स्नाने न दानेन प्राणायामशतेन वा इति।

কল্যাণপ্রদ উক্তির বিচারের দ্বারাই বস্তুনিশ্চয় হয়, স্নান, দান অথবা শতপ্রাণায়ামের দ্বারা নয়।

১৫. कस्य विशेषतः फलसिद्धिर्भवति?

বিশেষতঃ কার ফলসিদ্ধি হয়?

উত্তরঃ - विशेषतः अधिकारिणः एव फलसिद्धिर्भवति, तत्र तु देशकालाद्याः सहकारिणः भवन्ति।

বিশেষতঃ অধিকারীরই ফলসিদ্ধি হয়, তাতে দেশ, কাল প্রভৃতি উপায় সহকারী (সহায়ক) হয়।

১৬. कीदृशः पुरुषः ब्रह्मविद्यायामधिकारी भवति?

কীরূপ ব্যক্তি ব্রহ্মবিদ্যায় অধিকারী হন?

KOUSIK PATRA

উত্তরः - यः मेधावी, विद्वान्, ऊहापोहविचक्षणः, विवेकी, विरक्तः, शमादिगुणशाली, मुमुक्षुः स एव ब्रह्मविद्यायामधिकारी भवति।

যিনি বুদ্ধিমান, বিদ্বান্, তর্কবিতর্কে কুশল, সদসদ্বিবেকী, বৈরাগ্যবান্, শম-দমাদি ষটসম্পত্তিযুক্ত এবং মুমুক্ষু - এইরূপ লক্ষণযুক্ত ব্যক্তি ব্রহ্মবিদ্যায় অধিকারী হন।

১৭. मनीषिभिः कति साधनानि उक्तानि? साधनानि कानि?

মনীষিদের দ্বারা কত প্রকারের সাধন উক্ত হয়েছে? সাধনগুলি কী কী?

উত্তরः - मनीषिभिः चत्वारि साधनानि कथितानि। तानि च - नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमादिषट्कसम्पत्तिः, मुमुक्षुत्वमिति।

মনীষিদের দ্বারা চার প্রকারের সাধন উক্ত হয়েছে। সাধনগুলি হল- ১) নিত্যানিত্যবস্তুবিবেকঃ, ২) ইহামুত্রফলভোগবিরাগঃ, ৩) শমাদিষটকসম্পত্তিঃ এবং ৪) মুমুক্ষুত্ব।

১৮. नित्यानित्यवस्तुविवेकः कः?

নিত্যানিত্যবস্তুবিবেকঃ কী?

উত্তরः- ब्रह्म सत्यं जगन्मिथ्या इत्येवं विनिश्चयो भवति नित्यानित्यवस्तुविवेकः।

ব্রহ্ম সত্য, জগৎ মিথ্যা -এইরূপ যে নিশ্চয় জ্ঞান হয়, তাকেই নিত্যানিত্যবস্তুবিবেকঃ বলা হয়।

২০. द्वितीयं साधनं वैराग्यं किम्?

দ্বিতীয় সাধন বৈরাগ্য কী?

-------

KOUSIK PATRA

## Explanation (5 marks)

**उद्धरेदात्मनात्मानं मग्नं संसारवारिधौ।**

**योगारूढत्वमासाद्य सम्यग्दर्शननिष्ठया ।।९ ।।**

**उत्सः** - आलोच्यः श्लोकोऽयं श्रीशङ्कराचार्यविरचितात् 'विवेकचूडामणिः' इति ग्रन्थात् उत्कलितः।

**प्रसङ्गः** - मोक्षसाक्षात्साधनं सम्यग्दर्शननिष्ठां मुख्यहेतुं परवैराग्यापरपर्यायं योगारूढत्वं चाह अनेन श्लोकेन आचार्यः शङ्करः।

**व्याख्या** - संसारवारिधौ मग्नमात्मानं योगारूढत्वमासाद्य सम्यग्दर्शननिष्ठया आत्मना उद्धरेदित्यन्वयः। सर्वदा सत्यवस्तुनः आत्मनः दर्शने स्थितः सन् योगारूढत्वम् आसाध्य अस्मिन् संसारसागरे निमज्जमानम् स्वमात्मानं स्वयमेव उद्धरेदिति सामान्यार्थः।

अनाद्यविद्यावशात् अज्ञः, कर्ता, मनुष्योऽहम् इत्यादिरीत्या स्थूलसुक्ष्मकारणशरीरेषु अनात्मसु अहमिति बुद्ध्या स्थितिरेव संसारवारिधिमग्नत्वम् असङ्गसच्चिदानन्दरूपस्यात्मनः। एतस्मात् उद्धारः स्वनेनैव आत्मना कर्तव्यः। उच्यते च भगवद्गीतायां उद्धरेदात्मनात्मानं नात्मनमवसादयेत् इति। तदपि केनोपायेन इति चेदुच्यते योगारूढत्वमासाद्य सम्यग्दर्शननिष्ठया इति।

**"यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्यते।**

**सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते।।"**

इति भगवद्वचनात् परवैराग्यपुरस्सरसम्यग्दर्शननिष्ठैव संसाराब्धिपरितात्मोद्धरणे हेतुरिति भावः इति दिक्।

KOUSIK PATRA

---

**"चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये ।**

**वस्तुसिद्धिर्विचारेण न किञ्चित् कर्मकोटिभिः।।" (११)**

**उत्सः** - आलोच्यः श्लोकोऽयं श्रीशङ्कराचार्यविरचितात् 'विवेकचूडामणिः' इति ग्रन्थात् उत्कलितः।

**प्रसङ्गः** - अस्मिन् श्लोके परमपुरुषार्थभूतमोक्षार्थत्वं नास्ति कर्मणां, चित्तशुद्धिद्वारा ज्ञानबहिरङ्गत्वमिति दर्शयति आचार्यः शङ्करः।

**व्याख्या** - कर्म नाम वेदोक्तं कर्म अत्र ग्राह्यम् अर्थात् यज्ञादिकर्म। तेन यज्ञादिकर्मणा किञ्चित् अपूर्वं जन्यते, ततश्च मरणान्तरं स्वर्गप्राप्तिरूपा मुक्तिरित्याहुः मीमांसकाः। उच्यते च तैः स्वर्गविषये-

**यन्न दुःखेन सम्भिन्नं न च ग्रस्थमनन्तरम्।**

**अभिलाषोपनीतं सुखं स्वः पदास्पदम्।।"**

इति। अतः कर्मणा मुक्तिरिति तेषां मतम्। किन्तु अद्वैतवेदान्तिभिः उच्यते-तन्न समीचिनम्। यतो हि 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इत्यादिना पुनरागमनं श्रुयते। अतः एव अद्वैतिभिः उक्तं केवलं ज्ञानेनैव मुक्तिरिति, कर्मणां तु मुख्यं प्रयोजनं चित्तशुद्धिरिति - 'चित्तस्य शुद्धये कर्म' इति। वस्तुनः नाम परमात्मनः उपलब्धिः साक्षात्कारः कर्मणा नैव सिद्ध्यति। तस्य ब्रह्मणः साक्षात्कारस्तु विचारेण नाम सदसद्विवेकज्ञानेनैव सिद्ध्यति इति दिक्।

---

**अतो विचारः कर्तव्यो जिज्ञासोरात्मवस्तुनः।**

**समासाद्य दयासिन्धुं गुरुं ब्रह्मविदुत्तमम्।। (१५)**

**उत्सः** - आलोच्यः श्लोकोऽयं श्रीशङ्कराचार्यविरचितात् 'विवेकचूडामणिः' इति ग्रन्थात् उत्कलितः।

**प्रसङ्गः** - **'तरति शोकमात्मवित्, तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्'** इत्यादिश्रुत्युक्तमर्थं कथयति आचार्यः शङ्करः अस्मिन् श्लोके।

**व्याख्या -** अतः सर्वानर्थनिवर्तकनिर्णयहेतुत्वात् जिज्ञासोः आत्मानं सम्यजज्ञातुमिच्छोः पुरुषस्य आत्मवस्तुनः विचारः कर्तव्यः। तत्रापि उच्यते शास्त्रज्ञः अपि स्वयं ब्रह्मान्वेषणं न कुर्यात्। अतः विचारार्थ गुरुमभिगच्छेत् - **'समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं, तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया'** इति। तत्र इतिकर्तव्यतामाह दयासिन्धुं स्वयं कृतार्थत्वेन स्वस्य प्रयोजनाभावस्सिद्ध एव, इतरेपि मा दुःखमनुभुवन्निितिकरुणायाः समुद्रं, आधारमित्यर्थः, जलराशिरिव जलानां, गुरुम् -

**"गुशब्दस्त्वन्धकारः स्यात् रुशब्दस्तन्निरोधकः।**

**अन्धकारनिरोधकत्वात् गुरुरित्यभिधीयते।।"**

इति गुरुगीतोक्तरीत्या स्वोपदेशेन अज्ञानाख्यहार्दान्धकारहारकमित्यर्थः। यथान्धकारः प्रपञ्चमावृत्य तजज्ञानप्रतिबन्धको भवति एवमज्ञानम् आत्मानमावृत्य तत्रस्पष्टभानप्रतिबन्धकं भवति। तादृशस्य अन्धकारस्य नाशकत्वात् मुमुक्षुः ब्रह्मविदुत्तमं गुरुमेवाभिगच्छेत् इत्यभिप्रायः इति दिक्।

---

**मेधावी पुरुषो विद्वानूहापोहविचक्षणः।**

**अधिकार्यात्मविद्यायामुक्तलक्षणलक्षितः।। (१६)**

KOUSIK PATRA

**अथवा**

**विवेकिनो विरक्तस्य शमादिगुणशालिनः।**

**मुमुक्षोरेव हि ब्रह्मजिज्ञासायोग्यता मता।।(१७)**

**उत्सः** - आलोच्यः श्लोकोऽयं श्रीशङ्कराचार्यविरचितात् 'विवेकचूडामणिः' इति ग्रन्थात् उत्कलितः।

**प्रसङ्गः** - अस्मिन् श्लोके आत्मविद्यायां कश्च अधिकारी इति विशेषेण निरूपयति आचार्यः शङ्करः।

**व्याख्या** - धीर्धारणावती मेधा इति कोशात् श्रुतार्थधारणक्षमबुद्धिमानुच्यते मेधास्यास्तीति व्युत्पत्त्या मेधावीशब्देन। विद्वानिति अधीतकाव्यकोशव्याकरणः उच्यते। ऊहापोहविचक्षणः एतेन तर्कमीमांसासंस्कृतबुद्धित्वं गम्यते, पदवाक्यप्रमाणज्ञ इति यावत्। तथा च विवेकवैराग्यशमादिषट्कसम्पत्तिमुमुक्षुत्वरूपसाधनचतुष्टयसम्पन्नो भवति अधिकारी इति। उक्तानि लक्षणानि स्फुटप्रतिपत्तये क्रोडीकृत्याह विवेकिन इति। ये खलु ब्रह्मैव नित्यं वस्तु, अन्यत्सर्वमनित्यमिति नित्यानित्यवस्तुविवेकशालिनः, सन्यस्तबाह्यार्थसुखस्पृहः वैराग्यवन्तः, शमादिषट्कसम्पत्तियुक्ताः, मुमुक्षवः च, ते एव ब्रह्मजिज्ञासायाम् अधिकारिणः इति भावः इति दिक्।

---

KOUSIK PATRA

**साधनान्यत्र चत्वारि कथितानि मनीषिभिः।**

**येषु सत्स्वेव सन्निष्ठा यदभावे न सिद्ध्यति।। (१८)**

**उत्सः** - आलोच्यः श्लोकोऽयं श्रीशङ्कराचार्यविरचितात् 'विवेकचूडामणिः' इति ग्रन्थात् उत्कलितः।

**प्रसङ्गः** - विचारजननी या इच्छा तत्र योग्यता विवेकादिसाधनयुतस्यैव नान्यस्य इत्येवमर्थम् अन्वयेन व्यतिरेकेन च स्पष्टयति आचार्यः शङ्करः अस्मिन् श्लोके।

**व्याख्या** - साधनचतुष्टये सत्त्वे एव सन्निष्ठा नाम ब्रह्मणि निष्ठा स्यात्, अन्यथा नेति तात्पर्यार्थः। ननु कानि तानि साधनानि इति चेदुच्यते मणीषिभिः - नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमादिषष्टकसम्पत्तिः, मुमुक्षुत्वञ्चेति।

एतेषु को नित्यानित्यवस्तुविवेक इति चेदुच्यते-

**"ब्रह्मसत्यं जगन्मिथ्येत्येवंरूपो विनिश्चयः।**

**सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः।।" (२०)** इति।

ब्रह्मणः सत्यत्वं किञ्च जगतः मिथ्यात्वम् एवं नित्यानित्यवस्तुनः विशेषेण निश्चय एव नित्यानित्यवस्तुविवेक इति।

द्वितीयस्तु इहामुत्रफलभोगविरागरूपं वैराग्यम्। तच्च -

**"तद्वैराग्यं जुगुप्सा या दर्शनश्रवणादिभिः।**

**देहादिब्रह्मपर्यन्ते ह्यनित्ये भोग्यवस्तुनि।।" (२१) इति।**

अर्थात् ऐहिकदेहादिभोग्यवस्तुनः दर्शनेन, आमुष्मिकदिव्यदेहादिभोग्यवस्तुनः श्रवणेन, आदिपदेन दृष्टजातीयस्य श्रुतजातीयस्य अनुमानेन सर्वस्मिन् भोग्यवस्तुनि अनित्ये मिथ्याभूते या जुगुप्सा, तदेव वैराग्यमिति। अयमेव इहामुत्रफलभोगविराग इति।

तृतीयस्तु शमादिषष्टकसम्पत्तिरिति। शमादयः भवन्ति शमः, दमः, उपरतिः, तितिक्षा, समाधानं, श्रद्धा चेति। आद्यन्तवन्तबहुवित्तव्ययाससाध्यत्वपरिणतिविरसत्वादिदोषान् पुनः पुनः विषयेषु पश्यतः पुरुषस्य तत्र वैराग्यं जायते। तस्मिंश्च वैराग्ये जाते मनस्वलक्ष्ये सगुणे निर्गुणे वा नियतमवतिष्ठमानं निश्चलं निर्विकारं भवतीति मनोनियतावस्था भवति मनसः शम इति। एवं विषयेभ्यः पराङ्मुखीकृत्य श्रोत्रादिज्ञानेन्द्रियाणां, वागादिकर्मेन्द्रियाणां च स्वस्वगोलके नाम कर्णशष्कुलीवदनादिदेशेषु उपरतव्यापारतासम्पादनरूपं स्थापनं भवति दम इति। उपरतिस्तु वृत्तेः बाह्यानालम्बनमिति। अर्थात् तटाकोदकस्य तटाकछिद्रद्वारा निर्गत्य यथा क्षेत्राद्यात्मना परिणामो भवति, एवमन्तस्थस्य मनसः श्रोत्रादिछिद्रद्वारा बहिरागत्य शब्दादिविषयाकारेण परिणामरूपा वृत्तिर्जायते। अस्याः वृत्तेः बाह्यनालम्बनमेव उपरतिरिति। विचारसाधनतितिक्षायाः तथात्वं व्यावर्तयति अप्रतीकारपूर्वकं चिन्ताविलापरहितं सत्सहनं सा तितिक्षा इत्यर्थः। श्रद्धा भवति अधिकारिणः परमकारणम्। श्रुतिवाक्येषु अबाधितार्थबोधकं इति बुद्ध्या दृढविश्वासो भवति श्रद्धा इति। एवं शुद्धे ब्रह्मणि सर्वदा चित्तस्य स्थापनं, न तु चित्तस्य लालनं भवति समाधानमिति। एवं शमादिविशिष्टस्तु अधिकारी इति।

साधनचतुष्टयेषु अन्तिमं भवति मुमुक्षुत्वमिति। उच्यते शङ्कराचार्येण -

**"अहंकारादिदेहान्तान्बन्धानज्ञानकल्पितान्।**

**स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता।।" (२७) इति।**

अर्थात् आनन्दमयकोशप्रभृतिविज्ञानमय-मनोमय- प्राणमयान्त्रमयान्तान् बन्धान् स्वरूपसाक्षात्कारात् प्राग् आत्मत्वेन मन्यमानान् स्वस्वरूपावबोधेन मोक्तुं पुनस्तत्र यथा अहन्ता न स्यात् तथा त्यक्तुं या इच्छा सा एव मुमुक्षुता इति।

एवं साधनचतुष्टयसम्पन्नः प्रमाता भवति आत्मविद्यायामधिकारी इति दिक्।

KOUSIK PATRA

--------------

**वैराग्यं च मुमुक्षुत्वं तीव्र यस्य तु विद्यते।**

**तस्मिन्नेवार्थवन्तः स्युः फलवन्तः शमादयः।।(२९)**

**उत्सः -** आलोच्यः श्लोकोऽयं श्रीशङ्कराचार्यविरचितात् 'विवेकचूडामणिः' इति ग्रन्थात् उत्कलितः।

**प्रसङ्गः** - शङ्कराचार्येण चत्वारि साधनानि कथितानि, येषां सत्त्वे एव सन्निष्टा स्यादिति। तत्रापि साधनचतुष्टयमध्ये द्वितीयतुरीयसत्त्वे सर्वं तत्रास्ति नान्यथेत्याह- 'वैराग्यं च...' इत्यादि।

**व्याख्या** - यस्य वैराग्यं मुमुक्षुत्वञ्च तीव्र विद्यते तस्यैव अन्ये शमादयः अर्थवन्तः फलवन्तः च भवन्ति। कस्य इति चेद् शान्तो दान्तः इत्यादिशब्दभाजः तीव्रवैराग्यवतः तीव्रमुमुक्षतावतः एवेति। तीव्रवैराग्ये शमादिशब्दाः अर्थवन्तः, तीव्रमुमुक्षुत्वे शमादयः फलवन्तः इति विभागः अत्र ज्ञेयः।

**"काकस्य विष्ठावदसह्यबुद्धिर्भोग्येषु सा तीव्रविरक्तिरिष्यते।**

**विरक्तितीव्रत्वनिदानमाहुः भोग्येषु दोषेक्षणमेव सन्तः।।"**

इति वैराग्ये तीव्रत्वं तत्साधनं च कथितं सर्ववेदान्तसिद्धान्तसारसंग्रहे। मुमुक्षुत्वे तीव्रत्वं प्रवृद्धत्वमेव, तच्च प्रागेवाभिहितम् । अन्यत् सर्वं स्पष्टमिति दिक्।

**-----------**

**"मोक्षकारणसामग्रयां भक्तिरेव गरीयसी।**

**स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते।।**

**स्वात्मतत्त्वानुसन्धानं भक्तिरित्यपरे जगुः। (३१)**

**उत्सः** - आलोच्यः श्लोकोऽयं श्रीशङ्कराचार्यविरचितात् 'विवेकचूडामणिः' इति ग्रन्थात् उत्कलितः।

**प्रसङ्गः** - सर्वेषां वेदान्तानाम् अद्वितीयब्रह्मणि प्रत्यगभिन्ने नित्यशुद्धमुक्तस्वभावे तात्पर्यनिर्णयानुकूलव्यापाररूपश्रवणात्म- ब्रह्मविचाराधिकारिणो विशेषानि विवेकादीनि निरूप्य आत्मसाक्षात्कारसाक्षात्साधनं भक्तिमाह अनेन श्लोकेन।

**व्याख्या** - स्वस्वरूपानुसन्धानं निदिध्यासनमुच्यते। तस्यैव साक्षात्कारं प्रति साक्षात्साधनत्वात्। श्रुत्याचार्योपदेशेन स आत्मा तत्त्वमसीति श्रुतः यः अर्थः तव स्वरूपं ब्रह्म तदेव त्वमिति, तदनुसन्धानं तद्भावनाधारा विजातीयप्रत्ययतिरस्कृतसजातीयप्रवाहरूपा साक्षात्कारे असाधारणं कारणमिति भावः।

KOUSIK PATRA

अपरेषां मतं भवति स्वात्मतत्त्वानुसन्धानमेव भक्तिरिति। स्वात्मनः स्वस्य जीवस्य तत्त्वानुसन्धानम्। तस्य भावस्तत्त्वं, तत्पदवाच्यार्थत्वं परमात्मत्वमित्यर्थः। तस्यानुसन्धानं, वास्तविकभेदसत्त्वे अपि अभेदेनोपासनम् अहंग्रहोपासनमिति यावत्। 'एतत् भक्तिरिति अपरे जगुः' इति भेदबुद्धिपुरस्सरायाः भ्रान्तिरूपायाः अस्याः मुख्यभक्तित्वं नास्तीति सुचितमिति दिक्।

------------

**वेदान्तार्थविचारेण जायते ज्ञानमुत्तमम्।**

**तेनात्यन्तिकसंसारदुःखनाशो भवत्यनु।। (४६)**

**उत्सः** - आलोच्यः श्लोकोऽयं श्रीशङ्कराचार्यविरचितात् 'विवेकचूडामणिः' इति ग्रन्थात् उत्कलितः।

**प्रसङ्गः** - संसारभयनाशनः कश्चित् महान् उपायः अस्ति, तेन संसारसिन्धुं तीर्वा परमानन्दमाप्स्यसि इति उक्तम्। ननु कः सः महान् उपायः इति प्रश्ने उच्यते शङ्कराचार्येण - 'वेदान्तार्थविचारेण...' इत्यादि।

**व्याख्या** - वेदानामन्ताः वेदान्ताः उपनिषदः, तासां यः अर्थः तद्विचारेण, उपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गैः सजातीयविजातीयस्वगतभेद- रहितः नित्यशुद्धबुद्धमुक्तस्वभावः परमात्मा तस्य विचारेण तन्निर्णयानुकूलमानसव्यापारेण, उत्तमं ज्ञानं निर्णयः वा जायते तेन आत्यन्तिक संसारदुः खनाशः निर्णयेन स्वसमानाधिकरणदुः खप्रागभावासमानकालिकः दुःखनाशः, अनु तन्निर्णयानुपदं भवति इत्यर्थः इति शम्।

---------

**अज्ञानयोगात्परमात्मनस्तव ह्यनात्मबन्धस्तत एव संसृतिः।**

**तयोर्विवेकोदितबोधवह्नि-रज्ञानकार्यं प्रदहेत्समूलम्।। (४८)**

**उत्सः** - आलोच्यः श्लोकोऽयं श्रीशङ्कराचार्यविरचितात् 'विवेकचूडामणिः' इति ग्रन्थात् उत्कलितः।

**प्रसङ्गः** - आचार्यः शङ्करः गुरुमुखेन शिष्यं प्रति संसृतिहेतुं, तन्निदानं, तन्निवृत्त्युपायं च सकारणमुपदिशति - अज्ञानयोगादित्यादिना श्लोकेन।

**व्याख्या** - परमात्मनस्तव अज्ञानयोगात् अनाद्यविद्यासंबन्धात्, अनात्मबन्धः अनात्मसु स्थूलसूक्ष्मकारणशरीरेष्वात्मबुद्धिः इति। एतस्मादेव जन्मजरामरणसुखदुःखजडत्वादिधर्माध्यासरूपा संसृतिः जीवस्य। तयोः आत्मानात्मनोः विवेकोदितबोधवह्निः साक्षात्काररूपाग्निः समूलं अज्ञानरूपबीजोपेतं अज्ञानकार्य अहंकारादिदेहान्तबन्धं समूलं प्रदहेदित्यर्थः। तस्मात् संसृतिकारणं भवति अनात्मबन्धः, तत्र कारणं तवाज्ञानयोगः, तन्निवृत्युपायः परमात्मबोधः, तत्र कारणं

KOUSIK PATRA

आत्मानात्मविवेकः इत्येव शास्त्रार्थः। तेन वेदान्तविचारजन्योत्तमज्ञानस्य संसारदुःखनाशकत्वविषये उपपत्तिः प्रदर्शिता, अज्ञानस्य बन्धस्य ज्ञानादेव निवृत्तिः नान्यत इति दिक्।

-----------

**ऋणमोचनकर्तारः पितुः सन्ति सुतादयः।**

**बन्धमोचनकर्ता तु स्वस्मादन्यो न कश्चन।। (५२)**

**उत्सः -** आलोच्यः श्लोकोऽयं श्रीशङ्कराचार्यविरचितात् 'विवेकचूडामणिः' इति ग्रन्थात् उत्कलितः।

**प्रसङ्गः** - ननु अन्यस्य मुक्तिः किम् अन्येन केनचित् सम्पादयितुं शक्य इति प्रश्नस्य उत्तरे शङ्कराचार्येण उच्यते- 'ऋणमोचनकर्तारः....' इत्यादि।

**व्याख्या** - लोके तावत् पुत्रपौत्रादयः पितुः ऋणमोचनकर्तारः भवन्ति। ऋणात् शास्त्रीयात् लौकिकाद्वा मोचयन्ति पुत्रप्राप्त्या तद्वाक्यानुपालनेन अर्थसमर्पणेन वा। किन्तु बन्धमोचनकर्ता नाम अनात्माहंकारादिदेहान्त- बन्धमोचयिता तु स्वस्मादन्यो न कश्चन भवितुमर्हति। स्वस्य अन्तःकरणाद्यनात्मनि वर्तमानाध्यासः स्वेनैव निवर्तनीयः, नान्यस्तत्र प्रभुरित्यर्थः। यथा मस्तके न्यस्तभारादेः दुःखमन्यैः निवार्यते किन्तु क्षुधादिकृतदुःखं स्वेन विना अन्येन केनचित् निवारयितुं न शक्यते इति दिक्।

---------

**न योगेन न सांख्येन कर्मणा नो न विद्यया।**

**ब्रह्मात्मैकत्वबोधेन मोक्षः सिद्ध्यति नान्यथा।। (५७)**

**उत्सः** - आलोच्यः श्लोकोऽयं श्रीशङ्कराचार्यविरचितात् 'विवेकचूडामणिः' इति ग्रन्थात् उत्कलितः।

**प्रसङ्गः** - ब्रह्मात्मैकत्वबोधव्यतिरिक्तस्य मोक्षहेतुत्वं निषेधति शङ्कराचार्यः अनेन श्लोकेन।

**व्याख्या** - ब्रह्मस्वरूपेणावस्थानलक्षणमोक्षः, ब्रह्मात्मैकत्वबोधेन ब्रह्म च आत्मा च ब्रह्मात्मनौ, तयोरेकत्वमभेदः तद्बोधः तस्य साक्षात्कारः तेन सिध्यतीति। नान्यथा अन्येन प्रकारेण न सिध्यतीत्यर्थः। तदेव, विशदयति-योगेन मोक्षो न सिध्यति, योगशास्त्रजन्यज्ञानेन भेदविषयेण, चित्तवृत्तिनिरोधरूपयोगेन वा मोक्षो न भवतीत्यर्थः। एवं सांख्येन कपिलमहर्षिप्रणीतसांख्यशास्त्रजन्यज्ञानेन वा नानात्मविषयेण मोक्षो न सिध्यति। कर्मणा पूर्वकाण्डविहितयज्ञादिकर्मणा न सिध्यति। न विद्ययेति, उपनिषद्विहितयापि विद्यया सगुणोपासनया कैवल्यरूपमोक्षो न सिध्यतीति। तत्र योगसांख्यशास्त्रजन्यज्ञानस्य भेदविषयत्वात्, **'यदाह्येवैष**

**एतस्मिन्नुदरमन्तरं कुरूते, अत तस्य भयं भवति'** इति अभयप्रापकत्वमेव नास्ति। कर्मणः नित्यमोक्षाभिव्यञ्जकत्वं नास्ति। उच्यते च **'नास्त्यकृतः कृतेन, अमृतत्वस्य नाशास्ति वित्तेन'** इत्याद्या श्रुत्या। नित्यत्वं खलु मोक्षस्य 'न स पुनरावर्तते' इति श्रुत्यावगम्यते एव। एवं 'विद्यां चाविद्यां च', 'विद्यया तदारोहंति' इत्यादौ विद्याशब्दस्य उपासनापरत्वं सिध्यति। अतः विद्यापदस्य आत्मविद्याव्यतिरिक्तापरविद्यार्थः। तया ब्रह्मस्वरूपावस्थानलक्षणमोक्षः न सिध्यति। एवमेव अन्येषु अपि बोध्यव्यमिति दिक्।

---------

**अविज्ञाते परे तत्त्वे शास्त्राधीतिस्तु निष्फला।**

**विज्ञातेऽपि परे तत्त्वे शास्त्राधीतिस्तु निष्फला।। (६०)**

**उत्सः** - आलोच्यः श्लोकोऽयं श्रीशङ्कराचार्यविरचितात् 'विवेकचूडामणिः' इति ग्रन्थात् उत्कलितः।

**प्रसङ्गः** - आत्मतत्त्वसाक्षात्काराभावे शास्त्राध्ययनं तज्जन्यकौशलं वा निष्फलमिति शङ्कराचार्येण उच्यते - 'अविज्ञाते...' इत्यादिना।

**व्याख्या** - परे कालत्रयावाध्यत्वेन स्वयंप्रकाशानन्दरूपत्वेन च मिथ्याभूतजडदुःखादिरूपदेहादिमायान्तसकलकार्यकारणापेक्षया उत्कृष्टे, तस्य सर्वस्याधिष्ठानभूते तत्त्वे निर्गुणे ब्रह्मणि, अविज्ञाते सति नाम असाक्षात्कृते सति अर्थविचारपर्यन्तवेदान्ताध्ययनमपि शास्त्राधीतिस्तु निष्फला। यदर्थं विचारः शास्त्रविहितः तस्यालाभो निष्फलत्वं तत्र तत्फललाभपर्यन्तं यथोक्तफलशून्यत्वरूपं सिद्धमेवेति भावः । जन्मान्तरकृतसाधनवशात् गर्भस्थेनापि वामदेवेनेव परे तत्त्वे विज्ञाते साक्षात्कृते अपि अनन्तरं फलस्य निष्पन्नत्वात् शास्त्राध्ययनादिकं न कार्यमिति भावः इति दिक्।

-----------

KOUSIK PATRA

# SALTORA NETAJI CENTENARY COLLEGE

*(Affiliated to Bankura University)*

Saltora, 722158, Dist.- Bankura, West Bengal

## Model Questions & Answers

Semester-I (NEP)

Subject: B.A. SANSKRIT (Major)

Course Code: A/SNS/101/MJC-1

Course Title: General Grammar with translation & Metre

Prepared by

Kousik Patra

Assistant Professor

Department of Sanskrit

Saltora Netaji Centenary College

E-mail ID : patrakousikjrf@gmail.com

Mobile No : 7872177720

KOUSIK PATRA

**1. परिनिष्ठितरूपं विलिख्य यथेच्छं पञ्चभिः वाक्यानि विरच्यन्ताम्। 1×5=5**

क) लभ्-धातोः क्तप्रत्यये पुंलिङ्गे प्रथमैकवचने - **लब्धः** - तदा सुवर्णभण्डारः **लब्धः** ।

ख) प्र-आप् धातोः ल्यप्-प्रत्यययोगे - **प्राप्य** - जनाः विद्यां **प्राप्य** विनयम् आचरन्ति।

ग) विद्- धातोः शानच्-प्रत्यये पुलिङ्गे प्रथमैकवचने - **विद्यमानः -** ईश्वरः सर्वभूतेषु **विद्यमानः** अस्ति।

ङ) पठ्-धातोः क्तवतुप्रत्यये पुंलिङ्गे प्रथमैकवचने - **पठितवान् -** छात्रः पुस्तकं **पठितवान्।**

क) पठ्धातोः क्तप्रत्यये पुंलिङ्गे प्रथमैकवचने - **पठितः** - पुस्तके **पठितः** पाठः जीवने नैव साधितः ।

ख) प्र-नम् धातोः ल्यप्-प्रत्यययोगे- **प्रणम्य** - छात्रः शिक्षकं **प्रणम्य** आगतवान्।

ग) सेव्-धातोः शानच्-प्रत्यये पुंलिङ्गे प्रथमैकवचने- **सेवमानः -** पुत्रः मातापितरौ **सेवमानः** स्वकर्तव्यं निर्वहति।

ङ) गम्-धातोः क्तवतुप्रत्यये पुंलिङ्गे प्रथमैकवचने - **गतवान्** - छात्रः विद्यालयं **गतवान्।**

छ) माता च पिता च इत्यस्य समासे - **मातापितरौ** - पुत्रः **मातापितरौ** सेवमानः स्वकर्तव्यं निर्वहति।

**2) अधोलिखितेषु यथेच्छं पञ्चकस्य व्युत्पत्तिर्निर्णया। 1×5=5**

दानीयः = दा-धातोः अनीयर्-प्रत्यये पुंलिङ्गे प्रथमैकवचनम्।

गन्तुम् = गम् + तुमुन्।

पठितः = पठ्-धातोः क्तप्रत्यये पुंलिङ्गे प्रथमैकवचनम् ।

प्रणम्य = प्र-नम् धातोः ल्यप्-प्रत्यययोगे।

गतः = गम्-धातोः क्तप्रत्यये पुंलिङ्गे प्रथमैकवचनम् ।

त्यक्त्वा = त्यज् + क्त्वाच्।

करणीयः = कृ-धातोः अनीयर्-प्रत्यये पुंलिङ्गे प्रथमैकवचनम्।

दर्शनीयः = दृश्-धातोः अनीयर्-प्रत्यये पुंलिङ्गे प्रथमैकवचनम्।

वर्धमानः = वृध् - धातोः शानच्-प्रत्यये पुलिङ्गे प्रथमैकवचनम्।

पठितवान् = पठ्-धातोः क्तवतुप्रत्यये पुंलिङ्गे प्रथमैकवचनम्।

पक्वः = पच्-धातोः क्तप्रत्यये पुंलिङ्गे प्रथमैकवचनम् ।

गत्वा = गम् + क्त्वाच् ।

परित्यज्य = परि-त्यज् + ल्यप्।

KOUSIK PATRA

कर्तुम् = कृ + तुमुन्।

**3) यथेच्छं पञ्चकस्य परिनिष्ठितरूपं लिख्यताम्। 1×5=5**

যে কোন পাঁচটির পরিনিষ্ঠিত রূপ লেখ।

इष् + क्त = इष्ट ।

दृश् + तुमुन् = द्रष्टुम् ।

चि + तुमुन् = चेतुम् ।

कृ + तव्य = कर्तव्य ।

गम् + क्तवतु = गतवत् ।

खाद् + क्त = खादित ।

नम् + क्त्वा = नत्वा ।

आ-दा + ल्यप् = आदाय ।

सेव् + शानच् = सेवमान ।

दा + तव्य = दातव्य ।

गम् + शतृ = गच्छत् ।

खाद् + क्तवतु = खादितवत् ।

आ-गम् + ल्यप् = आगम्य /आगत्य ।

दा + तुमुन् = दातुम् ।

**4. अधः प्रदत्तेषु पञ्चानां परिनिष्ठितानि रूपाणि लिखित्वा तैः वाक्यानि रचनीयानि।**

क) दृश्+तव्य = **द्रष्टव्य** - छात्रेण पुस्तकं **द्रष्टव्यम्** ।

ख) गम्+शतृ = **गच्छत्** - छात्रः क्रोशं **गच्छन्** पुस्तकं पठति।

ग) स्ना+क्त्वा = **स्नात्वा** - वालकः **स्नात्वा** विद्यालयं गच्छति।

घ) प्र-नम् + ल्यप् - **प्रणम्य** - छात्रः शिक्षकं **प्रणम्य** आगतवान्।

ङ) भुज्+ तुमुन् = **भोक्तुम्** - सः मोदकं **भोक्तुम्** इच्छति।

च) गम्+क्त = **गत** - सः ह्यः तत्र **गतः**।

छ) दा+क्तवतु = **दत्तवत्** - राजा दरिद्राय धनं **दत्तवान्।**

KOUSIK PATRA

ज) जि+ तुमुन् = **जेतुम्** - सः **जेतुम्** इच्छति।

झ) शी+शानच् = **शयान** - शिशुः कटे **शयानः** आसीत्।

ञ) पठ्+क्त्वा = **पठित्वा** - छात्रः पुस्तकं **पठित्वा** विद्यालयं गच्छति।

ट) आ-गम् + ल्यप् = **आगम्य/आगत्य** - स अत्र **आगम्य/आगत्य** तत्र गतः।

ठ) हस्+अनीय = हसनीय - केनचित् दुःखेन न हसनीयम्।

ड) ज्ञा+क्त = ज्ञात - तेन सर्वं ज्ञातम्।

ढ) बुद्धि+मतुप् = बुद्धिमान् - जीवेषु मानवः श्रेष्ठः बुद्धिमान् जीवः।

ण) शी+तव्य = शयितव्य - नक्तं शीघ्रं शयितव्यम्।

त) धाव्+शतृ =धावत् - धावतः अश्वात् पतति अश्वारोही।

थ) वि-जि+ल्यप् - विजित्य - नृपः राज्यं विजित्य आगतवान्

द) गम्+क्त्वा = गत्वा - सः प्रथमं तत्र गत्वा ततः अत्र आगमिष्यति।

ध) पठ् + तुमुन् - पठितुम् - अयं कालः पठितुं योग्यः।

न) दा+क्त = दत्त - राजा दरिद्राय धनं दत्तः।

प) धृ+क्तवतु = धृतवत् - पुलिशकर्मी चौरं धृतवान्।

फ) खाद्+ तुमुन् = खादितुम् - सः मोदकं खादितुम् इच्छति।

व) कम्प्+क्त = कम्पित - सः भयेन कम्पितः।

**5) यथेच्छमेकस्य शब्दस्य रूपाणि लिखत। 5×1=5**

१) साधुशव्दस्य २) वारिशब्दस्य (३) मुनिशब्दस्य (४) नदीशब्दस्य।

KOUSIK PATRA

१) साधुशव्दस्य रूपाणि -

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| **प्रथमा** | साधु: | साधू | साधव: |
| **द्वितीया** | साधुम् | साधू | साधून् |
| **तृतीया** | साधुना | सधुभ्याम् | साधुभि: |
| **चर्तुथी** | साधवे | सधुभ्याम् | साधुभ्य: |
| **पन्चमी** | साधो: | सधुभ्याम् | साधुभ्य: |
| **षष्ठी** | साधो: | साध्वो: | साधूनाम् |
| **सप्तमी** | साधौ | साध्वो: | साधुषु |
| **सम्बोधन !** | हे साधो ! | हे साधू ! | हे साधव: ! |

२) वारिशब्दस्य रूपाणि -

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| **प्रथमा** | वारि | वारिणि | वारीणि |
| **द्वितीया** | वारि | वारिणी | वारीणि |
| **तृतीया** | वारिणा | वारिभ्याम् | वारिभि: |
| **चतुर्थी** | वारिणे | वारिभ्याम् | वारिभ्य: |
| **पंचमी** | वारिण: | वारिभ्याम् | वारिभ्य: |
| **षष्ठी** | वारिण: | वारिणो: | वारीणाम् |
| **सप्तमी** | वारिणि | वारिणो: | वारिषु |
| **सम्बोधन** | हे वारि ! | हे वारिणी ! | हे वारीणि ! |

KOUSIK PATRA

३) मुनिशब्दस्य रूपाणि -

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
| --- | --- | --- | --- |
| **प्रथमा** | मुनि: | मुनी | मुनय: |
| **द्वितीया** | मुनिम् | मुनी | मुनीन् |
| **तृतीया** | मुनिना | मुनिभ्याम् | मुनिभि: |
| **चर्तुथी** | मुनये | मुनिभ्याम् | मुनिभ्य: |
| **पन्चमी** | मुने: | मुनिभ्याम् | मुनिभ्य: |
| **षष्ठी** | मुने: | मुन्यो: | मुनीनाम् |
| **सप्तमी** | मुनौ | मुन्यो: | मुनिषु |
| **सम्बोधन** | हे मुने! | हे मुनी! | हे मुनय:! |

KOUSIK PATRA

४) नदीशब्दस्य रूपाणि -

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
| --- | --- | --- | --- |
| **प्रथमा** | नदी | नद्यौ | नद्यः |
| **द्वितीया** | नदीम् | नद्यौ | नदीः |
| **तृतीया** | नद्या | नदीभ्याम् | नदीभिः |
| **चर्तुथी** | नद्यै | नदीभ्याम् | नदीभ्यः |
| **पंचमी** | नद्याः | नदीभ्याम् | नदीभ्यः |
| **षष्ठी** | नद्याः | नद्योः | नदीनाम् |
| **सप्तमी** | नद्याम् | नद्योः | नदीषु |
| **सम्बोधन** | हे नदी ! | हे नद्यौ ! | हे नद्यः ! |

**6) पञ्चानां रेखाङ्कितपदानां सकारणविभक्तिनिर्देशः कार्यः। 1×5=5**

१) **दुःखेन** रोदिति वाला। - 'हेतौ' सूत्रेण हेत्वर्थे तृतीया विभक्तिः।

२) **ग्रामं** निकषा अरण्यम् अस्ति - 'अभितः-परितः-समया-निकषा-हा-प्रतियोगेऽपि' इति वार्तिकेण निकषा-शब्दयोगे द्वितीया विभक्तिः।

३) **वसन्ते** आगले कोकिलाः कूजन्ति - 'यस्य च भावेन भावलक्षणम्' इति सूत्रेण भावे सप्तमी विभक्तिः।

४) पितामहः **कर्णेन** बधिरः - 'येनाङ्गविकारः' इति सूत्रेण अङ्गविकारे तृतीया विभक्तिः।

५) **धर्मात्** विद्या गरीयसी - 'पञ्चमी विभक्ते' इति सूत्रेण अपेक्षार्थे पञ्चमी विभक्तिः।

६) **कवीनां** कालिदासः श्रेष्ठः - 'यतश्च निर्धारणम्' इति सूत्रेण निर्धारणे षष्ठी विभक्तिः।

७) **वालकः** जलं पिवति - 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण कर्मकारकं, 'कर्मणि द्वितीया' इति सूत्रेण कर्मकारके द्वितीया विभक्तिः।

८) **वने** व्याघ्राः तिष्ठन्ति - 'आधारोऽधिकरणम्' इति सूत्रेण अधिकरणकारकं, 'सप्तम्यधिकरणे च' इति सूत्रेण अधिकरणकारके सप्तमी विभक्तिः।

(a) पत्रं **वृक्षात्** पतति - 'ध्रुवमपायेऽपादानम्' इति सूत्रेण अपादानकारकं, 'अपादाने पञ्चमी' इति सूत्रेण अपादानकारके पञ्चमी  विभक्तिः।

(b) **रामेण** सह सीता वनं गच्छति - 'सहयुक्तेऽप्रधाने' इति सूत्रेण सहार्थे तृतीया विभक्तिः।

(c) रमेशः **द्विचक्रिकया** गच्छति - 'साधकतमं करणम्' इति सूत्रेण करणकारकं, 'कर्तृकरणयोस्तृतीया' इति सूत्रेण करणकारके तृतीया विभक्तिः।

(d) रामः **मोदकं** खादति - - 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण कर्मकारकं, 'कर्मणि द्वितीया' इति सूत्रेण कर्मकारके द्वितीया विभक्तिः।

(e) **गङ्गातीरे** गावः चरन्ति - 'आधारोऽधिकरणम्' इति सूत्रेण अधिकरणकारकं, 'सप्तम्यधिकरणे च' इति सूत्रेण अधिकरणकारके सप्तमी विभक्तिः।

(f) **श्रीकृष्णाय** नमः - 'नमः-स्वस्ति-स्वाहा-स्वधालं-वषड्योगाच्च' इति सूत्रेण नमस्-शब्दयोगे चतुर्थी विभक्तिः।

(g) **कृष्णं** विना शून्यमिदं जगत् - 'पृथग्-विना-नानाभिस्तृतीयान्यतरस्याम्' इति सूत्रेण विना-शब्दयोगे द्वितीया विभक्तिः।

(h) **ब्राह्मणाय** रागा गां ददाति - 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति सूत्रेण सम्प्रदानकारकं, 'चतुर्थी सम्प्रदाने' इति सूत्रेण सम्प्रदानकारकं चतुर्थी विभक्तिः।

१) चन्दनः **चोराद्** बिभेति - 'भीत्रार्थानां भयहेतुः' इति सूत्रेण अपादानकारकं, 'अपादाने पञ्चमी' इति सूत्रेण अपादानकारके पञ्चमी  विभक्तिः।

२) **रामेण** सह लक्ष्मणः वनं गच्छति - 'सहयुक्तेऽप्रधाने' इति सूत्रेण सहार्थे तृतीया विभक्तिः।

KOUSIK PATRA

३) अहं **<u>हस्तेन</u>** खादामि - 'साधकतमं करणम्' इति सूत्रेण करणकारकं, 'कर्तृकरणयोस्तृतीया' इति सूत्रेण करणकारके तृतीया विभक्तिः।

४) रामः **<u>विद्यालयं</u>** गच्छति - 'गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि' इति सूत्रेण कर्मकारके द्वितीया विभक्तिः।

५) **<u>वने</u>** गावः चरन्ति - 'आधारोऽधिकरणम्' इति सूत्रेण अधिकरणकारकं, 'सप्तम्यधिकरणे च' इति सूत्रेण अधिकरणकारके सप्तमी विभक्तिः।

८) **<u>भिक्षुकाय</u>** राजा धनं ददाति - 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति सूत्रेण सम्प्रदानकारकं, 'चतुर्थी सम्प्रदाने' इति सूत्रेण सम्प्रदानकारकं चतुर्थी विभक्तिः।

(a) **<u>रामेण</u>** सह सीता वनं गच्छति - 'सहयुक्तेऽप्रधाने' इति सूत्रेण सहार्थे तृतीया विभक्तिः।

(c) **<u>चर्मणि</u>** व्याघ्रं हन्ति - 'निमित्तात् कर्मयोगे' इति सूत्रेण निमित्तार्थे सप्तमी विभक्तिः।

(d) श्यामः **<u>घनादपि</u>** कृष्णः - 'पञ्चमी विभक्ते' इति सूत्रेण अपेक्षार्थे पञ्चमी विभक्तिः।

(e) शिशुः **<u>हस्ताभ्याम्</u>** ओदनं खादति - 'साधकतमं करणम्' इति सूत्रेण करणकारकं, 'कर्तृकरणयोस्तृतीया' इति सूत्रेण करणकारके तृतीया विभक्तिः।

(f) **<u>सरस्वत्यै</u>** नमः - 'नमः-स्वस्ति-स्वाहा-स्वधालं-वषड्योगाच्च' इति सूत्रेण नमस्-शब्दयोगे चतुर्थी विभक्तिः।

(g) **<u>दरिद्रेभ्यः</u>** राजा वस्त्रं यच्छति - 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति सूत्रेण सम्प्रदानकारकं, 'चतुर्थी सम्प्रदाने' इति सूत्रेण सम्प्रदानकारकं चतुर्थी विभक्तिः।

(h) **<u>देवदत्तः</u>** यज्ञदत्तेन भारं वाहयति - 'तत्प्रयोजको हेतुश्च' इति सूत्रेण प्रयोजककर्तरि प्रथमा विभक्तिः।

(a) अश्वः **<u>मन्दं</u>** धावति - 'क्रियाविशेषणानां कर्मत्वमेकत्वं नपुंसकत्वञ्च' इति पाणिनिनये कर्मकारके द्वितीया विभक्तिः।

(b) **<u>गुरोः</u>** शास्त्रम् अधीते - 'आख्यातोपयोगे' इति सूत्रेण अपादानकारकं, 'अपादाने पञ्चमी' इति सूत्रेण अपादानकारके पञ्चमी विभक्तिः।

(c) **<u>मासं</u>** व्याकरणमपठत् - 'कालाध्वनोरत्यन्तसंयोगे' इति सूत्रेण अत्यन्तसंयोगे द्वितीया विभक्तिः।

(d) **<u>कुण्डलाय</u>** हिरण्यम् - 'तादर्थ्ये चतुर्थी' इति वार्तिकेण चतुर्थी विभक्तिः।

(e) बालकः **<u>कटे</u>** आस्ते - 'आधारोऽधिकरणम्' इति सूत्रेण अधिकरणकारकं, 'सप्तम्यधिकरणे च' इति सूत्रेण अधिकरणकारके सप्तमी विभक्तिः।

(f) **<u>सूर्ये</u>** उदिते पद्मं प्रकाशते - 'यस्य च भावेन भावलक्षणम्' इति सूत्रेण भावे सप्तमी विभक्तिः।

(g) **<u>ग्रामं</u>** परितः नदी - 'अभितः-परितः-समया-निकषा-हा-प्रतियोगेऽपि' इति वार्तिकेण परितः-शब्दयोगे द्वितीया विभक्तिः।

(h) **<u>पिता</u>** पुत्रं विद्यालयं गमयति - - 'तत्प्रयोजको हेतुश्च' इति सूत्रेण प्रयोजककर्तरि प्रथमा विभक्तिः।

**7) यथेच्छ प्रश्नपञ्चकं समाधेयम्। 1×5=5**

१) 'दृष्ट्वा' इत्यत्र का प्रकृतिः कः च प्रत्ययः ? - 'दृष्ट्वा' इत्यत्र 'दृश्' इति प्रकृतिः क्त्वाच् प्रत्ययः।

KOUSIK PATRA

२) विद्-धातोः शानच्-प्रत्यये किं रूपम् ? - विद्यमान ।

३) पठ्-धातोः अनीयर्-प्रत्यये किं रूपम् ? - पठनीय ।

५) लम्-धातोः तुमुन्-प्रत्यये किं रूपम् ? - लब्धुम्।

६) 'गतवान्' इत्यत्र व्युत्पतिः का ? - गम्-धातोः क्तवतु-प्रत्यये पुंलिङ्गे प्रथमैकवचने।

७) परा-पूर्वकाद् जि-धातोः ल्यपि किं रूपम् ? पराजित्य ।

८) 'ग्रहीतव्य' इत्यत्र का प्रकृतिः कः च प्रत्ययः ? - 'ग्रहीतव्य' इत्यत्र ग्रह् - प्रकृतिः तव्यत् प्रत्ययः।

अथवा

1) 'श्रोतुम्' इत्यत्र का प्रकृतिः कः च प्रत्ययः ? - 'श्रोतुम्' इत्यत्र श्रु- प्रकृतिः तुमुन् च प्रत्ययः।

२) दा-धातोः तव्य-प्रत्यये किं रूपम् ? - दातव्य ।

३) गम्-धातोः क्त- प्रत्यये किं रूपम् ? - गतः ।

४) 'खादित्वा' इत्यत्र का प्रकृतिः कः च प्रत्ययः ? - 'खादित्वा' इत्यत्र खाद् प्रकृतिः क्त्वाच् च प्रत्ययः ?

६) 'प्रणम्य' इत्यत्र व्युत्पतिः का ? - प्र-नम्-धातोः ल्यप्-प्रत्ययः।

७) कृ-धातोः शानच्-प्रत्यये किं रूपम् ?- कुर्वाण ।

**B. यथेच्छं प्रश्नपञ्चकं समाधेयम्। 1×5=5**

(a) कृधातोः शतृप्रत्यये किं रूपम् ? - कुर्वत् ।

(b) विपूर्वकाद् ज्ञाधातोः ल्यपि किं रूपम् ?- विज्ञाय।

(c) वक्तुम् इत्पत्र कः प्रत्ययः काश्च प्रकृतिः?-वक्तुम् इत्पत्र 'वच्' इति प्रकृतिः 'तुमुन्' इति प्रत्ययः।

(g) ईश्-धातोः शानच्प्रत्यये किं रूपम्? - ईशान ।

(h) भोक्तुम् इत्यत्र कः प्रत्ययः काश्च प्रकृतिः?- भोक्तुम् इत्यत्र 'भुज्' इति प्रकृतिः 'तुमुन्' इति प्रत्ययः।

**C) यथेच्छं प्रश्नपञ्चकं समाधेयम्। 5×1=5**

१) सेव्-धातोः शानच्प्रत्यये किं रूपम्? - सेवमान ।

२) आपूर्वकाद् गम्-धातोः ल्यपि किं रूपम् ? - आगम्य/आगत्य।

३) दातुम् इत्यत्र कः प्रत्ययः का च प्रकृतिः?- दातुम् इत्यत्र 'दा' इति प्रकृतिः तुमुन् प्रत्ययः।

५) कृधातोः क्त्वाप्रत्यये किं रूपम्? - कृत्वा।

७) गम्-धातोः तुमुन्प्रत्यये कि रूपम् ? - गन्तुम्।

**अथवा**

KOUSIK PATRA

१) ईक्ष-धातोः शानच्प्रत्यये किं रूपम्? - ईशान।

२) प्रपूर्वकाद् नम्-धातोः ल्यपि कि रूपम् ? - प्रणम्य।

३) वक्तुम् इत्यत्र कः प्रत्ययः का च प्रकृतिः?- 'वक्तुम्' इत्पत्र 'वच्' इति प्रकृतिः 'तुमुन्' इति प्रत्ययः।

५) वच्-धातोः क्त्वाप्रत्यये कि रूपम् ? - उक्त्वा।

७) नम्-धातोः तुमुन्प्रत्यये किं रूपम्? - नन्तुम्।

**D. यथेच्छं प्रश्नपञ्चकं समाधेयम्। 1x5=5**

(a) लभ्-धातोः शानच्प्रत्यये किं रूपम्। - लभमान ।

(b) प्रपूर्वकात् नम्धातोः ल्यपि किं रूपम् ? - प्रणम्य।

(c) दातुम् इत्यस्य प्रकृतिप्रत्ययौ आलोच्यौ। - दातुम् इत्यस्य 'दा' इति प्रकृतिः तुमुन्- प्रत्ययः।

(g) गम्-धातोः क्त्वाप्रत्यये किं रूपम्। - गत्वा ।

**अथवा**

**यथेच्छं पञ्च प्रश्नाः समाधेयाः। 1×5=5**

(a) ईक्ष्-धातोः शानचि किं रूपम? - ईशान ।

(b) कृधातोः अनीयर्-प्रत्यये पुंलिङ्गप्रथमैकवचने किं रूपम्? - करणीयः।

(c) पठितुम् इत्यस्य व्युत्पत्तिः निर्णया। - पठ्-धातोः तुमुन्-प्रत्ययः।

(d) पठ्धातोः शतृप्रत्यये पुलिङ्गे प्रथमैकवचने किं रूपम् ? -पठन् ।

(f) वच्-धातोः क्त्वाप्रत्यये किं रूपम्? - उक्त्वा।

(g) शीधातोः तुमुन्प्रत्यये किं रूपम् ? - शयितुम् ।

**8. अधोनिर्दिष्टेषु प्रश्नेषु पञ्चप्रश्नाः समाधेयाः । 1×5=5**

(a) कृ + शानच् इत्यत्र किं परिनिष्ठितं रूपम् ? - कुर्वाण।

(b) प्र-दा + ल्यप् इत्यत्र किं रूपम् ? - प्रदाय ।

(c) दृश् + क्त्वा इत्यत्र किं रूपम् ? - दृष्ट्वा ।

(d) गातुम् इत्यत्र कः धातुः कः च प्रत्ययः? - गातुम् इत्यत्र गै-धातुः तुमुन्-प्रत्ययः?

(f) करणीयम् इत्यन्त्र कः धातुः कः च प्रत्ययः? - करणीयम् इत्यन्त्र कृ-धातुः अनीयर्-प्रत्ययः?

**अथवा**

**अधोनिर्दिष्टेषु प्रश्नेषु पञ्चप्रश्नाः समाधेयाः।**

KOUSIK PATRA

(a) सेव् + शानच् इत्यत्र किं परिनिष्ठितं रूपम् ? - सेवमान।

(b) आ + गम् + ल्यप् इत्यत्र किं रूपम् ? - आगम्य / आगत्य ।

(c) कृ + तव्य इत्यत्र किं रूपम् ? - कर्तव्य।

(d) द्रष्टुम् इत्यत्र को धातुः कः च प्रत्ययः ? - द्रष्टुम् इत्यत्र दृश्-धातुः तुमुन्-प्रत्ययः ।

(c) पठनीयम् इत्यत्र को धातुः कः च प्रत्ययः? - पठनीयम् इत्यत्र पठ्-धातुः अनीयर्-प्रत्ययः।

(f) गच्छन् इत्यत्र को धातुः कश्च प्रत्ययः? - गच्छन् इत्यत्र गम्-धातुः शतृ-प्रत्ययः।

(g) स्नात्वा इत्यत्र को धातुः कश्च प्रत्ययः? - स्नात्वा इत्यत्र स्ना-धातुः क्त्वाच्-प्रत्ययः।

(h) उक्त्वा इत्यत्र को धातुः कश्च प्रत्ययः? - उक्त्वा इत्यत्र वच्-धातुः क्त्वाच्-प्रत्ययः।

**9. अधोलिखितेषु अव्ययपदेषु यथेच्छं पञ्चकेन वाक्यानि रचनीयानि ।**

**নিম্নলিখিত অব্যয়পদগুলির মধ্যে যে কোন পাচটির দ্বারা বাক্য রচনা কর**

i) कदा - त्वं कदा गृहं गमिष्यसि।

ii)अधुना- अधुना कः समयः।

सदा - सदा सत्यं वद।

श्वः - अहं श्वः विद्यालयं गमिष्यामि।

ह्यः - अहं ह्यः विद्यालयं न गतवान्।

इदानीं - इदानीम् अहं पुस्तकं पठामि।

सहसा - सहसा निर्णयः न करणीयः।

अत्र - अत्र आगच्छ।

कुत्रापि - अहं कुत्रापि न गमिष्यामि।

नक्तम् - नक्तम् दधि न भुञ्जीत।

पुरा - पुरा अशोकः राजा आसीत्।

मिथः - तौ मिथः आलपतः।

**10. निम्नलिखितेषु पञ्च रिक्तस्थानानि पूरणीयानि।**

क) नरशब्दस्य द्वितीयायाः बहुवचने **<u>नरान्</u>** भवति।

ख) लताशब्दस्य तृतीयायाः बहुवचने **<u>लताभिः</u>** भवति।

KOUSIK PATRA

ग) मुनिशब्दस्य षष्ठ्याः बहुवचने **मुनीनाम्** भवति।

घ) फलशब्दस्य प्रथमायाः द्विवचने **फले** भवति।

ङ) नदीशब्दस्य द्वितीयायाः एकवचने **नदीम्** भवति।

च) साधुशब्दस्य प्रथमायाः वहुवचने **साधवः** भवति।

छ) आत्मन्-शब्दस्य षष्ठ्याः एकवचने **आत्मनः** भवति।

ज) अस्मद्-शब्दस्य द्वितीयायाः बहुवचने **अस्मान्** भवति।

क) नरशब्दस्य षष्ठ्याः बहुवचने **नराणाम्** भवति ।

ख) लताशब्दस्य सम्बोधनस्य एकवचने **लते** भवति ।

ग) वारिशब्दस्य प्रथमायाः द्विवचने **वारिणी** भवति ।

घ) मुनिशब्दस्य द्वितीयायाः बहुवचने **मुनीन्** भवति ।

ङ) मतिशब्दस्य षष्ठ्याः द्विवचने **मत्योः** भवति ।

च) नदीशब्दस्य षष्ठ्याः बहुवचने **नदीनाम्** भवति ।

छ) पयस् इत्ति शब्दस्य प्रथमायाः बहुवचने **पयांसि** भवति ।

ज) अस्मत् इति शब्दस्य द्वितीयायाः बहुवचने **अस्मान्** भवति ।

**11. निम्नलिखितेषु पञ्च रिक्तस्थानानि पूरणीयानि ।**

क) भू-धातोः लटि मध्यमपुरुषैकवचने **भवसि** भवति।

ख) पठ्-धातोः लङि प्रथमपुरुषैकवचने **अपठत्** भवति।

ग) गम्-धातोः लोटि मध्यमपुरुषैकवचने **गच्छ** भवति।

घ) शास्-धातोः लटि प्रथमपुरुषस्य बहुवचने **शासति** भवति।

ङ) दा-धातोः लङि उत्तमपुरुषस्य द्विवचने **अयच्छाव** भवति।

च) सेव्-धातोः लृटि प्रथमपुरुषैकवचने **सेविष्यते** भवति।

छ) शी-धातोः लटि मध्यमपुरुषस्य एकवचने **शेषे** भवति।

ज) स्था-धातोः लोटि उत्तमपुरुषस्य बहुवचने **तिष्ठाम** भवति।

क) गम्-धातोः लटि प्रथमपुरुषैकवचने **गच्छति** भवति ।

ख) खाद्-धातोः लङि उत्तमपुरुषैकवचने **अखादम्** भवति ।

KOUSIK PATRA

ग) नृत्-धातोः लोटि मध्यमपुरुषस्य द्विवचने **नृत्यतम्** भवति ।

घ) स्पृश्-धातोः लृटि प्रथमपुरुषैकवचने **स्प्रक्ष्यति/स्पर्क्ष्यति** भवति ।

ङ) जि-धातोः लङि उत्तमपुरुषैकवचने **अजयम्** भवति ।

च) पा-धातोः लोटि मध्यमपुरुषस्य द्विवचने **पिबतम्** भवति ।

छ) दा-धातोः लटि प्रथमपुरुषैकवचने **ददाति** भवति।

ज) मेव्-धातोः लोटि मध्यमपुरुषस्य द्विवचने **सेवेथाम्** भवति ।

**12. निम्नलिखितेषु पञ्च रिक्तस्थानानि पूरणीयानि।**

क) बालकः **पुस्तकं** (पुस्तक) पठति।

ख) पाचकः तण्डुलान् उदनं **पचति** (पच्+लट्)।

ग) बालकः **स्वभावेन** (स्वभाव) सरलः।

घ) बालकः **कर्णेन** (कर्ण) वधिरः।

ङ) नृपः **सिंहासनम्** (सिंहासन) अध्यास्ते।

च) **मातुः** (मातृ) निलीयते कृष्णः।

छ) गुरुः **शिष्याय** (शिष्य) चपेटां ददाति ।

(क) रामः मातरं **प्रणम्य** (प्र-नम् + ल्यप्) वनं गतवान्।

(ख) बालकः **ग्रामम्** (ग्राम) अधिवसति।

(ग) बालकाः **पादकन्दुकान्** (पादकन्दुक) दीव्यन्ति।

(घ) स **जात्या** (जाति) ब्राह्मणः।

(ङ) रजकाय वस्त्रं **ददाति** (दा + लट्)।

(च) शिशुः **शय्यायां** (शय्या) शेते।

(छ) **पर्वतेषु** (पर्वत) हिमालयः उच्चतमः।

**13. निम्नलिखितेषु पञ्चानां शुद्धिः करणीया।**

क) महाराजा अश्वेन सञ्चरति । - **महाराजः** अश्वेन **सञ्चरते**।

ख) नाहं यशं लिप्सामि। - नाहं **यशः लिप्से**।

ग) नक्ते जाग्रन्ति चौराः । - **नक्तं जाग्रति** चौराः।

KOUSIK PATRA

घ) नृत्यमानां गायकीं पश्य। - **नृत्यन्तीं गायिकां** पश्य।

ङ) मित्रो मे समुपस्थितः । - **मित्रं** मे **समुपस्थितम्**।

च) मे नास्ति व्याघ्रस्य भयम्। - **मम** नास्ति **व्याघ्रात्** भयम्।

छ) विजयतु महाराजा शुद्रकः । - **विजयतां महाराजः** शुद्रकः।

ज) मे नास्ति अर्थस्य प्रयोजनम् । - **मम** नास्ति **अर्थेण** प्रयोजनम् ।

**14. निम्नलिखितेषु पञ्चानां शुद्धिः करणीया।**

क) यो विद्वान् सो बहुभिः पूज्यते ।

ख) अददत् तस्मै धनं राजा। **अददात्** तस्मै धनं राजा।

ग) भूयसी यशस्तेन प्राप्तम्। - **भूयः** यशस्तेन प्राप्तम्।

घ) भवान् कथं मामवजानासि। - भवान् कथं माम**वजानाति**।

ङ) वानराः फलानि भुञ्जन्ते। - वानराः फलानि **भुञ्जन्ति।**

च) गुणीनां मुनीनां सान्निध्यं पावनम्। - **गुणिनां** मुनीनां सान्निध्यं पावनम् ।

छ) न्यायेन राजा राज्यं शासति। - न्यायेन राजा राज्यं **शास्ति।**

**15 A. निम्नलिखितेषु पञ्चानां वाक्यानां वाच्यपरिवर्तनं विधेयम्।**

क) बालकः चन्द्रं पश्यति। - बालकेन चन्द्रः दृश्यते।

ख) गोपः गां दुग्धं दोग्धि - गोपेन गौः दुग्धं दुह्यते ।

ग) गुरुः शिष्यं धर्मं बोधयति। - गुरुणा शिष्यः धर्मं बोध्यते।

घ) सः ग्रामं गतः। - तेन ग्रामः गतः।

ङ) रामः विद्यालयं गतवान्। - रामेण विद्यालयः गतः।

च) बालकः तिष्ठति। - बालकेन स्थीयते।

छ) बालिका गीतवती। - बालिकया गीतम्।

ज) स स्थास्यति। - तेन स्थास्यते।

**B. निम्नलिखितेषु पञ्चानां वाक्यानां वाच्यपरिवर्तनं विधेयम् ।**

क) रामः गृहं गच्छति। - रामेण गृहं गम्यते।

ख) अहमत्र गङ्गातटे निवसामि।- मया अत्र गङ्गातटे निवस्यते।

KOUSIK PATRA

গ) निराश्रयं मां जगदीश रक्ष। निराश्रयः अहं जगदीश्वरेण रक्ष

ঘ) दरिद्रेभ्यः धनं यच्छति। - दरिद्रेभ्यः धनं दीयते।

**16. पञ्चानां वाक्यानां संस्कृतेन देवनागर्या च अनुवादः करणीयः ।**

ক) মানুষ নিজের ভাগ্য নির্মাতা - मानवः स्वस्य भाग्यनिर्माता।

খ) ছাত্ররাই আমাদের দেশের ভাবী নাগরিক - छात्राः अस्माकं देशस्य भविष्यतः नागरिकाः।

গ) সততা মানবের শ্রেষ্ঠ গুণাবলীর অন্যতম - सतता मानवस्य श्रेष्ठानां गुणानाम् अन्यतमा।

ঘ) জ্ঞানই শক্তি। অজ্ঞতা দোষের মূল - ज्ञानमेव शक्तिः। अज्ञता दोषस्य मूलम्।

ঙ) প্রাচীন ঐতিহ্যের দেশ এই ভারতবর্ষ। দেশের রাজধানী দিল্লী - प्राचीनानाम् ऐतिह्यानां देशः अस्माकं भारतवर्षः।

চ) পৃথিবীর ভাষাসমূহের মধ্যে সংস্কৃতভাষা প্রাচীনতমা - पृथिव्याः भाषासु संस्कृतभाषा प्रीचीनतमा।

ছ) এই ভাষা ভারতীয় সভ্যতার ধারক ও বাহক - इयं भाषा भारतीयसभ्यतायाः धारिका वाहिका चास्ति।

জ) নিয়মানুবর্তিতা ছাত্রজীবনের প্রাণস্বরূপ - नियमानुवर्तनं छात्रजीवनस्य प्राणस्वरूपम् अस्ति।

ঝ) আমাদের দেশের নাম ভারতবর্ষ - अस्माकं देशस्य नाम भारतवर्षः अस्ति।

ঞ) এই দেশের ঐতিহ্য ও সংস্কৃতি অত্যন্ত সমৃদ্ধ ও প্রাচীন -अस्य देशस्य परम्परा संस्कृतिः च अतीव समृद्धा प्राचीना च अस्ति।

চ) সংস্কৃতভাষা এই দেশের সংস্কৃতির জীবনী শক্তি -संस्कृतभाषा अस्य देशस्य संस्कृतेः प्राणशक्तिः अस्ति।

ছ) ঋগবেদ বিশ্বসাহিত্যের প্রাচীনতম গ্রন্থ - ऋग्वेदः विश्वसाहित्यस्य प्राचीनतमः ग्रन्थः अस्ति।

জ) আমি ভারতীয় হিসেবে গর্ব অনুভব করি - अहं भारतीयरूपेण गर्वम् अनुभवामि।

ঝ) রামায়ণ ও মহাভারত আমাদের জাতীয় মহাকাব্য - रामायणं महाभारतं च अस्माकं राष्ट्रीयं महाकाव्यद्वयम्।

ঞ) বাল্মীকি রামায়ণ লিখেছেন। বেদব্যাস মহাভারত লিখেছেন - वाल्मीकि रामायणं लिखितवान्। वेदव्यासः महाभारतं रचितवान्।

**17. अधोलिखितेषु कस्यचित् पञ्चानां प्रश्नानाम् उत्तरं प्रदेयम्।** 2×5=10

ক) किं नाम छन्दः?

उत्तरम् - निश्चितवर्णान् मात्राः वा पादं मत्वा रचितं वाक्यं वाक्यसमूहं वा छन्दः कथ्यते। पद्यरचनायाः शास्त्रस्य छन्दः इति नाम।

খ) छन्दः इति शब्दस्य व्युत्पत्तिगतोऽर्थः कः?

उत्तरम् - छन्दशब्दः छद् इति धातुना निष्पन्नः। 'छन्दः' इत्येतस्य पदस्य व्युत्पत्तिरियम् — छन्दयति (पृणाति) इति छन्दो वा छन्दयति (आह्लादयति) इति छन्दः अथवा छन्द्यतेऽनेनेति छन्दः। छन्दांसिच्छादनाद् इत्येतद् यास्ककथनाद् वेदार्थवाचकं छन्दः इत्येतत्पदं छद् (छादने) धातोर्निष्पन्नम्।

KOUSIK PATRA

ग) किं नाम पद्यम् ? तत् कतिविधम् ?

उत्तरम् - पद्यं हि चतुष्पदी। तत्र चत्वारः पादाः वर्तन्ते।

पद्यं द्विविधं वृत्तं जातिरिति। वस्तुतः छन्दसः एव वृत्तजातिभेदेन द्वैविध्यम ज्ञेयम्।

घ) किं नाम वृत्तम्?

उत्तरम् - अक्षरैर्गणना यत्र तद् वृत्तमिति कथ्यते। उक्तं गङ्गादासेन- 'वृत्तम् अक्षरसंख्यातम्' इति।

ङ) का नाम जातिः?

उत्तरम् - मात्राभिर्गणना यत्र सा जातिरिति कथ्यते। उक्तं गङ्गादासेन- 'जातिर्मात्राकृता भवेत्' इति।

च) वृत्तं कतिविधम् ? कानि च तानि?

उत्तरम् - वृत्तं त्रिविधं - समवृत्तम्, अर्धसमवृत्तम्, विषमवृत्तं चेति।

छ) किं नाम समवृत्तम्? उदाहरणमेकं देहि?

उत्तरम् - यस्य पद्यस्य चतुर्णां पादानाम् अक्षराणि समानि एकछन्दोविशिष्टानि तत् समवृत्तम् बोद्धव्यम्। यथा मालिनी, वसन्ततिलकम् इत्यादि।

ज) किं नाम अर्धसमवृत्तम्? उदाहरणमेकं देहि?

उत्तरम् - यस्य पद्यस्य पादानां मध्ये प्रथमतृतीययोः अक्षरसमत्वं तथा द्वितीयचतुर्थयोश्च अक्षरसाम्यं तत्र अर्धसमवृत्तं भवति। यथा वियोगिनी वृत्तम्।

झ) किं नाम विषमवृत्तम्?

उत्तरम् - यस्य पद्यस्य चत्वारः पादाः असमानाक्षरविशिष्टाः तत्र विषमवृत्तं बोद्धव्यम्। यथा उद्गतावृतम्।

ञ) संस्कृतलौकिकछन्दःशास्त्रे कति गणाः सन्ति?

उत्तरम् - छन्दःशास्त्रे छन्दसां निर्णायकानि दश अक्षराणि स्वीक्रियन्ते। ते गणा उच्यन्ते। एकस्मिन् गणे अक्षरत्रयं वर्तते। गगणे ल गणे च एकाक्षरता अस्ति। ते हि गणाः म, न, भ, य, ज, र, स, त, ग, ल इति। एतेषां गणानां मिश्रणेन एकैकं छन्दः उद्भवति। यथा मालिनी छन्दसि ननमयय इति पञ्च गणाः वर्तन्ते।

ट) गुरोः लक्षणं किम्?

उत्तरम् - "सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत्।

वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि वा॥"

ठ) का नाम यतिः?

उत्तरम् - पद्यानां कथनप्रसङ्गे जिह्वायाः विश्रान्तिः यत्र अपेक्षिता भवति तत्स्थानमेव यतिस्थानमिति कथ्यते। गङ्गादासेन छन्दोमञ्जर्यामुक्तम् -

"यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते।

सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया।।"

**18. अधोलिखितेषु कस्यचित् एकस्य सोदाहरणं लक्षणम् आलोच्यताम्।** **5×1=5**

**क) इन्द्रवज्राछन्दः ख) उपेन्द्रवज्राछन्दः ग) रथोद्धताछन्दः घ)** वंशस्थच्छन्दः ङ) मालिनी

**इन्द्रवज्राछन्दः**

**लक्षणम् - स्यादिन्द्रवज्रा यदि तौ जगौ गः।**

यस्मिन् छन्दसि क्रमेण यदि तगणद्वयम्, एकः जगणः, तथा च गुरुद्वयं भवति तर्हि इन्द्रवज्रा भवति। अस्मिन् छन्दसि एकादशाक्षराणि भवन्ति।

**उदाहरणम्- १** पुत्रीति जाता महतीह चिन्ता, कस्मै प्रदेयेति महान् वितर्कः।दत्ता सुखं प्राप्स्यति वा न वेति कन्यापितृत्वं खलु नाम कष्टम्।।

**उदाहरणम् २** == ग्लानो हि धर्मोभ्युदितो ह्यधर्म आत्मानमस्मिन्हि सृजामि पार्थ। सद्रक्षणायासुरनाशनाय धर्मं पुनः स्थापयितुं युगेषु॥

**उपेन्द्रवज्राछन्दः**

**लक्षणम् -** छन्दोमञ्जरीकारस्तु **'उपेन्द्रवज्रा प्रथमे लघौ सा'** इति उपेन्द्रवज्रायाः लक्षणं वदति। अर्थात् यस्मिन् छन्दसि क्रमेण यदि एकः जगणः, एकः तगणः, पुनः एकः जगणः, ततः गुरुद्वयं यदि भवति तर्हि उपेन्द्रवज्रा भवति।

**उदाहरणम्-** त्वमेव माता च पिता त्वमेव । त्वमेव बन्धुश्च सखा त्वमेव ।

त्वमेव विद्या द्रविणं त्वमेव । त्वमेव सर्वं मम देव देव।।

**रथोद्धताछन्दः**

**लक्षणम्- 'रात्परैर्नरलगै रथोद्धता।'**

यत्र प्रत्येकम् अपि पादे क्रमेण एकः रगणः, एकः नगणः, एकः रगणः, एकः लघु एकः गुरुश्च भवति तद्वृत्तं रथोद्धता इति कथ्यते।

**उदाहरणम्-** राधिका दधिविलोडनस्थिता कृष्णवेणुनिनदैः रथोद्धता। यामुनं तटनिकुञ्जमञ्जसा सा जगाम सलिलाहृतिच्छलात्।।

**वंशस्थच्छन्दः**

**लक्षणम् - 'वदन्ति वंशस्थविलं जतौ जरौ।"** अर्थात् यस्मिन् वृत्ते द्वादशाक्षराणि भवन्ति तथा च यत्र प्रत्येकम् अपि पादे यदि क्रमेण एकः जगणः, एकः तगणः पुनश्च एकः जगणः एकः रगणश्च भवति तर्हि तदेव वृत्तं वंशस्थम् उदीरितम् ।

गणाः - ज त ज र।

यतिः - पादान्ते यतिः भवति।

**उदाहरणम्** - यदाबलं धर्ममतं भवेत्तथा, ह्यधर्ममार्गो बलवत्तरस्तथा। सृजामि चात्मानमहं तदार्जुन, सतां सुरक्षार्थमसद्बधाय च॥

KOUSIK PATRA

## मालिनी (१५ अक्षराणि)

लक्षणम् – ननमयययुतेयं मालिनी भोगिलोकैः।

भोगिनः (सर्पाः) ८, लोकाः ७।

मालिनी-छन्दसः प्रत्येकं पादे द्वौ नगणौ, मगणः, द्वौ यगणौ भवन्ति। अस्य छन्दसः अष्टभिः सप्तभिश्च वर्णैः (अक्षरैः) यतिः कर्तव्या।

| न | न | म | य | य |
|---|---|---|---|---|
| ।।। | ।।। | ऽऽऽ | ।ऽऽ | ।ऽऽ |

उदाहरणम् –

स हि गगनविहारी कल्मषध्वंसकारी
दशशतकरधारी ज्योतिषां मध्यचारी।
विधुरपि विधियोगाद् ग्रस्यते राहुणासौ
लिखितमपि ललाटे प्रोज्झितुं कः समर्थः।।

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति।।

-----------

KOUSIK PATRA